NAAC A Accredited

दशमाङ्कः 10 Tenth Edition

# शिक्षाधारा

# SHIKSHADHARA

(Annual Magazine of Department of Shiksha Shastri)

प्रधानसम्पादकः

**प्रो. ए.पि. सच्चिदानन्दः**

प्राचार्यः



सम्पादकः

**डा. चन्द्रकान्तः**

सहसम्पादकौ

डा. नारायण वैद्य

डा. प्रमोद कुमार बुटोलिया


## राष्ट्रियसंस्कृतसंस्थानम्

भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'A' श्रेण्या प्रत्यायितम्

**राजीवगान्धीपरिसरः**

शृङ्गेरी– 577139

**2015-16**

# शिक्षाधारा
# SHIKSHADHARA
(Annual Magazine of Department of Shiksha Shastri)


प्रधानसम्पादकः

प्रो. ए.पि. सच्चिदानन्दः

प्राचार्यः





सम्पादकः

डा. चन्द्रकान्तः

सहसम्पादकौ

डा. नारायण वैद्य डा. प्रमोद कुमार बुटोलिया



राष्ट्रियसंस्कृतसंस्थानम्

भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'A' श्रेण्या प्रत्यायितम्

राजीवगान्धीपरिसरः

शृङ्गेरी– 577139

2015-16

Name of the Magazine : SHIKSHADHARA

© Department of Shiksha shastra
RASTRIYA SANSKRIT SANSTHAN
(Deemed University)
Rajiv Gandhi Campus, Menase, SRINGERI
Chikkamagalur Karnataka – 577139

Year of Publication : 2016
No. of Copies : 100

Published by : Department of Shiksha Shastra
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University)
Rajiv Gandhi Campus, Menase, SRINGERI
Chikkamagalur Karnataka – 577139

Designed by : K.V. Shashidhar
Rajiv Gandhi Campus, Sringeri

Printed At : Kalyani Printers, Perdoor, Udupi District

* All rights are reserved for the Department and Writers are responsible for their respective articles.

आचार्यः ए. पि. सच्चिदानन्दः
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Prof. A. P. Sachidananda
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139



# शुभाशंसा

"कृण्वन्तो विश्वमार्यम्" इत्यार्षोक्तिः अस्मत्पूर्वजानां जागतिकशिक्षाव्यवस्थायाः असीमेच्छां द्योतयति । तत्परम्परायां समागताः शास्त्रकाराः दार्शनिकाः शास्त्राणाम् विकासं समकार्षुः । ऋषिऋणापनोदनाय सर्वैरपि भारतीयैः सुमहान् यत्नो विहितो वर्तते । तद्दिशि राष्ट्रियसंस्कृतसंस्थानेन शास्त्राणां संरक्षणसंवर्धनविषये अहर्निशं प्रयासः क्रियमाणो वर्तते । एतल्लक्ष्यप्रपूरणे राजीवगान्धीपरिसरस्य शिक्षाविभागेन प्रतिवर्षमिव अस्मिन् वर्षेऽपि विभागीयपत्रिका प्रकाश्यते । विभगीयप्राध्यापकाः छात्राश्च लेखान् सज्जीकृत्य **शिक्षाधारा**नम्नीं पत्रिकां सम्पादयितुम् उद्युक्ता सन्तीति महती मे हर्षपरम्परा। शिक्षाशास्त्रे प्रकाश्यमानेयं पत्रिका सर्वेषां शिक्षाविदां बुधजनानां विविदिषूणां माणवकानाञ्च महते लाभाय कल्पते इति विश्वसिमि । अत्र सन्दर्भे कृतकार्याणां सर्वेषां भगवती शारदाम्बा मङलमातनोतु इति सम्प्रार्थये। शुभावसरेऽस्मिन् श्रीश्रीश्रीजगद्गुरूणां भारतीतीर्थमहासंनिधानानां तत्करकमलसञ्जातानां विधुशेखरभारतीसंनिधानानाञ्च अनुग्रहेण परिसरीयाणां सर्वेषां श्रेयांसि भूयासुरिति आशासे ।

मन्मथ–फाल्गुण–दर्श–गुरुवासरः
दिनाङ्कः – 07.04.2016

बुधजनविधेयः
ए.पी.सच्चिदानन्दः
प्रो.ए.पि.सच्चिदानन्दः

डा. चन्द्रकान्तः
शिक्षाशास्त्रविभागाध्यक्षः
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Dr. Chandrakant
Head of the Department of Shiksha Shastri
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
ÊRajiv Gandhi Campus, Sringeri - 577 139



# सम्पादकीयम्

अथेमां समस्तशिक्षाशास्त्रवाङ्मयमहाम्भोनिधिमन्मथोत्थसाररूपां शिक्षाधाराख्यां पत्रिकां तत्रभवतां भवतां करकमलेषु समर्पयतो मम हृदि खलूज्जृम्भते स कोऽपि महीयान् हर्षप्रकर्षोल्लासः। चेतसि समारोपितोऽयं शिक्षाधाराख्यकल्पद्रुमः श्रीशारदानुकम्पया फ़लेग्रहितामभजत । अस्यां हि पत्रिकायां शिक्षाशास्त्रस्यालोचनं गीर्वाणगिरया सह हिन्द्याङ्ग्लभाषास्वपि पल्लवितम् । शिक्षाशास्त्राध्यायिनामन्तेवासिनां सौकर्येण लेखनकलां संवर्धयितुं शिक्षाशास्त्रस्वरूपप्रतिपत्त्यर्थञ्च सविशेषमेष उपक्रमः इति हेतोरेव भाषासरणिरप्यत्र सरला सुगमावबोधा चाश्रिता । अस्याः पत्रिकायाः अध्ययनेन संस्कृतविदुषां छात्राणाञ्च शिक्षाशास्त्रान्तरङ्गपरिचयो नूनं भवेदिति विश्वसिमि ।

शुभावसरेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य सर्वकार्यधुरन्धरान् नानाशास्त्रचतुरान् कुलपतीन् आचार्यान् प. ना. शास्त्रीवर्यान् स्मारं स्मारं तेभ्यः सप्रश्रयं नतिततिपुरस्सरं कार्तज्ञ्यमाविष्करोमि। पत्रिकामिमामुद्दिश्य शुभसम्मतिततिं प्रदाय अनुग्रहीतवद्भ्यः परिगृहीतविचारानुसार्याचरणकर्तृभ्यः परिसरप्राचार्येभ्यः आचार्येभ्यः ए. पि. सच्चिदानन्द उडुपवर्येभ्यः भूयांसि नमांसि अर्पयामि । समेषां विभागीयप्राध्यापकानां साहाय्येन पत्रिकेयं प्रकाश्यत इत्यतः तेभ्यः सर्वेभ्यः सगौरवं कृतज्ञतां वितनोमि। किञ्च अस्याः शिक्षाधारायाः सहसम्पादकाभ्यां विद्वद्भ्याम् डा. नारायण वैद्य, डा. प्रमोद कुमार बुटोलियावर्याभ्यां पूर्णमनोयोगेन च पत्रिकेऽयं प्रकाशतां नीता। अतः तावुभावपि धन्यवादवचोभिः सभाजयामि । एवमेव पत्रिकायाः टङ्कणकर्मणि सहकृतवद्भ्यः सङ्णकप्राध्यापकेभ्यः के. वि. शशिधरवर्येभ्यः धन्यवादान् आविष्करोमि । अन्ते च क्षेत्राधिष्ठात्रीं शारदामाम्बां अनन्तश्रीविभूषितान् जगदगुरून् श्रीश्रीभारतीतीर्थमहास्वामिनः, तत्करकमलसञ्जातान् श्रीश्रीविधुशेखरभारतीमहास्वामिनश्च सभक्तिश्रद्धं वंदमानः उपरमामि ।

मन्मथ–फाल्गुण–दर्श–गुरुवासरः
दिनाङ्कः – 07.04.2016

डा. चन्द्रकान्तः

# शिक्षाविभाग:



Dr. Chandrakant
Head of the Department



Dr. Ramachandrula Balaji
Asst. Professor



Dr. Hariprasad K
Asst. Professor



Dr. Ganesh T. Pandit
Asst. Professor



Dr. Venkataraman Bhat
Asst. Professor



Dr. Narayana Vaidya
Guest Teacher



Dr. Pramod Kumar Butolia
Guest Teacher

# कार्यालयीयाः सदस्याः


**श्री नवीन् कुमार गुप्ता**
अनुभागाधिकारी


**श्री एस्. के. महापात्रः**
कार्यालयसहायकः


**श्री घनानन्दत्रिपाठी**
सहायकग्रन्थपालः


**श्री गुरुराजभट्टः**
यू. डि. सि.


**श्री एस्. आर्. चन्द्रशेखरः**
एल्. डि. सि.


**श्रीमती मञ्जुळा**
एल्. डि. सि.


**श्री बेनुधरमोहापात्रः**
निवृत्तसहायकग्रन्थपालः


**श्रीमती शृतिश्रीः**
डि. ई. ओ.


**श्रीमती सौम्या**
डि. ई. ओ.


**श्री दिनेशः**
एम्. टि. एस्.


**श्री कुमारः**
एम्. टि. एस्.


**श्रीमती सिद्दम्मा**
एम्. टि. एस्.


**श्री शिवण्णः**
एम्. टि. एस्.


**श्री एम्. रफीकः**
एम्. टि. एस्.


**श्रीमती जयम्मा**
स्वच्छताकर्मचारिणी


**श्रीमती तिम्मम्मा**
स्वच्छताकर्मचारिणी


**श्री उमेशः**
छात्रावाससहायकः

# EDITORIAL BOARD



Prof. A.P. Sachidananda
Main Editor



Dr. Chandrakant
Editor

## Co-editors



Dr. Narayana Vaidya



Dr. Pramod Kumar Butolia

### Pupil Teachers' Editorial Board



Rajesh Bhat



Sujata Naik



Mohit Joshi



Swarnalata Mudli

# सत्रसारः

## उद्घाटनम्

श्रीशारदाम्बायाः परिपूर्णकृपाकटाक्षैः श्री श्री भारतीतीर्थमहास्वामिनाम् अनुग्रहविशेषैः अस्मत्कुलपतीनामाचार्याणां परमेश्वरनारायणशास्त्रिवर्याणां शुभाशीर्भिः शृङ्गेरीक्षेत्रे विराजमानस्य राजीवगान्धीपरिसरस्य शिक्षाशास्त्रिविभागस्य ऐषमः शैक्षिकसत्रम् 15–07–2015 तमे दिनाङ्के बुधवासरे परिसरप्राचार्याः प्रो.ए.पी.सच्चिदानन्द उडुपवर्याः समुदजीघटन् ।

## छात्रप्रतिनिधयः

प्रवेशप्रक्रियायाः समाप्त्यनन्तरं शिक्षाशास्त्रिकक्ष्यायाः अ–ब विभाजनमजायत । तत्र राजेशभट्टः, सुजाता नाएक, मोहितजोशी, स्वर्णलता इत्याख्याः चत्वारः छात्राः क्रमशः अ–ब विभागयोः द्वौ द्वाविव छात्रप्रतिनिधित्वेन चिताः अभवन् ।

## वाग्वर्धिनीपरिषत्

छात्राणां वाग्विवर्धनाय सभाभीरुतापनोदनाय च प्रतिवत्सरवत् हायनेऽस्मिन्नपि वाग्वर्धिनीपरिषदः सञ्चालनं विभागेऽस्मिन् सन्ततमजायत ।

## साप्ताहिकसंगोष्ठी

प्रशिक्षणाङ्गत्वेन कौशलविकासाय प्रतिशनिवारं निश्चितविषयेषु गोष्ठ्यः सञ्चालिताः।

## भाषाबोधनवर्गः

एकविंशतिदिनात्मकः भाषाबोधनवर्गः 04.08.2015 तः 28.08.2015 पर्यन्तं प्राचलत् ।

## सूक्ष्मशिक्षणम्

छात्रेषु अध्यापनकौशलसम्पादनाय प्रायोगिकः सूक्ष्मशिक्षणवर्गः 09.09.2015 तः 11.09.2015 पर्यन्तं डा.रामचन्द्रुल बालाजी तथा डा. वेङ्कटरमणभट्टमहोदययोः संयोजकत्वे सञ्चालितः।

## संस्कृतसप्ताहः

अक्टोबरमासस्य षष्ठदिनाङ्के संस्कृतसप्ताहः आयोजितः ।

## हिन्दीसप्ताहः

अक्टोबरमासस्य सप्तमे अष्टमे च दिनाङ्कयोः हिन्दीसप्ताहः आयोजितः ।

## विशिष्टव्याख्यानमाला

07.10.2015 तमे दिनाङ्के विशिष्टव्याख्यानमालायां तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य शिक्षाशास्त्रविभागस्य अध्यक्षाः प्रो. प्रह्लाद रा. जोशीवर्याः विशिष्टं व्याख्यानं प्रायच्छन् ।

## अन्तः परिसरीयः युवमहोत्सवः

प्रतिवर्षमिव अस्मिन्नपि वर्षे अन्तःपरिसरीयः युवमहोत्सवः हिमाचलस्थगरलीपरिसरे 31.10.2015 तः 02.11.2015 पर्यन्तं समनुष्ठितः । तत्र शिक्षाविभागीयच्छात्राः सोत्साहेन भागमगृह्णन्। परिसरेण विजयवैजयन्ती संप्राप्ता ।

**विद्यालयावबोधः**

16.11.2015 तः 21.11.2015 पर्यन्तं विविधविद्यालयेषु छात्राध्यापकानां कृते विद्यालयावबोधात्मकः कार्यक्रमः आयोजितः आसीत् ।

**राष्ट्रियशिक्षादिवसः**

23.11.2015 तमे दिनाङ्के शिक्षाविभागे राष्ट्रियशिक्षादिवसः अनुष्ठितः । शुभावसरेऽस्मिन् डा.मुस्ताक अहमदवर्यः समागतः आसीत् ।

**सांस्कृतिककार्यक्रमाः** (E.P.C –2)

छात्राध्यापकानां कलासु नैपुण्यसंपादनाय विभागपक्षतः कार्त्तिककृष्णैकादशीतः द्वादशीं यावत् (07.12.2015 तः 08.12.2015 पर्यन्तम्) नानाविधाः स्पर्धाः समायोजिताः आसन् ।

**विकिपीडिया**

समसामयिकज्ञानविज्ञानैः छात्राध्यापकाः लाभान्विताः भवन्तु इति धिया विभागेन त्रिदिवसीया विकिपीडियाकार्यशाला समायोजिता । इयं कार्यशाला कार्त्तिककृष्णचतुर्दशीतः मार्गशीर्षशुक्लप्रतिपदं यावत् (10.12.2015 तः 12.12.2015) उद्देश्यबहुला आसीत् ।

**क्रीडास्पर्धाः**

"बालस्तावत् क्रीडासक्तः" इतीदं वचनं प्रसिद्धमेव । छात्राध्यापकाः भाविनि काले शिक्षकाः सन्तः विभिन्नेषु विद्यालयेषु क्रीडाकूटानाम् आयोजने सिद्धहस्ताः भवेयुरिति धियैव शिक्षाविभागेन इदम्प्रथमतया व्यावसायिकक्षमतोन्नयनकार्यक्रमान्तर्गततया विविधाः क्रीडाः मार्गशीर्षशुक्लतृतीयातः चतुर्थीं यावत् (14.12.2015 तः15.12.2015 पर्यन्तम्) समायोजिताः आसन् ।

**राष्ट्रियसङ्गोष्ठी**

जनवरी मासस्य अष्टमे दिनाङ्के शिक्षाविभागे राष्ट्रियसङ्गोष्ठी आयोजिता । तत्र विविधप्रान्तीयाः विद्वांसः शोधच्छात्राश्च स्वीयं पत्रं प्रास्तुवन् ।

**औदयास्तिकशिबिरम्**

छात्राध्यापकाः सर्वेऽपि संस्कृतभाषायां शुद्धतया स्पष्टतया सरलतया च भाषितुं शक्नुयुः इति किञ्चिन विशिष्टं संस्कृतभाषाभ्यासकेन्द्रितं पत्रमेकं पाठ्यक्रमे संस्थानेन संयोजितम् । अस्मिन् संस्कृतभाषाभ्यासनामके प्रायोगिककार्यान्विते अष्टमपत्रे छात्राध्यापकानाम् अभिरुच्युत्पादनाय तेषां भाषिकक्षमतायाः द्रुतगत्या विकासाय च शिक्षाविभागेन ऐदम्प्राथम्येन 'औदयास्तिकशिबिरम्' इत्याख्यं विशिष्टं भाषाभ्यासकेन्द्रितं शिबिरम् आयोजितम् । इदं शिबिरं पौषशुक्लैकादशीतः पौषकृष्णद्वादशीं यावत् (20–01–2016 तः 05–02–0–2016) सम्पन्नम् । औदयास्तिकशिबिरस्य उद्घाटनार्थं श्रीमती सरिता कृष्णशास्त्री महोदया समागता आसीत् ।

**शोभायात्रा, वीथीनाटकञ्च**

ऐदम्प्राथम्येन शिक्षाशास्त्रिविभागीयच्छात्राणां कृते व्यावसायिकक्षमतोन्नयनाङ्गतया पाठ्यसहागामिक्रियान्तर्गततया च शोभायात्रा वीथीनाटकञ्च 21—03—2016 तमे दिनाङ्के आयोजितम् ।

**सत्रसमापनम्**

शिक्षाविभागस्य प्रथववर्षस्य समारोपकार्यक्रमः एप्रैलमासस्य सप्तमे दिनाङ्के परिसरप्राचार्याणां प्रो.ए.पि. सच्चिदानन्द उडुपवर्याणामाध्वर्ये सुसम्पन्नः ।

**वार्षिकपरीक्षा**

एप्रैलमासस्य षोडशदिनाङ्कतः मेमासस्य चतुर्थदिनाङ्कपर्यन्तं बि.एड प्रथमवर्षस्य वार्षिकपरीक्षा भविता ।

# विषयानुक्रमणिका


| क्र.सं विषयः | नाम | पृष्ठसंख्या |
|---|---|---|
| 1. विद्यालयस्तरे प्रदत्तकार्याणि | डा. चन्द्रकान्तः | 01 |
| 2. PROGRAMMED INSTRUCTION | Dr.Ramachandrula Balaji | 03 |
| 3. शारीरिकश्रमस्य महत्वम् | डा. हरिप्रसाद के. | 09 |
| 4. शिक्षकः | डा. वेङ्कटरमणभट्टः | 11 |
| 5. चराः | डा. नारायण वैद्य | 12 |
| 6. पाश्चात्यमनोविज्ञानस्य ऐतिह्यम् | डा. प्रमोद कुमार बुटोलिया | 15 |
| 7. वैदिककालिकी शिक्षा | राजेश भट्टः | 17 |
| 8. शिक्षायाः महत्वम् | ध्रुव भट्टः | 19 |
| 9. भारतीयदर्शनम् | सुजाता नाएक | 20 |
| 10. सत्यधर्मस्य महत्वम् | रञ्जन रश्मि सेठी | 21 |
| 11. विद्याविहीनः पशुः | कन्हय्या कुमार यादव | 22 |
| 12. शिक्षामनोविज्ञानस्यावश्यकता | सूरज कुमार पटेल | 23 |
| 13. शिक्षणम् | चरण राज टि.एस | 25 |
| 14. संस्कृतभाषायाः वैशिष्ट्यम् | अश्विन भट्ट | 26 |
| 15. सफलतायाः कुञ्चिका | पृथिराज सरकार | 28 |
| 16. अनुपम परिसर राजीवगान्धी परिसर | अभिषेकः | 30 |
| 17. शैक्षिकप्रविधिः | सस्मिता परिडा | 31 |
| 18. राष्ट्रियशिक्षानीतिः | सुशील लोहनी | 33 |
| 19. भारतीयशिक्षापद्धतौ अपेक्षिताः परिष्काराः | पुष्पलता बेहेरा | 37 |
| 20. शिक्षा | रजत सुयाल | 40 |
| 21. शिक्षा एव आचार | प्रवीणदमव शर्मा | 42 |
| 22. दर्शनशब्दस्यार्थः तथा च दर्शनशिक्षयोस्सम्बन्धः | संजय भट्टः | 43 |
| 23. महर्षिस्वामिदयानन्दसरस्वतिमहोदयानां शिक्षादर्शनम् | ब्रह्मानन्दः | 46 |
| 24. शिक्षामनोविज्ञानस्य अर्थः | कार्तिक साहु | 47 |
| 25. सम्प्रेषणस्य प्रकाराः | कमलिनी पधान | 48 |
| 26. आधुनिकशिक्षायां शिक्षाधिगमयोः प्रक्रिया | शुभस्मिता साहु | 50 |
| 27. प्रणाली उपागमः | रामचन्द्रः | 53 |
| 28. विद्या एव महारत्नम् | शुभश्री भूयाँ | 54 |
| 29. भाषोत्पत्तिविषयकवादाः | तपस्विनी साहु | 56 |
| 30. समयसारिणीनिर्माणकौशलम् | स्वागतिका साहु | 58 |
| 31. शिक्षायाः समाजे आवश्यकता | वरुण कुमार मोहान्ति | 60 |
| 32. समयसारिणिः | विनय एम् भट्टः | 62 |
| 33. संस्कृतमस्माकं भाग्यम् | शुभम हातगिणे | 63 |

| क्र.सं | विषयः | नाम | पृष्ठसंख्या |
|---|---|---|---|
| 34. | विश्वस्तरे भारतीयसंस्कृतेरवदानम् | ओमप्रकाश पण्डा | 64 |
| 35. | दार्शनिकानां दृष्ट्या शिक्षोद्देश्यानि | गणेश भट्टः | 67 |
| 36. | संस्कृतरक्षा देशरक्षा | अमूल्य भोई | 69 |
| 37. | राष्ट्रियशिक्षानीतिः | दीपक सरकार | 70 |
| 38. | डा. सर्वपल्लीराधाकृष्णानुसारेण शिक्षणम् | पार्श्वनाथ जैन | 73 |
| 39. | शिक्षायां दण्डनीतिः | शिवम् कुमार शुक्लः | 75 |
| 40. | शिक्षादर्शनम् | भुवनेश नौड़ियाल | 77 |
| 41. | शिक्षादर्शनयोः सम्बन्धः | स्वर्णलता मूधुलि | 79 |
| 42. | वर्तमाने युगे नारीणां स्थितिः | रश्मिता बेहेरा | 80 |
| 43. | शैक्षिकपरिवेशे सम्प्रेषणम् | मोहित जोशी | 81 |
| 44. | भारते शिक्षायाः उद्देश्यानां महत्त्वम् | विप्लव राय | 83 |
| 45. | आधुनिकी शिक्षापद्धतिः | सुमन्त पधान | 84 |
| 46. | पाठ्यक्रमे संस्कृतस्य स्थानम् | चिरस्मिता शेठि | 85 |
| 47. | अधिगमः | दीपक रतूड़ी | 87 |
| 48. | पाठयोजनायाः स्वरूपम् | सायिरामः | 89 |
| 49. | शिक्षणसन्नाहपूर्वं पाठयोजनायाः आवश्यकता | पूर्णा डि.एस | 91 |
| 50. | अनुशासनसमस्या | सञ्जिता गान्धी | 92 |
| 51. | शिक्षादर्शनयोः सम्बन्धः | सजीव चन्द्र रायः | 94 |
| 52. | शिक्षायाः व्यवस्था | शुभश्री मोहान्ति | 95 |
| 53. | समाजे शिक्षायाः महत्वम् | वासुदेव दलबेहेरा | 96 |
| 54. | संस्कृतभाषायाः महत्त्वम् | रञ्जितासाहु | 98 |
| 55. | सूक्ष्मशिक्षणम् | प्राची परमिता थाटोई | 101 |
| 56. | संस्कृतस्य महत्वम् | ईप्सिता दीक्षित | 103 |
| ❋ | छात्राणां नामानि | | 105 |
| ❋ | N.C.T.E. Order | | 107 |

# विद्यालयस्तरे प्रदत्तकार्याणि

✍ डा. चन्द्रकान्तः
शिक्षाविभागाध्यक्षः

शैक्षिकव्यवस्थायां प्रदत्तकार्याणां बहु महत्त्वं वर्तते । यतो हि शिक्षणप्रक्रियायाः प्रधानमुद्देश्यमेव अधिगमसम्पादनम् । अधिगमः विविधक्रियाकलापोपजः वर्तते । अतः अधिगमसम्पादने विशेषेण विद्यालयस्तरे प्रदत्तकार्याणामनिवार्यता अवलोक्यते । सामान्यतः कक्ष्याप्रकोष्ठे बोधनानन्तरं बोधितविषयसम्बद्धं कार्यं सम्पादनीयं भवति । प्रत्येकस्मिन् सन्दर्भे बोधनसमनन्तरं प्रदत्तकार्यं भवेदेवेति नियमः नास्ति । यतो हि प्रदत्तकार्यम् अथवा नियोजितं कार्यं शैक्षिकवर्षस्य यस्मिन् कस्मिन् अपि सन्दर्भे दातुं शक्यते । नियोजितं कार्यं वस्तुतः वैविध्यपूर्णं भवेत् । तत् विद्यालयस्तरे सर्वत्रावलोक्यतेऽपि । यथा शिक्षकैः स्वकीयवर्गस्य छात्रेभ्यः दीयमानं वैयक्तिकं कार्यम्, अथवा सामूहिकरूपेण दीयमानं कार्यम्, पाठ्यपुस्तकमाश्रित्य दीयमानं कार्यम्, पाठ्येतरं नियोजितं कार्यं, घटकरूपेण नियोजितं कार्यं, लेखनात्मकं नियोजितं कार्यम्, मौलिकं व्यक्तिगतं नियोजितं कार्यं, प्रयोगालयस्य नियोजितं कार्यं, पठनात्मकं नियोजितं कार्यं, विद्यालयकार्यरूपेण प्रदत्तं कार्यम् इत्येवं वैविध्यं तत्र दृश्यते । अपि च निश्चितस्य पाठ्यांशस्य अन्तः सम्बन्धम् उपविभागरूपेण विभज्य निर्दिष्टे समये कृत्वा समापनीयं कार्यमेव नियोजितमथवा प्रदत्तं कार्यमित्युच्यते ।

## नियोजितकार्याणामुद्देश्यानि

1. छात्रेषु अन्वेषणबुद्धेः अन्वेषणकौशलस्य च विकाससम्पादनम् ।
2. छात्रेषु वैज्ञानिकचिन्तनधारायाः विकासः ।
3. वैज्ञानिकपद्धतेः प्रशिक्षणप्रदानम् ।
4. वैज्ञानिकविषयेष्वासक्त्युत्पादनम् ।
5. निरीक्षणपरिचयनवर्गीकरणादीनां वैज्ञानिकप्रक्रियाकौशलानां ज्ञानप्रदानम् ।
6. प्रयोगाधारेण समस्यानां परिहारसम्पादनसामर्थ्यस्य आरोपणम् ।
7. स्वयं क्रियमाणेषु कार्येष्वात्मविश्वासस्य सम्पादनम् ।

## प्रदत्तकायार्णामाधारभूतानि तत्त्वानि

1. नियोजितं कार्यं पाठ्यक्रमाधारितं पाठ्यक्रमसम्बद्धञ्च भवेत् ।
2. स्पष्टोद्देशसहितं शीघ्रं कर्तुं योग्यञ्च भवेत् ।
3. छात्राणां परिपक्वताधारितमेव कार्यं प्रदेयम् ।
4. सन्दर्भानुगुणं परिवर्तनं सम्पादयितुं नमनीयता भवेत् ।
5. छात्राणां वयसः, आसक्तेः , बुद्धिस्तरस्य , अभिक्षमतायाः , चिन्तनधारायाः सामर्थ्यस्य च आधारेण प्रदत्तकार्यं भवेत्।
6. स्वतन्त्रान्वेषणार्थं सक्रियतासम्पादनार्थमपेक्षितं कार्यं छात्रेभ्यः नियोजितकार्यरूपेण देयम् ।
7. प्रत्येकं समूहस्य कृते पृथक् कार्यं दत्वा वैविध्यं प्रोत्साहयेदध्यापकः । कदाचित् इच्छानुगुणं

कार्यं चयितुमवसरं छात्रेभ्यः प्रकल्पयेदध्यापकः । अयमेकः उत्तमप्रकारोऽपि वर्तते।

8. छात्राणां प्रतिभानुगुणं कार्यविभजनं स्यात् ।

**नियोजितकार्यप्रदानसमये शिक्षकैरवधेयाः अंशाः**

स्वतन्त्ररूपेण छात्राः कार्यं कुर्युरिति प्रधानोंऽशः तथापि कार्यस्य सफलतायां शिक्षकस्य पात्रमपि मुख्यं भवति । शिक्षकः त्रिषु स्तरेषु कार्यं दातुं शक्नोति । कस्यचिद्घटकस्य बोधनात्पूर्वं दातुं शक्नोति । बोधनाधिगमप्रक्रियायाः समकालेऽपि कार्यं दातुं शक्नोति । कस्यचिद्घटकस्य बोधनाधिगमप्रक्रियायाः सम्पूर्णसमाप्त्यनन्तरमपि दातुं शक्नोति। उपर्युक्तेषु त्रिषु स्तरेषु नियोजितकार्यवितरणसमये केचन बिन्दवः शिक्षकेणावधेयाः वर्तन्ते ।

1. पाठ्यक्रमाद्घटकांशे चित्वा स्वाभाविकरूपेण उपविभागं कृत्वा विद्यालयसमयसारिणीं परिशील्य च कार्यकरणे सामञ्जस्यं सम्भवति किमिति दृढीकुर्यात् ।
2. नियोजितकार्यं सोद्देश्यं भवतीत्यतः शिक्षकः सर्वादौ दीयमानस्य प्रदत्तकार्यस्योद्देश्यानि निश्चित्य कार्ययोजनां साधयेत् ।
3. छात्राणां वयः, बुद्धिस्तरम्, आसक्तिं, सामर्थ्यम्, अभिक्षमताम् इच्छाञ्च परिशील्यावगत्य च नियोजितकार्यं वितरेत्।
4. तदा तदा कार्योत्साहं वर्धयितुं प्रेरणां दद्यात् ।
5. छात्रेषु कार्यमध्ये जायमानं सन्देहं परिहृत्य मार्गदर्शनं कुर्यात् ।
6. कार्यस्य विविधस्तरेषु उपलभ्यमानसमयस्य जाग्रतिं दत्वा निर्दिष्टसमये कार्यं सम्पादयितुमवसरं कल्पयेत् ।
7. नियोजितकार्यस्य निर्वहणसमये मध्ये मध्ये सरलान् स्पष्टान् प्रश्नान् पृच्छेत् अथवा लिखित्वा दद्यात् ।
8. छात्रैः क्रियमाणकार्यस्य प्रयोगस्य वा विवरणं लिखितरुपेण दातव्यम् ।
9. उपयुज्यमानानां साधनानां परिचयदानेन सह प्रयोगक्रममपि पूर्वसन्नाहरुपेण बोधयेत् ।
10. नियोजितकार्यदानात्पूर्वं तत्सम्बद्धाः साधनविशेषाः, रासायनिकपदार्थाः, मूलपदार्थाः विद्यालये वर्तन्ते वा नेति शिक्षकः दृढीकुर्यात् ।

**नियोजितकार्यस्य प्रकाराः**

**व्यक्तिगतनियोजितकार्यम्** – इदं सम्पूर्णरुपेण छात्रः स्वतन्त्ररुपेण सम्पादयेत् । शिक्षकस्य पात्रमत्र गौणं भवति। एतादृशकार्ये सरलप्रयोगाः दातुं शक्यन्ते । अपायजनकं कार्यं वा प्रयोगः अत्र न देयः यतो हि अत्र शिक्षकस्य पर्यावलोकनं न भवति । अनेन प्रकारेण छात्रस्योत्तीर्णता अनुत्तीर्णता न निर्धार्यते । ज्ञानक्षेत्रस्य भावक्षेत्रस्य कार्यान्वयक्षेत्रस्य च समन्वयः अस्मिन् प्रकारे परिलक्ष्यते । आनन्देन छात्रः यथा कार्यं सम्पादयेत् तथा कार्यमत्र देयम् । छात्राणां स्फूर्तेः संरक्षणं विकसनञ्चात्र प्रधाने भवतः ।

**लघुसमूहचर्चा** – एतादृशसामूहिककार्यदानसमये पूर्वमेव शिक्षकः समीचीनरुपेण मानसिकसिद्धतां छात्रेषु सम्पादयेत्। किं भावनीयं , कीदृशविचारः चर्चणीयः तत्र पक्षविपक्षयोरुपस्थापनं कथं भवेत्। सर्वेषामपि समूहस्थानां सहभागित्वं कथं भवेदिति पूर्वमेव स्पष्टीकुर्यात् । समानमनस्कानां, समानसामर्थ्यवतामेव समूहः निर्मातव्यः । छात्राणां भागग्रहणस्याधारेण गुणात्मकं मौल्यमापनं

कर्तव्यम् । चर्चायां मध्यस्थपात्रं शिक्षकः निर्वहतीति कृत्वा प्रशनोत्तराणां कृते प्रोत्साहनं यच्छन् मुख्यानंशान् श्यामफलके समुल्लिखेत् । शिक्षकः स्वनिर्णयाधारेण चर्चां समापयेत् ।

**पठनात्मकनियोजितकार्यम्** – पठनात्मकं कार्यं सर्वदा वैयक्तिकमेव भवति । अनेन छात्रः ज्ञानं सम्पादयति । मनोरञ्जनमपि प्राप्नोति । पठनसमये छात्रः विषयवर्गीकरणं कुर्वन् सत्यांशयुक्तं भावपूर्णं च अंशं विभजति । अस्मिन् कार्यदानात्पूर्वमेव निर्दिष्टमुद्देश्यं संस्थाप्य तदर्थं गरिष्ठमङ्कं निर्धार्य मौल्यमापनं कुर्यात् येन प्रत्येकं छात्रस्य प्राप्ताङ्कविश्लेषणेन छात्राणामधिगमस्तरः ज्ञातो भवति ।

**प्रयोगालयस्य नियोजितकार्यम्** – इदमत्यन्तमाकर्षकं कार्यं भवति । कृत्वाधिगच्छेति नीतिमनुसृत्य कार्ययोजना कर्तुं शक्यते । प्रयोगस्य निश्चितं मार्गदर्शमनिवार्यं भवति । सर्वेषामपि कार्यस्तराणां अभिलेखः सम्पादनीयः । तदाधारेण मौल्यमापनं कर्तव्यम् । प्रयोगफलितांशस्य विश्लेषणमनिर्वायम्। एवं रूपेण नियोजितकार्यस्य सम्पादनेन अस्य महत्त्वं वर्धते तथैव छात्रेषु वास्तविकः कार्यानुभवः पर्यावलोक्यते । अतः नियोजितकार्यं विद्यालयस्तरे अनिवार्येण कारयेदध्यापकः इत्यत्रनास्ति संशयः ।

**परिशीलितग्रन्थसूची**


1. Secondary Education and Teachers functions – Dr. S. Shivayya, Pooja Prakashan, Davanagere
2. Educational Technology - C.V. Myageri Vidyanidhi Prakashan, Gadag
3. शिक्षणशास्त्रविषयविश्वकोशः भाग – 1 शिक्षाविभागः कर्णाटकमुक्तविश्वविद्यालयः मैसुरु ।
4. शिक्षामनोविज्ञान – डा. एस् .एस् माथुर , अगरवाल पब्लिकेशन आगरा ।


# PROGRAMMED INSTRUCTION


✍ **Dr.Ramachandrula Balaji**
Asst. professor in Education


Teaching is a set of multiple activities which is linked to specific or general objectives. I other words, we can say that teaching is a sequential activity where each activity is linked with another, thereby presenting a structural form. In order to describe the sequential pattern of class room teaching the two concepts of tactics and strategies are profitably used.

Tactics refer to the details of communication among members of the class room, that is, teacher and student. According to Ben B Strasser (1964)" a tactic is a

goal linked influencing behavior of the teacher the way a teacher behaves in the instructional situation in working towards the development of the strategy." It can also say as an interaction between teacher, students and the subject matter.

Another concept which is used in the understanding of sequential pattern of teaching behavior is teaching strategy. The term strategy is explained by Ben. B. Strasser as "a generalized plan for a lesson(`s) which includes, desired learner behavior in terms of the gaols of instruction and an out line of planned tactics necessary to implement the strategy." Thus strategy is an overall plan to accomplish a result or to get things done.

Teaching strategies mainly can be classified under tow heads as autocratic style and Permissive style.

A. Autocratic style of teaching strategies is traditional, content-centred, where the teacher is active and students remain as passive listeners. The autocratic teaching strategies are good enough for realizing cognitive objectives. In this type of teaching strategies main emphasis is always upon the presentation of the teaching material, such as Lecture method, Lesson demonstration, tutorials and programmed instruction etc.

B. The Permissive style of teaching strategies is based on modern theory of organization and is relationship centred. It is mainly child centred where the content is largely determined by pupils. The teacher and student both remain active in this style of teaching.

These strategies encourage creativity in pupils. For effective domain, this style of teaching strategies are the most effective. E.g..., Question- answer, heuristic method, project method, group discussion, brain storming etc. In the autocratic style of strategies, programmed instructions as given by Skinner, Crowder and Gilbert, is considered to be one of the foremost.

**WHAT IS PROGRAMMED LEARNING OR INSTRUCTION**

Programmed learning is nothing but a method of self-study. The learner is enabled to acquire some knowledge with the help of a programme. Such a self-instructional programme is merely an organized sequence of carefully constructed steps which are designed to teach something,. The content we want to teach is split in to a number of tinybits or steps and they are then arranged into a logical sequence. Easy items are put first and then only more difficult ones. We may see

that one of the important psychological principles of learning is applied here I.e.,"proceed from the easy to the complex."

Each step is presented in a 'frame' and so, in a 'program' we have a number of frames. The learner reads what is given in a frame first and is then required to respond to some questions immediately. The student may be required to fill in a blank in the given sentence or complete sentence or choose the correct answer fro those given. In order to help the learner make the correct response, he is helped by means of 'primes','prompts' and 'cues'. Here the learner is not only helpedto make the correct responses but is given the knowledge of the content also. The immediate knowledge of confirmation he gets that he has been right in his response or answer, acts as an agent of reinforcement for his new learning behavior, i. e..., giving the correct response or answer to a particular stimulus.

Programmed learning is also based on the principle "learning by doing" or "active responding", on the part of the learner. He is an active participant in the learning process at every stage.

He is required to respond correctly to some question or problem in every frame before he proceed to the next frame. This ensures active involvement in the lesson on his part. Since he can spend much time or only a little time any frame before he proceeds to the next, he is enabled to learn at his own pace. This is called 'principle or self-pacing'.Like this programmed learning help us to tackle problem of individual differences in our classes successfully. Revision of a program on the basis of student performance is called principle of student testing. So far we have discussed five basic principles of programmed learning.

They are:

1. Principlesof small setup (Easy programme from item to item)

2. Principles of active responding (Student activity recording his response)

3. Principles of immediate configuration (Knowledge of the correct response or answers)

4. Principles of student testing (Program received on the basis of students performance)

**Styles of programming**

Mainly 3 styles of programme have been generally used.

1. Linear or extrinsic programme (B. F. Skinner)

2. Branching of intrinsic programme (Norman. A Crowden)

3. Mathetics (Thomas F. Gilbert)

1. Linear programming :-

In 1939 B. F. Skinner formulated his famous theory based on conditioning known as operant conditioning. Based in this theory the liner programme was developed and used by Skinner and his associates. In, this the arrangement of stimuli and response is liner. One proceeds from the first frame to the second, then from the second to the third, then from the third to the fourth and so on. This programme called "Straight line programme" as the linear starts from his initialbehaviour to the terminal behaviour following a straight line. In other words, all linear have to follow a the same path of learning. Another important feature of his kind of programme is that the linear`s are all controlled by the programmer, their order too is fixed by them. The learner is only to react or the respond to the various stimuli that are provided and his responds are thus guided by extrinsic factors. That is why liner programming is also called extrinsic programming.

In programming of the linear type, the feedback or reinforcement is quick in the form of the knowledge of result. Also in a liner programme, the linear is helped to avoid errors in making responses by means of number of primes and prompts. Actually, the error rate should not be note than 5 percent in good programme.

To sum up, we can say that the main features of a liner programme are:-

1. All learnes travel through the same path of learning.

2. Their responses are fully controld by the programme.

3. Immediate feedback or reinforcement is provided to them.

4. 'Primes' and 'Prompts' help them learn by avoiding errors.

Though linear programme how many merits such as (1) the active participation of the student in the learning process, (2) self or pacing (3) immediate Confiruation etc., it has certain limitations too.

Limitations:-

1. Student may find learning a dull-process because of its Straightness.

2. Student has no freedom of choice.

3. Presentation of steps in programmed lesson is logical and not psychological and so the students interests are not at all taken in to account.

4. Printing linear programme even in a small Content area, is a costly affair.

5. It requires a high standard of honesty and sincerity on the part of learners. Learner may respond without reading the fames of the programme.

2.Branching or Intrinsic programme:-

The Branching or Intrinsic method of programming was originated by Norman. A Crowder and was defined by him as a programme which adapts to the needs of the students without the medium of an extrinsic device such as a computer. The frame size and amount of information given is much larger than of a linear programme. The branching programme provides the learner with a number of alternative answer to the questions asked at each frame, requiring them to choose one of them. So the actual branch taken by a learner is determined by his answer to any particular question.

Here a correct response leads in to a new body of material; an in correct response leads through a corrective branch, them back again to the main body of the program. One of the merit of the branching programme is its capacity for explaining 'why' a response is either correct or incorrect. Branching programme may be product for use on a teaching machine or in a book form. The book frame is known as a 'scrambled book system' developed by Norman crowder.

Limitations:

1. Each step usually tends to be larger than the one used in the linear type.

2. In view of the presentation of a large amount of material, it is difficult to ask a question that will test all points.

3. This type of programming is rather difficult for young children to follow because of the many brouches.

4. There is the possibility of the learner merely guessing the correct answer to multiple choice questions without actually understanding what is presented earlier.

5. The preparation of this type of programmes very difficult.

3.Metheticalprogramme:

The basic precepts of mathetics were originally formulated by Thomas. F. Gilbert in his article, "Mathetics the `technology of reduction' and term is derived from the Greek word `Mathein' meaning `to learn'. In Matheticalprogrammes, the emphasis is on transfer of skills from one situation to the other situation of life. Here the programming technique is concerned with behaviour and not with any subject matter. It lays emphasis on the realization of objectives through performance. Dr. F. Gilbert defines `Mathetics' as "the systematic application of those complex behaviour repertoires, usually known as subject matter mastery, knowledge and skills." The MatheticalProgramme utilizes the principle of back ward chaining and stand from the last task in the series and retrogers. It is comparatively a difficult technique and that is why only a few programmes have been developed on this style of programming.

Matheticalprogrammes have been developed in the areas of psychomotor skills such as babering, welding brick, laying electrical appliance repair, radio-television repair, sewing, automobile servicing and technical writing where the main emphasis was on transfer of skills. But it dose not main that MatheticalProgramme cannot be developed in consnitive and affective domains.

The basic steps in writing MatheticalProgrammes are

1. Data collection and task analysis.

2. Prescription for mastery.

3. Characterization and lesson plan.

4. Exercsie writing.

5. Editing.

Advantage of MatheticalProgramme

1. In this we can link the result to correct goals which we intend to achieve.

2. It is a task and job oriented technique.

3. It is a relevant, meaningful, significant, and validin the eyes of both student and the trainer.

4. It's emphasis up on student success at 90/90 criterion level of mastery, means that the student is constantly motivated and reinforced by the course. Quences of mastering the knowledge of skill that the writers of obtain.

Limitations:

1. Time-consuming.

2. Highly complicated process.

3. Increased fabrication cost.

4. Back ward chaining is sometimes very difficult to apply in actual training situation.

## शारीरिकश्रमस्य महत्वम्

डा. हरिप्रसाद के.
सहायकप्राध्यापकः

भारतं सम्प्रत्यपि कृषिप्रधानदेशो वर्तते । देशस्य सप्ततिः प्रतिशतं जनाः कृषिकार्यं कुर्वाणाः जीवन्ति । समाजाय अन्नं प्रयच्छन्ति । आद्यधर्मसाधनस्य शरीरस्य संरक्षणार्थं अपेक्षितम् आहारम् उत्पादयन्ति । अल्पस्य लाभस्य निमित्तं बहुकार्यं कुर्वन्ति । पुराकाले त्यागभावनया कृषकाः एतत् कार्यं साधयन्ति स्म । देशे शारीरिकश्रमम् अकृत्वा धनार्जनं कुर्वाणाः जनाः केवलं त्रिप्रतिशतम्

एव वर्तन्ते । अवशिष्टाः 26% जनाः नगरेषु कर्मकरत्वेन विभिन्नकार्येषु शारीरिकश्रमं कुर्वन्ति । शारीरिकश्रमं कुर्वाणानां वेतनम् अन्यतुलनया बह्वेव न्यूनं भवति । वेतनदृष्ट्या बौद्धिककार्यस्य मूल्यं स्वाभाविकतया अधिकं भवति । एतादृशव्यवस्थाकारणात् जनाः सम्प्रति कार्याणां मूल्याङ्कनम् इत्थं कुर्वन्ति यत् शारीरिकश्रमयुक्तं कार्यं मूल्यहीनं, गौरवरहितं, असम्मानजनकञ्चेति । तस्मात् कारणात् ये वस्तुतः शिक्षक–लिपिक–अभियान्त्रिकादि–बौद्धिककार्येषु संलग्नाः एव श्रेष्ठा इति धारणा सामाजे समुत्पन्ना । अस्य फलरूपेण शिक्षां प्राप्य शारीरिकश्रमात् मुक्तिं प्राप्नुयाम इति मानसिकता जनेषु समुत्पन्ना वर्तते । केषाञ्चित् जनानाम् मानसिकतायाः अवलोकनेन इदमेव प्रतीयते यत् शारीरिकपरिश्रमात् मुक्त्यर्थमेव शिक्षा इति चिन्तितवन्तः सन्तीति । तादृशानां व्यक्तित्वस्य इतरे आयामाः इत्थं भवन्ति –

**उत्तरदायित्वभावनायाः ह्रासः**

यः शारीरिकश्रमं तुच्छं मन्यते सः स्वस्य सञ्चिकामपि अन्यः उद्घाट्य दद्यादिति चिन्तयति । स्वस्य आसन्दस्य उत्पीठिकायाः प्रकोष्ठस्य वा स्वच्छीकरणं तु सुदूरस्था कथा भवति । ईदृशाः जनाः स्वकर्मणि उत्तरदायित्वयुक्ताः न भवन्ति ।

**त्यागभावनायाः अभावः**

शारीरिकश्रमविषये यस्य उपेक्षाबुद्धिः भवति तस्मिन् त्यागभावना न भवति । आत्मानं भगवति स एव समर्पयति यः नतशिरस्कः भवति । तदर्थमेव सिख–धर्मावलम्बिषु समर्पणभावस्य जागरणार्थं गुरुद्वारस्य पुरोभागे आगतानां भक्तानां पादरक्षाणां स्वच्छीकरणं धनिकाः अपि कृत्वा स्वीयानां दम्भदर्पादीनाम् अपनोदनपुरस्सरं व्यक्तित्वं निर्मलं सम्पादयितुं यतन्ते । शारीरिकश्रमविषये यस्य अनादरः भवति सः ईदृशीं भावनां न आवहति ।

**मयैव संस्थायाः प्रतिष्ठा सम्पादिता इति दम्भः**

एकस्याः संस्थायाः विकासः केवलं एकस्य व्यक्तिविशेषस्य कारणादेव भवतीति नास्ति । यद्यपि एकः प्रधानकारणीभूतः भवितुमर्हति तथापि सर्वस्य सर्वकारणं एक एव भवितुं नार्हति । किन्तु केषुचित् जनेषु इयं दुर्भावना भवति यत् संस्थायाः यशसः अहमेव कारणीभूतः इति । तस्मात् कारणात् मम अत्र महत्प्राधान्यं भवेत् इति च । शारीरिकश्रमाद्विमुखाः एव एतादृशान् मिथ्याप्रत्ययान् आद्रियन्ते । यतो हि श्रमेण विनैव यशः प्राप्तुं एते कामयन्ते किल ?

**सेवाकार्येषु अनादरः**

निश्चितफलं यत्र नास्ति तादृशं सेवाकार्यं कर्तुं शारीरिककार्येषु अनादरवन्तः नोत्सहन्ते । वैय्यक्तिकं प्रयोजनं सेवाकार्येषु न भवति । सेवाकार्येषु पारलौकिकं प्रयोजनं मनसि निधाय कार्यं करणीयं भवति । पारलौकिकप्रयोजनप्राप्तिविषये विश्वासो नास्ति चेत् अस्मिन्नेव जन्मनि कृतस्य

सेवाकार्यस्य प्रत्यावर्तरूपेण कोऽपि मम कष्टकाले उपकुर्यात् इति भावनया वा केचन परोपकारं कुर्वन्ति । किन्तु एतादृशपरोपकारः प्रायः वित्तीयः एव भवति न तु शारीरिकः ।

**अन्येष्वेव दोषान्वेषणम्**

कस्यापि कार्यस्य वैफल्यस्य कारणम् आत्मभिन्नः कोऽपि जनः इति एतादृशाः जनाः चिन्तयन्ति । स्वस्य दोषविषये विमर्शनं न कुर्वन्त्येव । एतादृशानां स्वरूपं भागवते इत्थं वर्णितमस्ति –

खलः सर्षपमात्राणि परच्छिद्राणि पश्यति ।

अत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ।। इति ।

परोपदेशवेलायां शिष्टाः सर्वे भवन्ति वै ।

विस्मरन्तीह शिष्टत्वं स्वकार्ये समुपस्थिते ।। इति च सुभाषिते ।

एवमेव आत्ममूल्याङ्कनस्य अभावः, लक्ष्यविहीनता इत्यादिदोषाः शारीरिकश्रमे अनादरवतां जानानां व्यक्तित्वस्य इतरे आयामाः भवन्ति । एतादृशदोषेभ्यः मुक्त्यर्थं नीतिशतकस्य पद्यमिदम् सदा नो मनसि विलसतु –

तृष्णां छिन्दि भज क्षमां जहि मदं पापे रतिं मा कृथाः ।

सत्यं ब्रूह्यनुयाहि ........................................ ।।

इत्थम् शारीरिकश्रमं तुच्छं मन्यमानाः बौद्धिकमपि कार्यं सफलतया कर्तुं न प्रभवन्ति इति मनोवैज्ञानिकदृष्ट्यापि प्रमाणीकृतं भवति । अतः शारीरिकश्रमस्य महत्वम् अवगच्छन्तः तदुपेक्षाभावनां निवारयन्तश्च समग्रस्य समाजस्य राष्ट्रस्य च विकासाय प्रयासरताः भवेम इति कथयन् उपसञ्जिहीर्षामि ।

**सन्दर्भग्रन्थाः**

1. भागवतम्
2. सुभाषितरत्नभाण्डागारम्

❋ ❋ ❋

## शिक्षकः

✍ डा. वेङ्कटरमणभट्टः
सहायकप्राध्यापकः

"No Society can raise beyond the level of its teachers" इति राष्ट्रियशिक्षानीतेः आशयः । कस्यापि देशस्योन्नतिः तत्रत्यशिक्षणव्यवस्थायां वर्तते । तद्देशीयशिक्षासमुदायस्यापि महद्योगदानं

देशस्य प्रोन्नत्यै वरीवर्ति इत्युक्तौ नातिशयोक्तिः स्यात् । भारतदेशस्य भविष्यं देशस्य कक्षाप्रकोष्टेषु निर्मीयते इति भारतीयशिक्षा आयोगस्य महान् विश्वासः । शिक्षामाध्यमेन उत्तमसच्चारित्र्यनिर्माणेन सह देशस्य भविष्यं निर्मातव्यं वर्तते । शालासु महाविद्यालयेषु च अधीयानानां बालकानां दोषनिवारणपूर्वकं पाठयामः चेत् राष्ट्रस्य विकासः स्वयमेव सम्पाद्यते । आसीत् कश्चन कालः पुरा जनानां शिक्षणाभावस्य । अद्यत्वे देशे सर्वत्र विद्यालयाः प्रतिष्ठापिताः । प्रतिग्रामं शिक्षकाः सन्ति। प्रतिग्रहं विद्यार्थिनस्सन्ति । उत्तमसमाजनिर्माणाय कोटिशः प्राध्यापकाः कार्यं कुर्वाणाः दृश्यन्ते । शिक्षायाः प्रचारे प्रसारे सर्वकारस्य समाजस्य अभिभावकानां च श्रद्धा महती विद्यते । शिक्षणे परिवर्तनमागतम् । किन्तु गुणवत्ता शिक्षणे अद्यावधि न समागता । शिक्षणेन उत्तमनागरिकानिर्माणं कर्तुं कष्टमनुभवामः । शिक्षा संस्थाः बहवः प्रमाणपत्रविक्रयणकेन्द्रत्वेन दृश्यन्ते । शिक्षणेन बालकेषु जीवनसंस्कृतिः नासादिता । निरीक्षितदिशि मानवसंस्कृतिरपि नासादिता अस्माभिः । शिक्षामाध्यमेन राष्ट्रस्य पुनर्निर्माणं साध्यमिति अस्माभिः दृढीयान् विश्वासः प्राप्तव्यः । निराशावादम् अनवाप्य अस्माभिः शवसमूहेषु जीवनान्वेषणं कर्तव्यमस्ति ।

"आचार्य देवो भव" इत्यार्षोक्तिः शिक्षकः सामाजिकपरिवर्तनस्य केन्द्रबिन्दुः । अन्ये यत् देशस्य परिवर्तनार्थं न कुर्वन्ति तत् शिक्षकः करोति । शिक्षकः सर्वसमर्थः । शिक्षकस्य प्रभावेण संस्कारदीनः बालकः संस्करमवाप्य उत्तमचारित्र्यवान् भवति । मानवेतिहासेषु सामाजिकन्यायाय यानि प्रतिभटनानि संवृत्तानि तेषां सर्वेषामपि कारणभूताः सन्ति प्राचुर्येण शिक्षकाः । बालकानां सर्जनात्मकतायाः कल्पनात्मकशक्तेश्च विकासाय क्रियमाणकर्मकौशलं अध्यापकेषु भृशं वर्तते ।

शिक्षा सिद्धान्तानां कृते स्थानं दत्वा प्रयोगपथि तान् आनीय सार्थकतां भजते शिक्षकः । छात्राणाम् उत्तमव्यक्तित्वसम्पादनदायित्वं शिक्षकाणां वर्तते । अस्मिन् आधुनिके काले शिक्षकाणां कार्यं शालासु एव नास्ति परं समाजे, सर्वकारे, संघे, संस्थायामपि शिक्षकाणां मार्गदर्शनं बहु अपेक्षितम् । कस्यचिद्देशस्य प्रोन्नत्यै सामाजिकार्थिकराजकीयक्षेत्रेषु शिक्षकः सक्रियः स्यत् । शङ्कररामानुजविवेकानन्दादयः मानवकुलस्य शिक्षकाः अभूवन् । तादृशसामाजिकपरिवर्तनाय कारणभूता अभूवन् ।

## चराः

✍ डा. नारायण वैद्य

अतिथिप्राध्यापकः

शैक्षणिकशोधकर्मणि उपयुज्यमानचराः चक्षुषा अवलोक्य मापयितुं नैव शक्यन्ते । किन्तु सन्निवेशानुसारं मापयितुं शक्यन्ते । तस्मात् तार्किकपरिकल्पना इत्यपि व्यवह्रियते । यथा –

1. बुद्धिशक्तिः द्रष्टुं न शक्यते । किन्तु बुद्धिशक्तेः परीक्षणेन बालकानां बुद्धिस्तरस्य मापनं क्रियते।
2. सर्जनात्मकता चक्षुषा अवलोकयितुं न शक्यते । परन्तु सर्जनात्मकता अन्वेषणयोग्या अस्ति ।

इत्थं भूताः चराः पञ्चधा विभक्ताः विद्यन्ते । यथा –

1. स्वतन्त्रचरः
2. परतन्त्रचरः
3. मध्यस्थचरः
4. नियन्त्रितचरः
5. मध्यवर्तिचरः

साम्प्रतमत्र संक्षेपतः चराणां विवरणं प्रस्तूयते –

**स्वतन्त्रचरः**

यः चरः अन्यस्य चरस्योपरि प्रभावमुत्पाद्य चरस्य मूल्यं परिवर्तयितुं क्षमते तत् स्वतन्त्रचरः इति कथ्यते । स्वतन्त्रचरः सर्वदा अन्यं चरं प्रभावयति ।

**लक्षणम्**

1. स्वतन्त्रचरः परतन्त्रचरस्योपरि प्रभावं जनयतीत्यतः परिणामसम्बन्धे कारणं भवति ।
2. स्वतन्त्रचरः एकस्य एकाधिकचरेषु वा स्थित्यन्तरयितुं शक्नोति ।
3. परिमाणात्मकरीत्या स्वतन्त्रचरस्य मापनम् असम्भवं चेदपि तस्य प्रभावमन्विष्य परतन्त्रचरस्य मापनं कर्तुं शक्यते।
4. एकस्मिन् शोधकर्मणि अन्विष्टः स्वतन्त्रचरः अन्यस्मिन् शोधकर्मणि अन्यं रूपम् अवाप्नुयात् ।

**परतन्त्रचरः**

परतन्त्रचरस्य अपरं नाम विद्यते अवलम्बितचरः इति । यः चरः स्वीयं मूल्यं परिवर्तयितुं अन्यस्य चरस्य प्रभावं अवलम्बते तत् परतन्त्रचरः इति व्यपदिष्यते । यथा वैज्ञानिकमनोभावना वैज्ञानिककार्यबोधनेन साध्यम् । अत्र वैज्ञानिकमनोभावः परतन्त्रचरः विद्यते । वैज्ञानिककार्यं स्वतन्त्रकारणम् अस्ति ।

**लक्षणम्**

1. परतन्त्रचरः कारणपरिणामसम्बन्धे परिणमते ।
2. परतन्त्रचरः स्वीयपरिवर्तनाय सम्पूर्णतया स्वतन्त्रचरम् आश्रियते ।
3. परतन्त्रचरं स्वतन्त्रचरस्य स्थित्यनुसारं प्राप्तुं शक्यते ।

**मध्यस्थचरः**

अयं द्वितीयः स्वतन्त्रचरः विद्यते । स्वतन्त्रपरतन्त्रचरानन्विष्य अन्विष्टस्वतन्त्रचराभावे अन्यचराः यदि प्रभावं जनयन्ति चेत् तेषां चराणां प्रभावः कियत् प्रतिशतं परतन्त्रचरस्य परिवर्तनहेतुः अस्तीति अवगमाय स्वीक्रियमाणः द्वितीयस्वतन्त्रचरः एव मध्यस्थचरनाम्ना संकीर्त्यते ।

यथा – पञ्चम – षष्ठकक्ष्यासु अध्यापनशैली अधिगमाय कियत् प्रभावं जनयतीति ज्ञानस्य द्वयोः स्तरयोः मध्ये क्रियमाणमध्ययनम् ।

**लक्षणम्**

1. संशोधना कर्मारम्भात् प्राक् मध्यस्थचरः अन्विष्यते ।
2. मध्यस्तचरं एकम् एकाधिकं वा समूहे संशोधनात् प्राक् अन्विष्य स्थित्यन्तरयितुं शक्यते ।
3. शोधकर्मणि स्वीकृतमध्यस्थचरः इतरचरेषु अन्यरूपं प्राप्नुयात् ।

**नियन्त्रितचरः**

प्रयोगात्मकशोधकर्मणि परतन्त्रचरस्योपरि स्वीकृतस्वतन्त्रचरं विहाय इतरचरणां प्रभावस्य संभावना अस्ति चेत् इतरचराणां प्रभावस्य औदासीन्यसम्भावना विद्यते । एवं यस्य कस्यापि चरस्य प्रभावः परतन्त्रचरस्योपरि शून्यम् उत अवाप्तोदासीन्यतां वा नियन्त्रितचरनाम्ना व्यवह्रियते ।

**लक्षणम्**

1. नियन्त्रितचरः संशोधनात् प्राक् निश्चीयते ।
2. नियन्त्रणं कस्यापि प्रायोगिकसंशोधनानिर्णयं स्पष्टतया प्रमाणयति ।

**मध्यवर्तिचरः**

यस्य चरस्य परतन्त्रचरस्योपरि प्रभावस्य संभावना भवति, शोधकर्मारम्भात् प्राक् अन्वेषयितुं न शक्यते पुनश्च मापयितुम् अपि न शक्यते चेत्, स एव चररू मध्यवर्तिचरः इति व्यपदिश्यते ।

लक्षणम्

1. संशोधनात् प्राक् मध्यवर्तिचरं निश्चेतुं न शक्यते ।
2. मध्यवर्तिचराणां प्रभावः परतन्त्रचरस्योपरि विद्यते इति प्रयोगानन्तरमपि निष्कृष्टतया वक्तुं न शक्यते । तस्मात् मध्यवर्तिचराणां प्रभावं संशोधकेन कल्पयित्वा स्वीकरणीयं भवति ।
3. मध्यवर्तिचराः आन्तरिकरूपेण प्रभावं जनयन्तीत्यतः एतेषां चराणां नियन्त्रणं कर्तुम् उत मध्यस्थचररूपेण स्वीकार्तुं वा गवेषकः न शक्नोति ।

एवं पञ्चचराः एकम् अपरस्योपरि प्रभावमुत्पाद्य प्रयोगसमये यथायथं सम्बन्धम् आप्नुवन्ति।

**सन्दर्भग्रन्थसूची**

**1.** Methodology of Educational Research – Lokesh Koul, Vikas Publishing House Pvt. Ltd., Noida-01, U.P

**2.** Educational Research (In Kannada) – Dr. N. B. Konguvad, Vidyanidhi Prakashan, Gadag - 01

**3.** Educational Research (In Kannada) – Dr. N. Laxmi, Vidyanidhi Prakashan, Gadag - 01

# पाश्चात्यमनोविज्ञानस्य ऐतिह्यम्

History of Western Psychology

डा. प्रमोद कुमार बुटोलिया
अतिथिप्रध्यापकः

पाश्चात्यदार्शनिकचिन्तनस्यादिप्रवर्त्तकाः डेमोक्रिटस् (Democritus, 460&370 BC), प्लेटो (Plato, 427&347BC) अरिस्टाटल् (Aristotle, 384&322BC) चादयः यूनानीदार्शनिकाः आसन्। डेमोक्रिटस् (Democritus) इत्याख्येन विश्वमिदं लघु–लघुपरमाणुभिः (Atoms) निर्मितमिति न्यरूपि। तेन यत्किमप्यस्मान् परितः जायते तत्सर्वं परमाणुषु जायमानायाः अन्तःक्रियायाः (Interaction) परिणाम एव इति समर्थितम्। प्लेटोमहोदयेन मतमिदं व्यक्तीकृतं यत् व्यवहारः मनसा प्रभावितो भवति। किञ्च आत्मशरीरयोः (Soul and Body) आपादतो भेदोऽस्ति। तेन शरीरं भौतिकम्, आत्मा तु अभौतिक (Immaterial) इति निरूपितम्। इत्थमेषः 'मनोभौतिकद्वैतवादं' (Psychophysical Dualism) प्रत्यपादयत्। अरिस्टाटलमहाशयोऽपि पाश्चात्यदर्शनक्षेत्रे सार्वभौमिकप्रतिभावान् अभवत्। अयं मनस्तत्त्वं (Mind) समग्रप्राणिनामाकाररूपेण (Form of the whole organism) मनुते। किञ्च एषः मनस्तत्त्वमेकां प्रक्रियारूपेण (Mind as process) न्यरूपयत्। अगस्टाइन् (Augustine, 354&430BC) इत्यनेन दार्शनिकेन शुद्धज्ञानावाप्तये अन्तर्दर्शनं प्रधानमिति समाहितम्। आर्कमिडिजमहोदयस्य (Archimedes] 287&212BC) सिद्धान्तप्रकाशनानन्तरं मनोविज्ञानस्य विधायकदृष्टिकोणे (Positive view point) प्रगतिः समजायत।

### 1. सप्तदशे शतके मनोविज्ञानम् – Psychology in Seventeenth Century

शतकेऽस्मिन् वैज्ञानिकचिन्तनस्य, अन्वेषणानां, निष्कर्षाणाञ्च संख्यायां सुमहती वृद्धिर्जाता। अस्मिन्नवधौ कोपर्निकस् (Copernicus, 1473–1543), केपलर (kepler, 1571–1630), गैलिलियो (Gailileo 1564–1642), न्यूटन् (Nyuton, 1642–1727), प्रभृतिवैज्ञानिकानां कार्याणि प्रकाशे आगतानि। अतः मनोविज्ञानमपि एतेषां विदुषामनुसन्धानेन प्रभावितम् अभवत्।

तत्र च फ्रान्सदेशीयविचारकः डेकार्टमहाशयः (Decarte) मनश्शरीरयोः अन्तःक्रियाणां परिणामस्वरूपेणैव मानवः व्यवहारं करोतीति व्यवहारस्य व्याख्यां निरूपयाञ्चक्रे। हाब्समहाभागः (Hobbes,1588–1679) भौतिकगतिरेव मानसिकप्रक्रियाणां कारणमस्ति इत्यवोचत्। लान्जे–वर्यः (Lange, 1866) "History of Materialism" (भौतिकवादस्य इतिहासः) इत्यस्मिन् स्वीयपुस्तके "Psychology" इति पदं प्रथमतया प्रायुङ्क्त।

### 2. अष्टादशे शतके मनोविज्ञानम् – Psychology in Eighteenth Century

शतकेऽस्मिन् जॉन–लॉकमहाभागेन (John lock) "Essay concerning Human Under standing" इत्यस्मिन् पुस्तके ज्ञानस्याधारः अनुभवः इति उद्घोषितम्। मनोवैज्ञानिकेन बर्कलीमहोदयेन

(Berkly, 1685–1753) अपि New Theory of vision, 1709 एवं Principles of Human Knowledge, 1710 इति महत्त्वपूर्णपुस्तकद्वयं प्रकाशितम्। अस्यैव दार्शनिकोत्तराधिकारिरूपेण ह्यूममहाभागेन (David Hume, 1711–1776) विचारावधारणयोर्मध्ये (Ideas and Impression) अन्तरं वर्तते इति निगदितम्। मनोवैज्ञानिकः हार्टलेवर्यः (Hartley, 1705–1757) "विचाराणां साहचर्यम्" (The association of ideas) इत्यस्मिन् विषये महत्त्वपूर्णां गवेषणां चकार। एतान् ब्रिटिशवैज्ञानिकान् अतिरिच्य जर्मन् – देशस्थकान्टहरबार्टमहोदयाभ्यां (Kant, 1724–1804, Herbart, 1776–1841), स्काट–लैण्डदेशस्य थामसरीड–स्टेवार्ट–ब्राउन् आदिभिरपि (Thomas Reid, 1710&1796, D-Stewart, 1753&1828, Thomas Brown, 1778&1820) मनोविज्ञानस्वरूपनिर्धारणे महत्त्वपूर्णं योगदानं प्रदत्तम्।

**3. नवदशे शतके मनोविज्ञानम्** – Psychology in Nineteenth Century

मनोविज्ञानस्य विकासदृष्ट्या सम्पूर्णपरिवर्तनानां (Radical change), क्रान्तिकारि–विकासानाञ्च (Revolutionary developments) शतकमिदम्। अस्मिन् अवधौ वुण्ट (W.wundt, 1832–1920), जेम्स (W James, 1842–1910), टिचनर (Tichener, 1867–1927), फेकनर (Fechner, 1801–1887), हेम्महॉज (Helmholtz, 1821–1894) इत्यादयः सुप्रसिद्धाः मनोवैज्ञानिकाः अभवन्।

फेकनरवर्यः मनोभौतिकशास्त्रं (Psychophysics, 1860) संस्थाप्य मनोविज्ञाने "कारणं प्रभावश्च" (cause and effect) इति सम्प्रत्ययस्य प्रायोगिकमध्ययनमकार्षीत्। 1879 तमे वर्षे वुण्टमहाशयः जर्मनदेशस्य लिपजिग् (Leipzig) नाम्नि नगरे मनोविज्ञानस्य प्रप्रथमप्रयोगशालां संस्थाप्य प्रायोगिकमनोविज्ञानस्यारम्भमकरोत्। पाश्चात्यजगति विलियम–जेम्सवर्यः वर्तमानमनोविज्ञानस्य जनकरूपेण ख्यातः। तेन लिखितं Principles of psychology इति पुस्तकमधुनातनमनोविज्ञानस्य सर्वप्रथमा कृतिरिति गण्यते।

**4. विंशे शतके मनोविज्ञानम्** – Psychology in Twenty Century

यदा फ्रायडजुंगमहोदयाभ्यां (Freud & Jung) चेतनाचेतनम् (Concious and Unconcious) इति मनसः स्तरद्वयं प्रतिपादितं, तदा मनोवैज्ञानिकैः अर्द्धचेतनमनोऽपि (Subconscious) आविष्कृतम्। तदारभ्य मनोविज्ञानं चेतनाचेतनार्द्धचेतनमनसः विज्ञानमासीत्। परं चेतनाचेतनार्द्धचेतनमनसः व्याख्याऽपि व्यवहारमेवालम्बते। अतः विंशे शतकारम्भे वाटसनेन (J.B. Watson) मनोविज्ञानं व्यवहारस्य विज्ञानमिति संज्ञा प्रदत्ता।

व्यवहारेण तस्य तात्पर्यमुद्दीपकान् (Stumulis) प्रति क्रियमाणाभिः मानवानुक्रियाभिः (Responses) सह आसीत् यासां च निरीक्षणं कर्तुं शक्यम्। अनन्तरमत्र मनोवैज्ञानिकैः मानसिकव्यवहारः (Mental behavior) अपि सम्मेलितः। शतकेऽस्मिन् मनोविज्ञानस्योन्नतये जीववैज्ञानिकानां (Bi-

ologists), शरीरवैज्ञानिकानां (Physiologists), मनोचिकित्सकानाञ्च (Neurologists) महद्योगदानं वर्तते।

**परिशीलितग्रन्थसूची**


1. Azrin, N. H. (1956). Journal of Psychology.
2. Chauhan, S.S. (2000). Advanced Educational Psychology, Siouth revised edition, Vikas Publishing house, New Delhi,
3. रामशकल पाण्डेय (2006). शिक्षा मनोविज्ञान, आर. लाल बुक डिपो, मेरठ ।
4. राजेन्द्र उपाध्याय (2007). शिक्षा मनोविज्ञान, वन्दना पब्लिकेशन्स, नई दिल्ली ।


## वैदिककालिकी शिक्षा

✍ राजेश भट्टः

अनुक्रमांकः – 01

वैदिकयुगः इति भारतीयसभ्यताया आरम्भाद् बुद्धजन्मपर्यन्तं मन्यते विद्वद्भिः । बृहत्कायं वर्तते वैदिकं साहित्यम् । एतस्मिन् वेदैः सह वेदाङ्गानि उपनिषदश्च सर्वे समायान्ति । शिक्षा नाम सनातनी परम्परा वर्तते भारतदेशे । शिक्षायाः सम्बन्धः वैज्ञानिकसिद्धान्तैः समाश्रित आसीत् । ब्राह्मणक्षत्रियवैश्यशूद्रनामधेयाः चत्वारो वर्णाः ब्रह्मणाः सृष्टाः । एतेषां निर्धारणं सोद्देश्यमासीत् । ब्राह्मणाः स्वजीवनं विद्यार्थमेव अर्पितवन्तः । एतस्यामेव प्रक्रियायां कालानां विज्ञानस्य च विकासो जातः । क्षत्रियास्तु स्वजीवनं युद्धस्य कृते विजयायैवार्पितवन्तः । ते शासनकार्यस्य वेत्तार आसन्। वैश्यानां जीवनं व्यापारार्थमासीत् । ब्राह्मणक्षत्रियवैश्यानां सेवा एव शूद्राणां परमो धर्म आसीदिति।

जायमानाः मानवाः कर्मानुसारम् उच्चाः भवितुमशक्नुवन्, ब्राह्मणकुले समुत्पन्नः पुत्रः कदापि क्षत्रियः, कदापि वैश्यः, कदापि शूद्रोऽपि भवितुं शक्नोति । एवमेव शूद्रा अपि ब्राह्मणत्वं प्राप्तुं समर्था आसन् । योग्यतानुसारं मानवाः उच्चपदवीं प्राप्तुमशक्नुवन् । समस्ता एव वर्णव्यवस्था कर्मणा सञ्चलिता न तु जन्मना ।

आश्रमव्यवस्थाप्यासीत् दृढतरा प्राचीने भारते । तत्र चत्वारः आश्रमाः आसन् । तद्यथा ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, सन्यासाश्रमश्च । महर्षिर्गौतमेन क्रमोऽयं चतुर्धा विभक्तः। तद्यथा विद्यार्थी, गृहस्थाः, भिक्षुः, वैखानसश्चेति ।

आश्रमव्यवस्था आयुषः शतपरिमाणमादाय कृता आसीत् । प्रत्याश्रमं पञ्चविंशतिवर्षाणि निर्धारितान्यासन् । सर्वेष्वाश्रमेषु कर्तव्यतां प्रपूर्य आत्मा जन्ममरणक्रमात् मोक्षं प्राप्नोति । तत्र ब्रह्मचर्याश्रमे शिक्षायाः अभ्यासं करोति मानवः । गृहस्थाश्रमस्य गृहस्थव्यवस्थापकत्वात् संसारस्य कार्यकरणाय समयः आसीत् ।

भारतीयसंस्कृतिः संस्कारप्रधाना वर्तते । प्रारम्भे शिशुः भाषणभोजनादिषु स्वेच्छाचारी भवितुं शक्नोति । स च मलमूत्रादित्यागं सुविधानुसारं कर्तुं शक्नोति ।

पारिवारिकसदस्यैः बालः वर्णानां पदानां लघुः गुरु इत्यादिनां लोपागमविकाराणां स्वरितोदात्तानुदातादीनां शिक्षणं प्राप्य आचार्यं प्रति गन्तुं योग्यो भवति स्म । अक्षरस्वीकरणं न केवलं जनानाम् एतत् तु राजपुत्राणां कृतेऽप्यासीत् । संस्कारोऽयं विद्याऽऽरम्भनाम्नापि प्रसिद्धः आसीत् । एतत्तु पञ्चमे वर्षे भवति स्म ।

**उपनयनम्** – प्रारम्भिकशिक्षायाः पश्चात् उपनयनसंस्कारकालो जायते स्म । स तु विविधानां वर्णानां कृते विविधो भवति स्म । तद्यथा ब्राह्मणस्य कृते गर्भाऽऽधानात् अष्टमे वर्षे, क्षत्रियस्य कृते एकादशे वर्षे वैश्यस्य च कृते तु द्वादशे वर्षे । उपनयनसंस्कारस्य सम्पादनं विविधासु ऋतुषु वर्तते प्रस्तावितम् । तद्यथा ब्राह्मणस्य वसन्ते, क्षत्रियस्य ग्रीष्मे, वैश्यस्य च शरदृतौ भवति स्म उपनयनम् ।

**गुरुकुलव्यवस्था** – अन्तेवासिनः गुरुगृहे निवासं कुर्वन्ति स्म । तत्र केषाञ्चित् नियमानां पालनं करणीयमासीत् छात्रेण । छात्रस्तु गुरोः प्राक् जागर्ति स्म । प्रत्येकं दिवसे स ब्राह्मिमुहूर्ते उद्बुद्धो भवति स्म । ततः गुरोः समीपे गत्वा तस्य चरणस्पर्शं करोति स्म । शिक्षकस्य पुत्रेण सहापि तादृशो व्यवहारः करणीयः यादृशो हि गुरुणा सह क्रियते। गुरोरनन्तरं गुरुपत्न्याः अभिवादनस्यासीत् महत्वम् । कक्षायां छात्रः दत्तचित्तो भवेत् । छात्राः गुरुकुलं परिवर्तयितुमपि स्वतन्त्राः आसन् । तेषामभिधानं 'तीर्थकाक' इति आसीत् ।

वैदिकयुगे शिक्षा वस्तुतः धर्मानुप्रणिताऽऽसीत् । तत्र परापराशिक्षयोः समन्वयः आसीत् । यतोऽहि गुरुः सर्वदा स्वतन्त्रः आसीत् शिक्षणार्थम् । तदानीं ब्रह्मचर्ये बलं दीयते स्म । गुरुः वैदिकयुगे सर्वस्वमासीत् ।

तदानीं तु शिक्षाऽऽरम्भस्य परीक्षणं सुदीर्घमासीत् । तदानीं तु सांसारिकोन्नतेः शिक्षा हस्तकौशलस्य च शिक्षा नाऽसीत् प्रचलिता । विषयेषु दर्शनादीनां बाहुल्यमासीत् । स्त्रीशूद्रयोः कृते वेदानां निषेधमासीत् । ज्ञाने समन्वयस्याभावः आसीत् ।

# शिक्षायाः महत्वम्

✍ ध्रुव भट्टः
अनुक्रमाङ्कः – 02

शिक्षा शब्दः संस्कृतस्य "शिक्ष" विद्योपादाने धातोः योगेन निष्पन्नः भवति । यस्यार्थः अस्ति जिज्ञासा । वास्तविकतया शिक्षायाः अर्थः ज्ञानार्जनेन संस्काराणां व्यवहाराणाञ्च उत्तमोत्तमनिर्माणम् अस्ति । पुनश्च शिक्षा लैटिन् शब्दस्य एजुकेशन् (Education) अस्य मूलरुपम् एजुकेटम् (Educatum) अस्ति । अस्यार्थः "शिक्षणस्य कला " अस्ति । अन्यः एकः शब्दः अस्ति एजुकेयर (Educare) अस्यार्थः शिक्षितकरणम्, उत्थापनम्, बुद्धौ आनयनम्, नेतृत्वप्रदानञ्च भवति । मानवविकासस्य मूलाधारः शिक्षा भवति । शिक्षा कलासु कौशलेषु च वृद्धिं करोति । शिक्षैव जन्मजातशक्तिम् अन्तर्निहितां बहिः आनीय मानवीयव्यवहारे परिवर्तनं करोति । मानवसमाजस्य दर्पणस्य स्वरूपं भवति शिक्षा । शिक्षा मानवजीवनं सुसंस्कृतं कृत्वा जीवनयापनकलां ददाति । एतया शिक्षया मानवः स्वकीयम्, आर्थिकं, सामाजिकं, नैतिकं सामान्यं च विकासं करोति ।

संस्कृते शिक्षायाः पर्यायरुपेण "विद्या" शब्दः स्वीकृतः । विद्यायाः महिम्नः विषये संस्कृतसाहित्ये महती प्रंशसा कृता । यथा–

न चोरहार्यं न च राजहार्यं न भ्रात्रृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ।।

अर्थात् विद्याधनमेव एतादृशं धनम् अस्ति यत् केनापि चोरेणापि न नेतुं शक्यते भ्रात्राऽपि तद् धनस्य विभाजनं कर्तुं न शक्नोति, राजानोऽपि तद् धनम् हर्तुं न शक्नुवन्ति ।

अतः मानवजीवने शिक्षायाः महती भूमिका वर्तते । जन्मतः व्यक्तिः पशुवत् व्यवहरति तस्य व्यवहारे परिवर्तनस्य कार्यं शिक्षः करोति । जन्मतः मानवे काश्चन शक्तयः भवन्ति । शैशवस्थायां बालः व्यवहारशून्यः भवति, तदा तस्य सर्वाः शक्तयः प्रायः सुप्ताः भवन्ति । तां शक्तिं शिक्षैव जागरयति । शिक्षा बालकस्य अन्तर्निहिता शक्तिं बहिरानयति । अतः वयं वक्तुम् शक्नुमः यत् बालकस्य मानवस्य वा अन्तर्निहिताशक्तीनां बहिरानयनप्रक्रिया एव शिक्षा। शिक्षया विना व्यक्तेः शारीरिको, मानसिको, भावात्मको विकासः भवितुं न अर्हति । शिक्षायाः माध्यमेन समाजे कथं स्थातव्यं कथं व्यवहारः करणीयः इति ज्ञापयति शिक्षा । यः पुरुषः स्ववातावरणे रुचिं प्रदर्शयति तादृशपुरुषस्य विकासं करोति शिक्षा ।

# भारतीय दर्शनम्

✍ सुजाता नाएक
अनुक्रमाङ्क –03

**दर्शनशब्दस्याऽर्थः**

दृश्यते ज्ञायते विचार्यते परमतत्वम् अनेनेति दर्शनम् । दर्शनशब्दोऽयं संस्कृतस्य प्रेक्षणार्थकाद् दृश् धातोः "करणाधिकरणोयोश्च" इति सूत्रेण करणे ल्यूट् प्रत्यये आदेशे कृते दर्शनम् इति भवति। उपनिषत्सु सत्यस्य दर्शनाय दृशधातोः प्रोयोगोऽभवत् । अर्थात् ज्ञानचक्षुषा यत् आत्मेत्यादि अलौकिकं वस्तु गृह्यते तद् दर्शनम् । दृश्यते तत्वम् आत्मरूपं ब्रह्मरूपं वा तत्वं येन तद् दर्शनम् । तच्चात्मदर्शनब्रह्मदर्शनरूपतत्वदर्शनम् अध्यात्मदृष्ट्या भवितुमर्हति नान्यथा इति । यथोक्तम् –

आत्मा वाऽरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः ।
मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाने इदं सर्वं विदितम् ।।

– बृहदारण्यकोपनिषद्

तस्मादात्माऽक्षरः शुद्धो बुद्धो नित्यः सर्वगतोऽव्यः ।
उपासितव्यः मन्तव्यः श्रोतव्यश्च मुमुक्षभिः ।।

**भारतीयदर्शनानां वर्गीकरणम्**

अस्मिन् सम्पूर्णभारते यानि दर्शनानि प्रख्यातानि सन्ति तेषां समेषाम् स्थूलदृष्ट्या भागद्वयं कर्तुं शक्यते । यथा – (क) आस्तिकदर्शनानि, (ख) नास्तिकदर्शनानि च ।

**आस्तिकषड्दर्शनानि एवं प्रणेतृणां नामानि**

(क) न्यायदर्शनम् – गौतमः, (ख) वैशेषिकदर्शनम् – कणादः, (ग) सांख्यदर्शनम् – कपिलः , (घ) योगदर्शनम् – पतञ्जलिः, (ङ) पूर्वंमीमांसादर्शनम् – जैमिनिः, (च) उत्तरमीमांसादर्शनम् – व्यासः। एतानि षड्दर्शननि आस्तिकदर्शननि इति अभिधीयन्ते । शास्त्रप्रतिपादितानि तत्वान्येव, परमार्थिकानि सन्तीति यानि दर्शनानि प्रतिपादयन्ति तानि दर्शनानि आस्तिकदर्शनशब्देन अभिधीयन्ते । अर्थात् यानि दर्शनानि वेदानां प्रामाण्यम् उररीकुर्वन्ति, तानि आस्तिकदर्शननि इति व्यवह्रियन्ते ।

**नास्तिकदर्शनानि**

(छ) चार्वाकदर्शनम्, (ज) बौद्धदर्शनम्, (झ) जैनदर्शनम्, (नास्तिकः = वेदनिन्दकः) । तत्र नास्तिकेषु जघन्याश्चार्वाकाः ते मन्यन्ते–" त्रयः वेदस्य कर्तारो भाण्ड–धूर्त–निशाचराः " इति। वेदप्रतिपादितानाम् अर्थानां प्रामाण्यमनभ्युपगछन्ति दर्शनानि नास्तिकदर्शनशब्देन अभिधीयन्ते ।

**भारतीतदर्शनानां महत्वम्**

दर्शनं सामाजिकचेतनायाः रूपमस्ति । इदम् दर्शनम् एकप्रकारकं विज्ञानमस्ति, परमिदं विशिष्टप्रकारकं विज्ञानं वर्तते। यः प्रकृतेः समाजस्य च, विचारणीयविधीनाञ्च अध्ययनं करोति एतदर्थम् अस्य मुख्यानि सामाजिकप्रकरणानि, विशिष्टेन विज्ञानेन सह तुलनां कृत्वा सम्यक्

प्रकारेण विचारणीयानि सन्ति ।अत एव सर्वे पौरस्त्याः पाश्चात्याः च समालोचकाः भारतीयदर्शनस्य तत्वमीमांसां ज्ञानंमीमासां च प्रशसंसुः ।अस्मिन् भूमण्डले अग्रजन्मानः ब्राह्मणाः समस्तान् मानवान् चरित्राणां शिक्षाम् अददुः । कथितं च मनुना–

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्याम् सर्वमानवाः ।

भारतीयदर्शनानुसारम् तु दुःखानां मूलकारणम् अज्ञानमेवास्ति । अज्ञानवशादेव प्राणिनः दुःखानुभवं कुर्वन्ति। कीदृशम् इद्म् अज्ञानम् ? यस्य वशवर्तिनः जनाः दुःखाभाजनानि भवन्ति । अस्माकं महर्षिभिः विद्वज्जनैः भणितं यद् वयं सर्वे प्राणिनः स्वं शरीरमेव सर्वस्वम् मन्यमानाः शरीरस्य दुःखमेव दुःखं मन्यामहे । शरीरस्य अभावमपि वास्तविकमभावं स्वीकुर्महे ।

**भारतीयदर्शनानां वैशिष्ट्यम्**

भारतीयदर्शनानाम् मूलं विश्वस्मिन् विद्यमानानां त्रिविधदुःखात्यन्तनिवृत्तिरेवास्ति । दुःखानामात्यन्तिकी निवृत्ति अध्यात्माविज्ञानेनेव सम्भाव्यते । भारतीयदर्शनानां चिन्तनपद्धतिः एव पाश्चात्यदर्शनेभ्यः भिन्ना विद्यते । दर्शनोत्पत्तिविषये पाश्चात्यदर्शनेषु अनेके वादाः प्रख्याताः सन्ति। तद्यथा – आश्चर्यजन्यतावादः, सन्देहजन्यतावादः, मानवव्यवहाराध्ययनमूलतावादः । ज्ञानानुरागवादः एवं प्रभृतयः अनेके वादाः प्रख्याताः सन्ति ।परं भारतीयदर्शनानां पाश्चात्यदर्शनेभ्यः भिन्ना त्रिविधदुःखात्यन्तनिवृत्तिः अस्ति । त्रिविधदुःखात्यन्तनिवृत्तिश्च अध्यात्मज्ञानेन भवतीति भारतीयदार्शनिकानां सम्मतम् ।

## सत्यधर्मस्य महत्वम्

✍ रञ्जन रश्मि सेठी
अनुक्रमाङ्कः – 04

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ।।

श्रीमद्भगवद्गीतायां स्वयं भगवान् श्रीकृष्ण अर्जुनं धर्ममाहात्म्यविषये अकथयत् । यथा धर्मस्य लोपः तथा अधर्मस्य विस्तारः भवति । जनाः आचारभ्रष्टाः सन्तः भोगवादं परमश्रेयम् अमन्यन्त। तदा स्वयं भगवान् धरातले अवततार ।भगवान् धर्मस्य रक्षणम् एवम् अधर्मस्य विनाशं

च करोति । यः सज्जनः सः केवलं धर्मरक्षकः। परन्तु दुर्जनः अपरेभ्यः कष्टं दत्वा अधर्मकारको भवति । सर्वस्मिन् काले धर्म एव विजयते । अत्र कौरवकुलस्य विनाशः पाण्डवानां विजयश्च सुविदितौ । कस्तर्हि धर्मः ? ध्रियते लोक अनेन इति धर्मः । धर्मबलेन अस्मिन् संसारे सूर्यचन्द्रमसौ गतागतौ । केवलं तपश्चरणेन धर्मे न लभ्यते, परन्तु आचारविचारकर्तव्यादिषु यः सुष्ठुतया स्वकर्मविधानं करोति, सः धार्मिकः । मनसा, वचसा, वपुषा च यः सहृदयः , विचारशीलः च भवति स एव धर्मरक्षकः।

शास्त्रेष्वपि चतुर्वर्गेषु धर्मोऽन्यतमः । भगवतः नारायणस्य चरणपद्मवन्दनद्वारा धर्मफलं लभ्यते । धर्मस्य मार्गः अष्टविधः । यथोक्तम् –

इज्याऽध्ययनदानानि तपः सत्यं धृतिरूः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ।।

धर्मबलेन लोके अलभ्यं वस्तु अपि लब्धुं शक्नोति । जीवे दया मानवस्य धर्मः । नरेषु नारायणसेवा तेन करणीया । उक्तमिदमपि यत् –

मातृवत्परदारेषु परद्रव्येषु लोष्ठवत् ।
आत्मवद् सर्वभूतेषु यः पश्यति सः पण्डितः ।।

एवं श्रूयते –

ब्रह्म कर्मसर्जनं करोति । विष्णुः कर्म पालनं साधयति । महेश्वरेण विनाशः क्रियते इति ।

अत्र न कोऽपि चिरं तिष्ठति । न कोऽपि चिरं स्थास्यति । सर्वे स्वाभिनयं समाप्य कालवलेन प्रत्यागमिष्यन्ति । अधार्मिककुलं कालक्रमेण निश्चितरुपेण लीनं भवति । अतः हे मानव ! धर्ममनुचर । धर्मस्य रक्षां कुरु । अस्मिन् अनित्यसंसारे धर्मं संस्थापय । उक्तमिदमस्ति यत् –

धर्मेण लभ्यते सर्वं धर्मसारमिदं जगत् ।। इति ।।

## विद्याविहीनः पशुः

कन्हय्या कुमार यादव

अनुक्रमाङ्कः – 05

अस्मिन् संसारे ते आदरं प्राप्नुवन्ति येषां समीपे विद्याधनं वर्तते । ते सर्वत्र जिताः भवन्ति। ते एव उन्नतिं प्रति गच्छन्ति, अन्यान् अपि नयन्ति । एवं प्रकारेण ये समीचीनतया विद्यार्जनं कुर्वन्ति ते स्वजीवनं, समाजं, राष्ट्रं च निर्मान्ति ।

अमाकं जीवने विद्यायाः महत्त्वं वर्तते । यतो हि विद्यया वयं सर्वं प्राप्तुं साधयितुं च शक्नुमः । अस्माकं जीवनमेव शिक्षा अस्ति, तथा शिक्षा एव जीवनमस्ति । आङ्ग्लभाषायामपि उक्तं वर्तते –

Education is life and life is Education

विद्यायाः महत्त्वं प्रतिपादयन् आह कविः –

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततरू सुखम् ।।

विद्या अस्मान् नम्रान् कृत्वा योग्यान् करोति । तया योग्यतया वयं धनं प्राप्नुमः । तदनु वयं सुखं आप्नुमः । उक्तं चापि :

विद्वत्वं च नृपत्वं च येन तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।।

विदुषः समानः राजा अपि न भवति । यतः राजानः स्वदेशे आदरं प्राप्नुवन्ति । किन्तु विद्वांसः सर्वत्र सम्मानं प्राप्नुवन्ति ।

विद्यया मनुष्यः स्वकीयम् कर्तव्यम् जानाति । धर्माऽधर्मयोः विवेकः भवति । सत्कर्मणि प्रवृत्तः भवति । एवं सन्मार्गमनुसरति । अत एव उक्तम् –

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न हि धनं विद्या विहीन; पशुः ।।

## शिक्षामनोविज्ञानस्यावश्यकता

✍ सूरज कुमार पटेल
अनुक्रमाङ्कः – 06

मनोविज्ञानं नूतनं शास्त्रं वर्तते । शिक्षामनोविज्ञानं मनोविज्ञानशास्त्रस्यान्यतमा शाखा वर्तते । एतस्यां सामान्यमनोविज्ञानस्य सिद्धान्ता एव प्रयुज्यन्ते । भारतीयाशास्त्रेषु अपि

मनोवैज्ञानिकविचाराः प्रतिपादिताः सन्ति । अतः पूर्वकाले दर्शनशास्त्रस्य शाखारूपेण प्रतिष्ठितं मनोविज्ञानं कालान्तरे स्वतन्त्रविषयः जातमस्ति ।

शैक्षणिकपरिस्थितिषु छात्राणां व्यवहारस्य वैज्ञानिकारीत्या अध्ययनं क्रियते शिक्षामनोविज्ञाने। विद्यालये बालकस्य व्यवहारं कथं प्रभावयतीति विचारयति शिक्षामनोविज्ञानम् । अधिगमस्य कृते समीचीनाः परिस्थितयः कथम् उत्पाद्यन्ते ? एकस्यां शैक्षणिकपरिस्थितावपि केषाञ्चन बालकानामाचरणं कथमन्यथाजायते ? कीदृशं शिक्षणं रुचिकरं स्यात् ? का नाम पाठ्यचर्या छात्राणां कृते हितकारी? शिक्षणपरिस्थितौ व्यक्तित्वगुणानां विकासाः कथं भवन्ति ? एते प्रश्नाः भवन्ति शिक्षामनोविज्ञानशास्त्रस्य कृते ।

पूर्वं तु अनेकविषयाणां ज्ञापनमेव शिक्षाया अर्थः आसीत् । साम्प्रतिके युगे अर्थोऽयं परिवर्तितः । इदानीं बालकानामन्तर्निहितशक्तीनां प्रकटीकरणं तेषां शक्तीनां विकसनञ्च शिक्षाया अर्थः वर्तते। साम्प्रतिके युगे शिक्षणप्रक्रियायां केन्द्रीभूतं भवति शिक्षार्थी । शिक्षामनोविज्ञानस्य अधिकाधिकं कार्यक्रमं छात्राणां कृते एवाऽऽयोज्यते । अत्र छात्रा अधिकाधिकं जानीयुः इति हेतोः प्रयासाः विधीयन्ते । छात्रस्य कृते कीदृशं ज्ञानम् उपयोगि भवतीति प्रतिपादयति शास्त्रमिदम् । छात्रहेतोः शिक्षामनोविज्ञानं व्यक्तिगतभिन्नतायाः, तन्मापनस्य, व्यक्तित्वगुणानां, तस्य वंशधर्मपरिवेशाणां, तस्य बुद्धिविकासानाञ्च अध्ययनं सम्पादयति । छात्राणां कस्याम् अवस्थायां काः रुचयो भवन्तीति शिक्षामनोविज्ञानमेव अन्वेषयति । शास्त्रमिदं एतदपि ज्ञापयति यत् छात्रस्य काः सन्ति न्यूनताः वैशिष्ट्यञ्चेति । अतः एव शिक्षकेभ्यः शिक्षामनोविज्ञानम् आवश्यकं वर्तते ।

शिक्षामनोविज्ञानस्य क्षेत्रे शिक्षणानुभवा अपि समाविष्टाः भवन्ति । शास्त्रमिदं प्रतिपादयति यत् कस्यामवस्थायां के अनुभवाः छात्रेभ्यः केन विधिना प्रदेयाः ? इति । एतच्छास्त्रं बुद्धिपीरक्षणम् उपलब्धिपरीक्षणादिकञ्च विधाय विद्यालये वर्तमानान् विविधस्तरयुतान् बालान् अध्यापयितुं शिक्षकमुपकरोति । शिक्षामनोविज्ञानं मन्दमतियुतानां बालकानां शिक्षणायापि शिक्षकान् योजयति । बालानां चिन्तनमननादिशक्तीनां विकासार्थमपि शिक्षामनोविज्ञानं साहाय्यमाचरति। सरलं कठिनं वा पाठ्यविषयं सहजतया, सरलतया, सरसतया चाध्यापयितुं ज्ञानं शिक्षामनोविज्ञानेन एव उत्पाद्यते । शिक्षामनोविज्ञानं ज्ञात्वा शिक्षकः शिक्षणसिद्धान्तान् सम्यगवगत्य कक्ष्यायाः शिक्षणे शक्तो जायते । एतादृश एव शिक्षकः छात्रेषु लोकप्रियः भवितुमर्हति । स शिक्षकः कक्ष्याया आभ्यन्तरेऽनुशासनमपि स्थापयितुं समर्थो जायते । स तु बालकानां दुष्प्रवृत्तीरपाकृत्य सदाचरणविकासे समर्थो भवति । आरम्भिके काले अध्यापक एव केन्द्रीभूत आसीत् शिक्षणप्रक्रियायाम् । अध्यापनकाले स एव सक्रियो भवति स्म छात्रास्तु श्रवणरताः भूत्वा निष्क्रिया एव तिष्ठन्ति स्म। शिक्षाक्षेत्रे मनोविज्ञानस्य प्रवेशेन साम्प्रतं छात्राः कक्ष्यायां सक्रियाः भवन्ति । छात्रान् सक्रियान् कर्तुं शिक्षको दृश्यश्रव्योपकरणानां प्रयोगाद्युपायानाचरति कक्षायाम् । सर्वमिदं मनोविज्ञानाध्ययनेन सम्भवति ।

शिक्षणान्ते परीक्षणं परमावश्यकमासीत् पारम्परिकविधौ मूल्याङ्कनाय निबन्धात्मकप्रश्नाः प्रचलिता आसन् । एभिः प्रश्नैः विषयनिष्ठत्वात् छात्राणां समुचितं मूल्याङ्कनं न भवति स्म । इदानीं मूल्याङ्कनाय आधुनिकानां लघूत्तरात्मकप्रश्नानामथ च वस्तुनिष्ठप्रश्नानां निवेशः । एतेन छात्राणां ज्ञानस्य सम्यक् मापनं कर्तुं शक्यते । इदमपि मनोविज्ञानस्यैव शिक्षाक्षेत्रे प्रभावो वर्तते । विद्यालयेषु पठनपाठनेन सहेव अनुशासनस्य स्थापनार्थं प्रयासाः क्रियन्ते स्म। पुरा अनुशासनं दण्डाऽधारितमासीत्। यथा – "खण्डिकोपाध्यायः तस्मै चपेटां ददाति स्म" इति महाभाष्ये । शिक्षकाः स्वच्छन्दतया दण्डस्य प्रयोगं कुर्वन्ति स्म । दण्डाधारितस्य अनुशासनस्य दोषान् प्रदर्श्य मनोविज्ञानं शिक्षाक्षेत्रे स्वानुशासनस्य सिद्धान्तं प्रतिपादयति । एवम् अस्ति शिक्षाक्षेत्रे मनोविज्ञानस्य महत् योगदानम् ।

❋ ❋ ❋

## शिक्षणम्

✍ चरण राज टि.एस

अनुक्रमाङ्कः - 07

ज्ञानाकाङ्क्षिणः वयं जन्मादारभ्य मरणपर्यन्तं किमपि ज्ञातुं प्रयतामहे एव। अस्माकं जीवननिर्वहणार्थं आत्मज्ञानार्थं वा यद्यत् ज्ञातं तत्सर्वं शिक्षणं नाम्नाभिधीयते। शिक्षणम् इति पदस्य अनेकरीत्या व्याख्यानानि सन्ति। उपनिषद्वाक्यानुसारेण प्रथमतया शिक्षणे के विषयाः अनिवार्यत्वेनान्तर्भवन्ति इति पश्यामः।

1. शारीरिकावश्यकतानां पूर्तिः।

2. सामाजिकावश्यकतानां पूर्तिः।

3. मनोवैज्ञानिकावश्यकतानां पूर्तिः ।

4. आत्मानुभूतिविषये बोधनीयं वर्तते Plato महोदयादिविचारवादिनामनुसारेण । समाजे मनुष्यरीत्या जीवननिर्वहणार्थं शारीरिकावश्यकतानां पूर्तिः शिक्षणीयं वर्तते । जननानन्तरं पशुतुल्यशिशुं माता बोधयति आचारविचारान् च । "सत्यं वद। धर्मं चर" इत्यदिवाक्यानुसारेण सामाजिकावश्यकतानां प्राप्त्यर्थं गुरवः बोधयन्ति यथा पङ्के जायमानः पङ्करहितः पङ्कजरिव असत्येषु सत्यमार्गं, हिंसेषु अहिंसामार्गं, असहायेषु साहाय्यमार्गं, लुब्धेषु दानमार्गं, आधुनिकगणितं, विज्ञानं, समाजम् इत्यादिविषयान्। क्रमेण आकाङ्क्षानिवारणार्थं, मनसि विद्यमाननूतनविचारान् प्रयोगविचारान् "अहिंसा परमो धर्मः" इति वाक्यानुसारेण अहिंसा मार्गेण 'यथा मधुसमादत्ते रक्षन् पुष्पाणि षट्पदः' तथा

आकाङ्क्षाः प्राप्तव्याः इति बोधनीयम्। एवं धर्मार्थकामविचाराणां प्रतिपादनानन्तरमेव "मनैवमनुष्याणां कारणं बन्धमोक्षयोः", "आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्" इत्यनुसारेण यथा निशायां नक्षत्राणि शोभयन्तः पतन्ति तथा निजसंसारात् मोक्षमार्गं प्राप्तव्यमिति अत्मानुभूतिविषये वक्तव्यम् । एतानि सर्वाणि विचाराणि आधुनिकशिक्षणेऽपि वक्तव्यानि। परन्तु सर्वाणि विचाराणि आचार्यमुखेनैव प्राप्तुं न शक्यते। किमर्थं इत्युक्ते

आचार्यात् पादमादत्ते पादं शिष्यस्वमेधया।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ।।

अस्मात् कालादेव ज्ञायते शिक्षणग्रहणपद्धतिर्कथं स्यादिति।

आधुनिकयुगे बौद्धिकनैतिकमाध्यमेन शिक्षणं दातव्यं वर्तते। एतान् उपयुज्यैव शालासु पाठनीयम्। बौद्धिकमाध्यमे तर्कसम्बद्धविचाराः बुद्धेः विकासार्थं भाषा, साहित्यं, इतिहासः, गणितम्, विज्ञानम् इत्यादि बोधनीयानि । कलामाध्यमेन सङ्गीतनाटकनृत्यक्रीडादिविचाराः अपि बोधनीयाः। नैतिकमाध्यमेन धर्मशास्त्रं, नीतिशास्त्रं, पुराणानि, उपनिषदित्यादीनि बोधनीयानि वर्तन्ते।

❀ ❀ ❀

## संस्कृतभाषायाः वैशिष्ट्यम्

✍ अश्विन भट्ट

अनुक्रमाङ्कः - 08

अस्ति खलु संस्कृतभाषा संसारस्य प्राचीनतमा भाषा । जगतः अतिप्राचीनसमृद्धा इयं संस्कृतवाङ्मयं विश्ववाङ्मये स्वस्य अद्वितीयं स्थानं अलङ्करोति । ''संस्कृतं नाम दैवीवाक् अन्वाख्याता महर्षिभिः'' इति कवेः दण्डिनः बहुप्रसिद्धा उक्तिः । कदाचित् संस्कृतस्य विकासाय प्रतिरोधः यथा भवेत् तथा एतस्याः प्रसिद्धिः व्याप्ता खलु इति मे संशयः । न केवलं दैवीवाणी, मानुषी अपि वाणी एषा इति प्रत्यभिज्ञानम् आवश्यकम् अस्माकम् । इयं सर्वश्रेष्ठा भाषा इति भाषाकोविदाः वदन्ति । सर्वभाषाजननी इति अस्या अन्वर्थसंज्ञा । सर्वाः अपि भाषाः अस्याः जाताः अनया एव पोषिताश्च वर्तन्ते । वेदान्तस्य भाषा संस्कृतं, योगस्य भाषा संस्कृतं, आयुर्वेदस्य भाषा संस्कृतं, भगवद्गीतयाः भाषा संस्कृतं, प्राचीनभारतस्य कृषिः, रसायनम्, खगोलः, पशुविज्ञानम्, अर्थशास्त्रम्, राजनीति इत्यादीनां विविधशास्त्राणां भाषा संस्कृतम् ।

**वैज्ञानिकक्षेत्रे संस्कृतम्**

सम्प्रति वर्तते विज्ञानस्य युगम् । विज्ञानस्याविष्कारैः संसारेऽभूतपूर्वक्रान्तिः समुत्पादिता । परन्तु संस्कृतवाङ्मये विविधविज्ञानशाखानां विकासः पूर्वं नाभूत् वा इति चिन्तयामश्चेद् न, सूर्याः बहवः सन्तीति तु संस्कृते एव सूचितं सहस्रवर्षेभ्यः पूर्वमेव । भूमेः परिधेः मापनं कृतम् । शून्यस्य दशमानपद्धतेः च प्रदानं कृतं, जीवन्मरणयोः रहस्यानि उद्घाटितानि । किं किं न कृतं संस्कृतेन? संस्कृतभाषायाः शब्दनिर्माणसामर्थ्यम् अपरिमितं श्रेष्ठं च विद्यते । संस्कृते विद्यमानानां धातूनाम् उपसर्गाणां प्रत्ययानां च बलेन असंख्यकोटिशब्दाः निर्मातुं शक्यन्ते । प्रायः द्विसहस्रं धातवः, द्वाविंशतिः उपसर्गाः, कृत्तद्धितसमासादयः पञ्चवृत्तयः तत्र विद्यमानाः असंख्यप्रत्ययाः च शब्दनिर्माणसामग्रयः। अस्याः कर्तृकर्मक्रियारूपवाक्यघटना शाब्दबोधप्रक्रिया च अतिविशिष्टा गणकयन्त्रेऽपि (कम्प्यूटरयन्त्रेऽपि) उपयोगयोग्या इति तज्ज्ञाः वदन्ति । प्रयोगसामर्थ्यं, शब्दमाधुर्यं सूत्रीकरणसौकर्यम् इत्यादौ अनेकस्मिन् विषये संस्कृतभाषा अत्युन्नतस्तरीया भवति । अतः एव इयं भाषा सङ्गणकोपयोगि भाषा इति अङ्गीकृता अस्ति।

**भारतीयसंस्कृतिः संस्कृताश्रिता**

"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" इयं च संस्कृतिः संस्कृताश्रिता इति सर्वेऽपि अङ्गीचक्रुः। एकस्याः चिरपुरातनायाः संस्कृतेः अविच्छिन्नप्रवाहे कारणीभूता एषा भाषा । सर्वाः भाषाः स्वस्य स्वस्य संस्कारं प्रसरन्तीषु सत्सु ताभ्यः अपि एकसूत्रीकरणेन समग्रतां ददाति एषा सुरकन्यका । ये एतां भाषां यथायोग्यं पठन्ति ते सर्वे अपि संस्कृतिमन्तः भविष्यन्ति । एकेन आरक्षकाधिकारिमहाशयेन एकदा उक्तमासीत् यत् अपराधिनां गणनामध्ये संस्कृतज्ञानां सङ्ख्या अङ्गुलीपरिमिता एव अस्ति । ते अपि स्वस्य कारणेन एव कारागारं प्रविष्टाः इति न सन्ति इति। एतत् पर्याप्तं भवति अस्याः सांस्कृतिकमहत्त्वं प्रकाशयितुम् इति चिन्तयामि ।

**व्यक्तित्वविकासे संस्कृतस्य पात्रम्**

लण्डनदेशस्य सेण्ट् जेयिंस् विद्यालये प्राथमिककक्ष्यातः निर्बन्धविषयत्वेन संस्कृतं पठनीयम् इति श्रुत्वा एकदा कश्चित् कार्यकर्ता विद्यालयाधिकारिणं पृष्टवान् ''किमर्थम् अत्र संस्कृतं पाठयति''? इति । तदा सः उक्तवान् –''मनुष्यमस्तिष्कस्य विकासाय संस्कृतभाषा बहूपयोगिनी इति शास्त्रज्ञानां निर्देशानुसारम् एषः प्रयोगः'' इति । तस्य परिणतफलं किम् इति जिज्ञासायां सत्यां सः पुनः उक्तवान् – ''अत्यद्भुतमयः अस्ति अस्य परिणामः । अधुना छात्राणां स्मरणशक्तिरपि बहुवर्धिता दृश्यते'' इत्यादि । ''अभयं वै ब्रह्म'', ''तत्त्वमसि'', ''अमृतस्य पुत्राः'' इत्यादयः उपनिषत्प्रयोगाः मनश्शक्तिवर्धनाय कियता प्रमाणेन उपकुर्वन्तीति वक्तव्यं नास्ति खलु । संस्कृतगद्यपद्यादीनाम् उच्चारणद्वारा प्राणायामतः प्राप्यमानं फलमेव प्राप्तुं शक्नुमः । तेन अरोगदृढगात्रता लभ्यते खलु ।

एतस्याः भाषायाः शब्दकुलीनतास्वामिविवेकानन्दपादैः प्रतिपादिता च । एवं कायेन वाचा मनसा इन्द्रियैः बुद्ध्या आत्मना च विकारं कृत्वा परिपूर्णव्यक्तित्वप्रदायकं भवति संस्कृतम् । जर्मन् देशे चतुर्दशसंस्कृतमहाविद्यालयाः सन्ति इति तु ज्ञायते एव ।

**संस्कृतं राष्ट्रस्य एकीकरणाय**

राष्ट्रस्य परमोन्नतस्थानस्य प्राप्त्यर्थम् उत्तमं साधनं भवति संस्कृतम् । यदा यदा राष्ट्रस्य पुनरुद्धरणप्रक्रिया आसीत् तदा तदा यस्य कस्यापि संस्कृतज्ञस्य दायः तत्र लीनः स्यात् यथा चन्द्रगुप्तकाले चाणक्यस्य । राष्ट्रं सहजम् इति कारणेन राष्ट्रनिर्माणम् इति प्रयोगः असाधुः भवति। राष्ट्रं स्वसंस्कृतिद्वारा, संस्कृतिः स्वाभाषाद्वारा एव जीवति इत्यतः राष्ट्रोज्जीवनाय संस्कृतोज्जीवनं प्रथमं प्रधानं सोपानम् । पूर्वं भारतं जगद्गुरुः आसीत् । तथा समग्रपृथ्वीतः जनाः अत्र आगत्य शिक्षणं प्राप्य स्वचरित्रं निर्मितवन्तः आसन् । तद्यथा मनोः वचनं ''एतद्देशप्रसूतस्य सकाशादग्रजन्मनः स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः''इति । नलन्दा –तक्षशिलादयाः विश्वविद्यालयाः तेषाम् अध्ययनकेन्द्राणि आसन् यत्र संस्कृतेन एव सर्वविषयान् पाठयन्ति स्म । तदेव जगद्गुरुभारतम् अद्य जगद्भिक्षुकः जातः यतः राष्ट्रापेक्षया राष्ट्रियस्य महत्त्वदानात् संस्कृताभिमानाभावात् संस्कृतस्य अवगणनमनोभावाच्च । यदि संस्कृतस्य उचितं प्राधान्यं कल्पयति तर्हि संस्कृतेः तद्वारा राष्ट्रस्य परमवैभवप्राप्तिः भवेदेव । एवं भाषाशास्त्रदृष्ट्या संस्कारवाहिनीरुपेण वैज्ञानिकसाङ्केतिकतन्त्रज्ञानादि शास्त्रव्यवहारयोग्यतया व्यक्तित्वविकासमाध्यमत्वेन राष्ट्रपुनर्निर्माणसाधनत्वेन च संस्कृतभाषायाः महत्त्वम् अस्त्येव ।

## सफलतायाः कुञ्चिका

✍ पृथिराज सरकार

अनुक्रमाङ्कः – 09

संसारेऽस्मिन् श्रेष्ठः प्राणिः मानवः वर्तते । तत् तु बुद्धिदृष्टया, परम् शक्तिदृष्टया श्रेष्ठः जन्तूनां मध्यैव वर्तते। मानवाः जन्तूनपि बुद्ध्या वशीकुर्वन्ति । तथा यथोचितजन्तूना सह कार्यं च साधयन्ति । यतो हि उच्यते – "बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम् " मानवाः बुद्ध्या किम् किम् न साधयन्ति बुद्धिबलेन ते वायुयानम्, रेलयानम्, संगणकम्, दूरवाणीं, दूरदर्शनादिवस्तूनि आविष्कृतवन्तः । परम् तत्र अतिमहत्त्वपूर्णं वर्तते "उद्यमः, आत्मविश्वासः, दृढनिश्चयः च" । उद्यमः

इत्युक्ते निरन्तरप्रयासः । यतो हि उच्यते –

उद्यमेन हि सिद्ध्यन्ति कार्यणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।

उद्यमेन विना कापि सिद्धिः न भवति । एवमेव आत्मविश्वासः अति महत्वपूर्णः वर्तते । आत्मविश्वासविषये स्वामी विवेकानन्दः प्रतिपादयति । यथा –

सर्वा अपि क्षमताः भवत्सु निहिताः वर्तन्ते ।
भवान् सर्वं कर्तुं प्रभवति स्वस्मिन् विश्वसतु ।
भवान् अक्षमः इति कदापि मा निश्चिनोतु ।
उत्तिष्ठत, जाग्रत ! स्वीय प्रतिभां च प्रदर्शय ।।

तद्यथा – All power within you you can do anything and every thing , Belive in that do not believe that you are weak . stand up and express the divinity within you.

स्वयम् अवलोकनं करणीयम् इति स्वामी विवेकानन्दवर्यस्य विचार आसीत् तद्यथा "स्वस्योपरि घृणा भावना कदापि न जागरणीया । भगवतः जिज्ञासया पूर्वं स्वविषये जिज्ञासा भवितव्या । यः एवं न जानाति सः भगवन्तं कदापि ज्ञातुं न प्रभवति इति ।

"Our first duty is not to hate ourselves, because to advance we must have faith in ourselves first and then in god. He who has no faith in himself Can never have faith in god"

भीरुकापुरुषव्यक्तिः विशेषं किमपि कर्त्तुं न शक्नोति । कार्यं कर्त्तुं स एव समर्थः भवति यः वीरः निर्भीकः कर्मनिष्ठः च स्यात् । अत एव स्वामी विवेकानन्दः एकदा जनमासम् उद्बोधयन् अवोचत् – "जीवनसंग्रामे वीरो भव। सर्वान् वद अहं निर्भीकः इति । भयं त्यज । कारणं भयमेव मृत्युः । भयमेव पापम् । भयम् अधोलोकः । भयम् अधार्मिकम् । अत एव जीवने भयस्य कृते स्थानं न दातव्यमेव " स्वामी विवेकानन्दः आत्मविश्वासविषये पुनः उक्तवान् – हे भ्रातः ! " स्वं यथा चिन्तयति तथैव भवान् भविष्यति । यदि स्वं निर्बलः इति चिन्तयति तर्हि भवान् निर्बल एव। यदि आत्मानं सबलं भावयति तर्हि बलमेव । यदि पवित्रं मनुते तर्हि पवित्रमेव । अत एव स्वस्य विषये नकारात्मकं चिन्तनं न कार्यम्" इति । तद्यथा – whatever you think , that you will be. If you think yourselves weak , weak you will be; If you think yourselves Strong , Strong you will be ; If you think yourselves impure , impure you will be ; If you think you selves pure, pure you will be . So, no negative thoughts ! For your Selves.

धैर्यम् जनानां विमोक्षाय भवति अतः ये जनाः धैर्यम् धृत्वा आत्मविश्वासतया उद्यमेन कार्यं कुर्वन्ति ते अवश्यमेव साफल्यं प्राप्नुवन्ति । उक्तञ्च भगवता श्रीकृष्णेन गीतायाम् –

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति संपदं देवीमभिजातस्य भारत ।।

## अनुपम परिसर राजीवगान्धी परिसर

✍ अभिषेकः
अनुक्रमाङ्कः – 10

देखो अपने परिसर की जग में कैसी शान है,
राजीव गान्धी कितना सुन्दर अनुपम इसका नाम है,
तुंगा के तट–निकट सुशोभित भवन दिखता विशाल है,
आदि शंकराचार्य जी की तपोभूमि सरनाम है,
माँ शारदा का परिसर पर सदा अक्षय वरदान है।

देखो अपने परिसर....

विद्या व्यसनी शिक्षक सारे जग में बडे महान है,
पर शिक्षा शास्त्र विभाग की विशिष्ट यह पहचान है।
तारामण्डल के सप्तर्षियों का यहाँ तेजस्वी परिवार है,
तन मन धन से अध्यापन करना शिक्षा पर पूरा ध्यान है।

देखो अपने परिसर......

विभागाध्यक्ष चन्द्रकान्त जी का मृदु सौम्य स्वभाव है,
सच्चिदानन्द(प्राचार्य)जी की कृपा है उन पर कोई नहीं अभाव है।
अन्य सभी गुरु जन वृन्दों का वात्सल्य प्रेम समान है,
इस परिसर में शिक्षा लेने का हम सबको अभिमान है।

देखो अपने परिसर.....

कर्मशील हैं छात्र यहाँ के कितना मृदुल स्वभाव है,
कोटि–कोटि सुख त्याग के आते कहते नहिं कभी अभाव है।
सदभाव है जहाँ झलकता,वह अतुलनीय परिवार है,
सर्वांगीण विकास परिसर का, देवों का आभार है।
देखो अपने परिसर......
ऐसे गुरुजनों व मुखिया को मेरा बारम्बार प्रणाम है।।

नोट – यहाँ सप्तर्षियों का आशय शिक्षा शास्त्र विभाग के सभी प्राध्यापकों से है।।

## शैक्षिकप्रविधिः

✍ सस्मिता परिडा
अनुक्रमाङ्कः – 11

शैक्षिकं नाम शिक्षा सम्वद्धं किञ्चित् तत् प्रविधिशास्त्रमिति । शैक्षिकश्चासौ प्रविधिरिति च शैक्षिकप्रविधिः इत्यत्र कर्मधारयसमासः । शिक्ष विद्योपादने इति धातोः शिक्षा शब्दस्योत्पत्तिः। प्रकृष्टः विधिः प्रविधिः इत्युच्यते । प्रविधिः इति पदम् आंग्लभाषायां Technology इत्युच्यते । Technology शब्दस्यार्थः कलाविज्ञानम् । Technology इति शब्दः ग्रीकशब्दः Techanikos इति पदात् आगतः Technikos इति शब्दस्यार्थः कला, कौशलम् (An art) इति वा । शिक्षा अपि एका शिक्षणकला वर्तते ।

**परिभाषा**

1. अधिगमक्षेत्रे परिस्थितिषु च शिक्षणप्रशिक्षणयोः प्रभावस्य प्राविण्यस्य च विकासार्थं विज्ञानस्य प्रयोगः इति Gom Leath.

2. प्रयोगात्मकव्यावहारिकसमस्यां समाधातुं अधिगममनोविज्ञानकृतविस्तृतप्रयोगः इति Jhon deco.

3 ज्ञानस्य व्यवहारे विनियोगप्रक्रिया एव शैक्षिकप्रविधिः इति E.M Buter.

**शैक्षिकप्रविधेः रूपाणि**

लुम्सडेन् (Lumsden) महोदयस्य अनुसारं षष्ठ्यधिकनवदशशततमे वर्षे (1956) शैक्षिकप्रविधिः त्रिभिः प्रकारैः विभक्तुं शक्यते । यथा –

1. यन्त्रांशोपागमः

2. तन्त्रांशोपागमः

3. प्रणाल्युपागमः

**यन्त्रांशोपागमः**

एषः प्रविधिः यन्त्राशोपागमः दृश्यश्रव्योपकरणं चेति उच्यते । भौतिकविज्ञानतः अभियन्त्रणप्रविधितः च एतस्य आविर्भाव अभवत् । शिक्षणे अभियन्त्रस्य यन्त्रेषु प्रयोगः एव यन्त्रांशोपागमः इति उच्यते । यान्त्रिकरणं हि शैक्षिकप्रविधि शास्त्रस्य कठोरोपागमपक्षोऽस्ति । अनेन न्यूनातिन्यूनसमये अधिकाधिकच्छात्राणां शिक्षणं कर्तुं शक्यते । यथा ध्वनिमुद्रिका–प्रक्षेपक–दूरदर्शन–आकाशवाणी–भाषाप्रयोगशाला–सङ्गणकप्रभृतीनि साधनानि यन्त्रांशोपागमः इति प्रसिद्धं शिक्षणक्षेत्रे । यन्त्रांशोपागमस्य तात्पर्यं शिक्षायां यन्त्राणाम् उपयोगेन सह सम्बद्धं विद्यते ।

**तन्त्रांशोपागमः**

एषः शैक्षिकप्रविधिः तन्त्रांशोपागमः, अनुदेशनप्रविधिः, शिक्षणप्रविधिः, व्यवहारप्रविधिः चापि उच्यते । अस्मिन् अभियन्त्राणां प्रयोगं अकृत्वा शिक्षणाधिगमसिद्धान्तानां प्रयोगः बालकेषु अपेक्षितव्यवहारं परिवर्तनार्थं क्रियते । अर्थात् यन्त्राणां प्रयोगः बालाकानां अपेक्षितव्यवहारसंशोधनार्थम् एव क्रियते। एतेषां प्रयोगः विशिष्य पाठ्यवस्तूनां प्रस्तुतीकरणं प्रभावशाली कर्तुमेव विधीयते । शिक्षणप्रविधीनां सम्बन्धः अनुदेशनप्रणाल्याः पुनर्बलेन प्रतिपुष्टिसिद्धान्ते मूल्याङ्कने च वर्तते । एतादृशप्रविधौ अन्तक्षेपः (Input) , प्रक्रिया (process), प्रतिफलनं (output) इत्यादीनां विकासदृष्ट्या महत्वं दीयते । तन्त्रांशोपागमस्य तात्पर्यं तु अधिगमसिद्धान्तेन उपागमेन शिक्षणसिद्धान्तेन सह च विधते ।

**प्रणाल्युपागमः**

तृतीयः भवति प्रणाल्युपागमः । मुख्यरुपेण अस्योपागमस्य उपयोगः विविधसमस्यानां समाधानार्थं क्रियते । शिक्षायाम् एतस्य उपयोगः आधिक्येन क्रियमाणः विद्यते ।

**शैक्षिकप्रविधेः उद्देश्यानि**

शैक्षिकप्रविधेः त्रीणि उद्देश्यानि सन्ति । यथा –

1. ज्ञानस्य सञ्चयः

2. ज्ञानस्य प्रसारः

3. ज्ञानस्य विकासः

**ज्ञानस्य सञ्चयः**

प्राचीनकाले मुद्रणयन्त्रस्याभावात् पुस्तकानि नासन् । तदर्थं शिक्षार्थीनां बहुकष्टमासीत् । परन्तु वैज्ञानिकयुगेऽस्मिन् यन्त्राणाम् आविष्कारेण पुस्तकानि बहुसुलभतया प्राप्तुं शक्यन्ते ।

**ज्ञानस्य प्रसारः**

Education for all तर्हि ज्ञानस्य प्रसारः शैक्षिकप्रविधिना सुलभः जातः । आधुनिकयुगे आकाशवाणी, दूरदर्शनम्, अन्तर्जालम्, पत्राचारपाठ्यक्रमः इत्यादीनां सहयोगेन दूरशिक्षणं सुलभं जातम् । तेन इदानीं सर्वे जनाः शिक्षायां भागग्रहणं कर्तुं शक्नुवन्ति ।

**ज्ञानस्य विकासः**

शिक्षाशास्त्रिणां संशोधनस्य फलं भवति ज्ञानस्य विकासः । शिक्षाक्षेत्रे प्रतिदिनं नूतननूतनोपकरणानि प्रक्रियाश्च आगच्छन्ति । यथा सङ्गणकं, वैद्युतिकगणनायन्त्रम्, अन्तर्जालम् इत्यादीनि ।

एवं छात्राणां बोधनाय क्रियमाणः यन्त्राणां प्रयोगः एवः शैक्षिकप्रविधिः इत्युच्यते ।

# राष्ट्रियशिक्षानीतिः

✍ सुशील लोहनी

अनुक्रमाङ्कः –12

साम्प्रतिके विश्वेऽस्मिन् विद्यते महत् गौरवं शिक्षायाः। शिक्षा हि व्यक्तित्वविकासस्यान्यतमं साधनं तु वर्तते। भारतीयानां कृते एषा पुरुषार्थचतुष्टस्यापि हेतुः वर्तते। विद्या–ज्ञान–बुद्ध्यादिपदव्याजेन शिक्षायाः महत्वं विशेषेण प्रतिपादितम् वर्तते। प्राचीनकाले समुन्नतशिक्षाव्यवस्था आसीत् अतः एव भारतम् ''विश्वगुरुः'' इति पदम् अलंकुर्वन्नासीत्।

कालान्तरे वैदेशिकानामाकर्षणकेन्द्रे भारतदेशे अहिंसाधर्मावलम्बिनां लोकानां उत्पत्तिर्जाता। बाह्यदेशीयानां शासनं लोककल्याणभावनया नैव प्रचलति स्म। वैदेशिकाः शासकाः सदैवाधिकाधिकमाधिपत्यं चिन्तयन्ति स्म। दशमशताब्द्यारभ्य विंशतिशताब्द्याः मध्यभागे वैदेशिकानां शासनसमये सर्वाधिकहानिः शिक्षाक्षेत्रैव अभवत्। विंशतिशताब्द्याः आरम्भात् आङ्ग्लशासकैः भारते शैक्षिकविकासाय किञ्चित् प्रयासः कृतः, परन्तु वास्तविकरूपेणस्तु तेऽपि अस्माकं पारम्परिकभारतीयशिक्षायाः नाशमेव अकार्षुः।

शनैः शनैः भारतीयेषु राष्ट्रियतायाः भावनायाः विकासेन स्वतन्त्रतायाः प्राप्तिर्जाता। स्वतन्त्रताप्राप्त्यानन्तरं अस्माकं नेतारः संविधानानुसारं राष्ट्रियोद्देश्यानां रूपरेखां निर्मितवन्तः। एतेषाम् उद्देश्यानां विवरणं निम्नरीत्या अस्ति। यथा –

1. भारतस्य सर्वेषां नागरिकाणां कृते सामाजिकी, आर्थिकी राजनैतिकी च स्वतन्त्रता।
2. नागरिकाणां कृते विचारस्य अभिव्यक्तीनां, विश्वासस्य, धर्मस्य उपासनायाः च समानता।
3. नागरिकाणां कृते प्रतिष्ठा अवसरस्य च समानता।
4. नागरिकाणां कृते गरिमा राष्ट्रस्य एकता अखण्डता च सुनिश्चितार्थम् अधिकाराः।

अस्माकं नेतारः इमानि उद्देश्यानि भारतीयसंविधानस्य प्रस्तावनायां स्थापितवन्तः । यतो हि इमानि उद्देश्यानि भारते सम्पूर्णप्रभुत्वसम्पन्नलोकतान्त्रिकम् एवं धर्मनिरपेक्षसमाजवादीगणराज्यस्य निर्माणाय अत्यावश्यकानि सन्ति।

एतेषां राष्ट्रियोद्देश्यानां पूर्त्यर्थं शिक्षा सशक्तमाध्यमः आसीत् । स्वातन्त्र्यानन्तरं भारते शिक्षाव्यवस्थायाः प्रसाराय अनेके प्रयासाः प्रवर्तिताः। एतेषु प्रयासेषु विविधानां आयोगानां स्थापनाऽभवत्। तेषु आयोगेषु राष्ट्रियशिक्षाऽऽयोगः (1964 – 66) शिक्षायाः सर्वविधविकासाय विंशतिवर्षीयायाः योजनायाः प्रारुपं प्रस्तूय शिक्षायाः सामान्यसिद्धान्तानां नीतीनां च कृते परामर्शान् प्रादात् यत् भारतशासनं शिक्षायाः नीतिं निर्माय अस्यां राज्यशासनेभ्यः स्थानीयेभ्यश्च अधिकारिभ्यो नीतीनां क्रियान्वयनाय निर्देशाः स्युरिति। भारते अस्मिन् क्षेत्रे प्रयासानाम् आरम्भः तु 1948 तमे वर्षे जातमासीत् । तदा डा. राधाकृष्णन् महोदयस्य अध्यक्षतायां विश्वविद्यालयशिक्षा आयोगस्य गठनं, अनन्तरं 1952 तमे वर्षे श्री मुदालियरमहोदयस्य अध्यक्षतायां माध्यमिकशिक्षा आयोगस्य गठनं अभवत् । परन्तु शिक्षासम्बद्धविचाराणां पूर्णरुपेण विमर्शः 1964 – 66 वर्षस्य कोठारी कमीशनद्वारा अभवत् । कोठारी आयोगस्य मतानाम् आधारेण स्वतन्त्रभारतस्य प्रथमशिक्षानीतेः घोषणा 1968 तमे वर्षे जुलाई मासे अभवत् । एतस्यां शिक्षानीतौ शिक्षायाः विकासस्य विविधानां सिद्धान्तानाम् अनुकरणस्य संकल्पं भारतशासनेन कृतम्।

**राष्ट्रियशिक्षानीतिः 1968**

कोठारी आयोगस्य मतानाम् आधारेण स्वतन्त्रभारतस्य प्रथमशिक्षानीतेः घोषणा 1968 तमे वर्षे जुलाई मासे अभवत् । एतस्यां शिक्षानीतौ शिक्षायाः विकासस्य विविधानाम् सिद्धान्तानाम् अनुकरणस्य संकल्पं भारतशासनेन कृतम्। तद्यथा –

1. निःशुल्का अनिवार्या च शिक्षा
2. शिक्षकाणां महत्त्वम्, तेषां वेतनादिकं शिक्षा च
3. भाषाणां विकासः

   I. प्रादेशिकभाषाः

   II. त्रिभाषासूत्रम्

III. हिन्दी

IV. संस्कृतम्

V. अन्ताराष्ट्रियभाषाः

4) शैक्षणिकावसराणां समान्यीकरणम्

5) प्रतिभायाः विकासः

6) कार्यानुभवो समाजसेवा च

7) विज्ञानशिक्षा अनुसन्धानञ्च

8) कृषिशिक्षा उद्योगशिक्षा च

9) ग्रन्थानामुत्पादनम्

10) परीक्षामूल्यांङ्कनञ्च

11) माध्यमिकशिक्षा

12) विश्वविद्यालयशिक्षा

13) अल्पकालिकशिक्षा पत्राचारपाठ्यचर्या च

14) साक्षारतायाः वयस्कशिक्षायाश्च प्रसारः

15) क्रीडा

16) अल्पसङ्ख्यकानां शिक्षा

17) शिक्षायाः संरचना

**राष्ट्रियशिक्षानीतिः 1979**

राष्ट्रियशिक्षानीतेः अस्मिन् प्रारूपे त्रयोविंशतिसंङ्ख्याकाः शीर्षकाः आसन् । एतेषां शीर्षकाणां तेषु च समाविष्टानां बिन्दूनामुल्लेखोऽत्र विधीयते।

1. प्रस्तावना,
2. सर्वव्यापिका प्रारम्भिकशिक्षा च
3. प्रौढशिक्षा
4. माध्यमिकशिक्षा
5. उच्चशिक्षा
6. शिक्षायाः संरचना

7. प्राविधिकशिक्षा
8. कृषिशिक्षा
9. चिकित्साशिक्षा
10. संस्कृतिः
11. शारीरिकशिक्षा
12. शिक्षायाः माध्यमः
13. त्रिभाषासूत्रम्
14. भाषाणां विकासः
15. परीक्षापरिष्कारः
16. पुस्तकानां विकासः
17. शैक्षिकावसराः
18. अध्यापकः
19. सामुदयिकं सहभागित्वम्
20. स्वैच्छिकं सङ्घटनम्
21. अल्पसंख्यकानां शिक्षा
22. शिक्षानिवेशः
23. समीक्षा

**राष्ट्रियशिक्षानीतिः 1986**

भारतशासनेन राष्ट्रियशिक्षानीतिः 1986 शिक्षायाः विकासाय प्रस्तुता। एषा नवशिक्षानीतिनाम्ना वर्तते। एषा द्वादशसङ्ख्याकेषु खण्डेषु सप्तपञ्चादशाधिकैकशततमेषु बिन्दुषु च लिपिबद्धा वर्तते। एतेषां संक्षिप्तं निरुपणमत्र विधीयते। तद्यथा –

1. प्रथमो भागः – भूमिका
2. द्वितीयो भागः – शिक्षायाः सारः भूमिका च
3. तृतीयो भागः – राष्ट्रियशिक्षाव्यवस्था
4. चतुर्थो भागः – शिक्षायाः समानताः
5. पञ्चमो भागः – विविधेषु स्तरेषु शिक्षायाः पुनर्घटनम्
6. षष्ठमो भागः – प्रविधिकशिक्षा प्रबन्धशिक्षा च

7. सप्तमो भागः– पद्धत्याः कार्यान्वयः

8. अष्टमो भागः – शैक्षिकविषयाणां प्रक्रियाणाञ्च नवीकरणम्

9. नवमो भागः – शिक्षकः

10. दशमो भागः – शिक्षायाः प्रबन्धः

11. एकादशो भागः – संसाधनं समीक्षा च

12. द्वादशो भागः – भविष्यत्

शिक्षायाः विकासः सुष्ठुरूपेण प्रचलन् वर्तते, अस्य मुख्यकारणं वर्तते सुयोग्या शिक्षानीतिः। यदि नीतिः सम्यक् भवति चेदेव शासनमपि सुशासनं भवति। उत्तरोत्तरविकासस्य कारणं भवति । एतादृश्यः सुनीतयः तथा च तेषां सुष्ठु क्रियायोजनमपि आवश्यकमेव वर्तते। कालानुगुणम् आवश्यकतानुगुणञ्च नीतयः अपि परिवर्त्यन्ते। अतः शिक्षां महत् प्रभावयन्ति शिक्षानीतयः।

## भारतीयशिक्षापद्धतौ अपेक्षिताः परिष्काराः

✍ पुष्पलता बेहेरा

अनुक्रमाङ्कः – 13

**शिक्षायाः स्वरूपम्**

शिक्षा कीदृशी स्यात् ? इति प्रश्नः प्राक्कालादेव चचार्याः विषयः आसीत्। सा शिक्षा या विमुक्तये, या लोक–परलोक–भयसाधनो सा विद्या'।

आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमित्युच्यते। (अथर्व.११.५.१७)

ब्रह्मचारो जनयन् ब्रह्माणो लोकं प्रजापतिं परमेष्टिनं विराजम्।

रार्भोभूत्वाऽमृतस्य योनातीन्द्रो भूत्वाऽसुरांस्ततई । (अथर्व.११.५.७)

इत्यत्र जितेन्द्रियत्वं सर्वोत्कृष्टगुणसम्पन्नत्वं दुश्चरित्रादिवारणं शिक्षायाः उद्देश्यं निरूप्यते। यया सर्वाङ्गीणा समुन्नतिः संजायते सा शिक्षा।

**भारतीयशिक्षापद्धत्याः गुणाः दोषाश्च**

साम्प्रतिकभारतीया शिक्षापद्धतिः वर्गादिभेदम् अनाश्रित्य सर्वजनसुलभेत्येव भारतीयशिक्षापद्धतेर्गुणः। अपरतो दोषश्चेत् लक्ष्यन्ते तर्हि शिक्षापद्धतीरियं विविधा साध्यरोगग्रस्ता।

तत्र प्रधानत्वेनोल्लेख्या दोषाः सन्ति–

1. आस्तिक्यं, धार्मिकता, चरित्रं, जितेन्द्रियत्वं, ब्रह्मचर्यसत्यभाषणादिगुणानाम् उपेक्षा।
2. स्वार्थबुद्धेः असंयमस्य, अनैतिकतायाश्चाप्रतिहतः प्रसारः।
3. शिक्षापद्धतेर्दोषात् परीक्षाणां दोषाकुलत्वम्।
4. परीक्षाविधेर्दूषिता प्रणाली।
5. उपाधीनाम् अवमूल्यम्।
6. वृत्तिप्रप्तिसमस्योत्पादनम्।
7. दूषितराजनीतेः प्रवेशः।
8. श्रमे श्रमसाध्येकार्येवाऽरूचिः।
9. शिक्षाया अर्थकरोत्वाभावः।

**शैक्षिकदृष्ट्याऽपेक्षिताः परिष्काराः**

**शैक्षिकस्तरोन्नयनम्**

शिक्षास्तरे सर्वतोऽवनतिरवलोक्यते। वैदेशिकशिक्षापद्धतिस्तरदृष्ट्या भारतीयशिक्षा स्तरे अवनतिरवलोक्यते। वैदेशिकशिक्षापद्धतिस्तरदृष्ट्या भारतीयशिक्षास्तरोऽवनततमो विज्ञायते। विशेषतश्च विज्ञानं, इञ्जिनियरिंग, मेडिकल, टेक्निकलविषयेषु । शिक्षास्तरोन्नयनं विना न शिक्षा श्रेयसे भवष्यति।

**शिक्षणपद्धतौ परिष्कारः**

वर्तमानशिक्षापद्धतौ न तथा विषयबोधे बलमाद्रीयते, यथा रटनपद्धतौ। विषये बोधम् अन्तरेण न तत्वार्थावगमः।

**परीक्षापद्धतौ परिष्कारः**

आमूलचूलं परिवर्तनं इष्यते। साम्प्रतिकी परीक्षापद्धतिर्योग्यतानिर्धारणं विहाय, येन केनापि प्रकारेण साधुना असाधुनावोपायेन परीक्षोत्तरणम्, तत्र च योग्यश्रेणीप्रापणं समर्थ्यते।

**शोधप्रवृत्युद्भावनम्**

छात्रेषु विषयान् प्रति स्वाभाविको अभिरुचिः उदीयात्, येन जीवने तत्वावगाहित्वं गम्भीराध्ययनं च सम्पद्येत। पल्लवग्राहिपाण्डित्यं न स्वकल्याणाय न च देशकल्याणाय सम्पत्स्यते।

**राष्ट्रियदृष्ट्याऽपेक्षिताः परिष्काराः**

**राजनीति निष्कासनम्**

छात्रसंघमाध्यमेन छात्रेषु राजनीतिरपेक्षते। अनिच्छन्नोऽपि छात्रा नेत्रवर्गेण विश्वविद्यालयेषु स्ववादप्रचारार्थं प्रेर्यन्ते, तदर्थं धनव्ययश्च विधीयते, एतत् सर्वथा गृहणीयम्।

**देशभक्तिभावोदयः**

छात्रेषु देशभक्तिभावोदयाय शिक्षानिर्देशकैर्न किञ्चिद् निर्दिश्यते । फलस्वरूपमधीतानां विद्यार्थिनां देशभक्तिभावना शून्या संलक्ष्यते।

**क्रीडादीनां सुव्यवस्था**

छात्राणां क्रीडाविषये नाभिरुचिर्जागर्यते । क्रीडायोग्यता विरहितं जीवनं निष्फलं निरर्थकं च।

**सामाजिकदृष्ट्याऽपेक्षिताः परिष्काराः**

**श्रममहत्वशिक्षणम्**

आधुनिकशिक्षायां शारीरिकश्रममहत्वं न शिक्ष्यते, न च प्रशस्यते। अतेव स्वावलम्बनभावोऽपि न जागर्ति। शारीरिकपरिश्रमे, क्षेत्रादिषु कार्यकरणे, स्वच्छताकार्यसम्पादने स्वयमेवावगन्तव्यं न च तत्र लज्जायाः किञ्चित् कारणम्। एवं महात्मनो गान्धेः सिद्धान्तम् अनुसृत्य श्रममहत्वं शिक्षणीयम्।

**जातीयदोषनिराकरणम्**

केचन विद्यालयः महाविद्यालयश्च ब्राह्मण–क्षत्रिय–वैश्यादिवर्गविशेषम् आश्रित्य सञ्चाल्यन्ते। एतत् सर्वथा दोषावहम्। सम्प्रदायभावनयापि प्रवर्तिता आंग्लयवनादिविद्यालयाः देशोन्नतौ बाधकाः, सम्प्रदायविषप्रवेशेन च आतन्वते।

**आर्थिकदृष्ट्याऽपेक्षिताः परिष्काराः**

**शिक्षाया अर्थकरोत्वम्**

शिक्षाया अर्थकरोत्वमनिवार्यम्। या अधीतानां जीविकानिर्वाहं वृत्तिव्यवस्थां च न साधयति, न सा शिक्षा श्रेयसे।

**विश्वविद्यालयेषु छात्रप्रवेषनियन्त्रणम्**

विश्वविद्यालयेषु ये अध्ययनरुचयः, व्युत्पन्नाः, विविधशास्त्रदक्षाः, ते एव प्रवेश्याः। तत्र च विषयविशेषज्ञानाम् अनुरुध्याध्यापनव्यवस्था स्यात्। केवलम् उपाधिप्राप्त्यर्थं छात्रप्रवेशो न स्यात् ।

**औद्योगिकं प्रशिक्षणम्**

विद्यालयेषु तथा औद्योगिकं यान्त्रिकं हस्तकलाविषयकं विविधकलाविषयकं शिक्षणं स्यात्। यथा कुटीरोद्योगे लघुद्योगे च छात्राणां ज्ञानम् उपयुज्यते। एवं वृत्तिसमस्या कथञ्चित् निराकर्तुं शक्यते।

**नैतिकदृष्ट्याऽपेक्षिताः परिष्काराः**

**आचारशिक्षा** – सत्यब्रह्मचर्यादि महत्त्वशिक्षणम् अनिवार्यं स्यात्। अन्तरेण नैतिकशिक्षां जीवनं पाशविकम् आसुरं च प्रवर्तते।

**भोगविलासितानिराकरणम्**

यथा यथा वर्धते विषयभोगः तथा तथा जीवनं दोषम् अन्वेति। विषय भोगेच्छा वृद्धिरघ्वछात्रेषु अनैतिकतायाः चारित्र्यभ्रंशस्य च मूलम् ।

**गुरुशिष्यसम्बन्धः**

गुरुशिष्याणां सम्बन्धस्तथाविधः स्याद् यथा द्वावेव अन्योन्यहितसम्पादनपूर्वकं सामञ्जस्यं सम्पादयेताम् । ''सहना नाववतु सह नौ भुनक्तु। सहवीर्यं करवावहै'' साम्प्रतं गुरुशिष्ययोर्न तथा सामञ्जस्यमिति चिन्त्यम्।

**सांस्कृतिकदृष्ट्याऽपेक्षिताः परिष्काराः**

**1. सांस्कृतिकदृष्टिः** –छात्रेषु सांस्कृतिकदृष्ट्या विकासः स्याद् येन धर्माभिरुचिः, चरित्रोन्नतौ अभिरुचिः, विविधनृत्यवादविवादकलासु प्रवृत्तिः, विनयादिगुणसमन्वयश्च स्यात्। सांस्कृतिकोन्नतिसम्पन्नैव शिक्षा श्रेयसे स्यात्।

**2. यन्त्रोपकरणत्यागः** – छात्राणां यन्त्रवत् सञ्चालनम् स्नेहसौहार्दादिगुणव्यपेतत्वात् तेषु प्रेमकरुणादिहितत्वं जनयति। न तादृशी शिक्षा श्रेयसे, लोकहिताय च।

## शिक्षा

✍ रजत सुयाल

अनुक्रमाङ्कः – 14

पाश्चात्यविदुषां मतानुसारेण प्रथमशिक्षाशास्त्री साक्रेटिसमहोदयः वर्तते । तस्मात् शिक्षाशास्त्रस्य प्रवर्तकः साक्रेटिस् इति कथ्यते । परन्तु भारतीयानाम् मतानुसारेण प्रथमः शिक्षाशास्त्री बुद्धमहोदयः आसीदित्यनुमीयते ।

**शिक्षा**

शिक्ष् विद्योपादाने धातोः निष्पन्नं रूपं शिक्षणम् अथवा अध्ययनम् इत्यर्थं द्योतयति । आङ्ग्लभाषायां Education इत्ययं शब्दः शिक्षायाः अर्थे प्रयुज्यमानः वर्तते । अयं शब्दः ल्याटिन् भाषायाः अधोलिखितमूलशब्देभ्यः निष्पन्नः वर्तते । यथा –

1. Educare

2. Educere

3. Educo

4. Educatm

* Educare – अस्य To bring up ( प्रवर्धनम् ) इत्यर्थः अर्थात् शिक्षया बालके वर्तमानानां समस्तशक्तीनां विकासः सम्पादनीयः इत्यर्थः ।

* Educere – अस्य To bring forth ( अग्रे नयनम् ) इत्यर्थः । अर्थात् शैक्षिकप्रतिक्रियाद्वारा बालकस्य पुरोगतिः सम्पादनीया इत्यर्थः ।

* Educo – अस्य To lead out ( बहिरानयनम् ) इत्यर्थः, अर्थात् बालके अन्तर्निहितरुपेण विद्यमानानां शक्तीनाम् बहिः प्रकाशनम् । शैक्षिकप्रतिक्रियाद्वरा सम्पादनीयमित्यर्थः ।

* Educatam – अस्य An act of teachining or training (अध्यापनकार्यम् अथवा प्रशिक्षणकार्यम् ) इत्यर्थः। अर्थात् शैक्षिकप्रक्रियाबोधनम् अथवा प्रशिक्षणं प्रचलति इत्यर्थः ।

शिक्षा नाम सा प्रक्रिया भवति यत्र सुव्यवस्थितरूपेण ज्ञानवितरणात्मकम् कार्यं प्रचलति । शिक्षा, विद्या, ज्ञानम् इत्यादयः शब्दाः प्राचीनभारते Education इत्यस्य कृते प्रयुक्ताः आसन् । तेनैव पराविद्या / आध्यात्मिकविद्या अपराविद्या / भौतिकविद्या इति भेदोऽपि दृश्यते ।

**शिक्षायाः लक्षणानि**

☞ शिक्षा आजीवनं प्रचलत् प्रक्रिया वर्तते ।

☞ शिक्षा व्यक्तेः समाजस्य च विकासम् सम्पादयति ।

☞ शिक्षा मानवव्यवहारं परिष्करोति ।

☞ शिक्षा उद्वेश्यपूर्णा प्रक्रिया वर्तते ।

☞ शिक्षा प्रशिक्षणं भवति ।

☞ जीवनमेव शिक्षा ।

☞ शिक्षा द्विमुखी प्रक्रिया वर्तते ।

**शिक्षायाः महत्वम्**

शिक्षायाः महिमवर्णनपराः श्लोकाः संस्कृतसाहित्ये यथेष्ठं समुपलभ्यन्ते । तद्यथा–

नक्षत्रभूषणं चन्द्रः नराणां भूषणं गुणः ।
पृथ्वीभूषणं राजा विद्या सर्वस्य भूषणम् ।।

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।

चेतः प्रसादयति दिक्षु तनोति कीर्तिं
किं किं न साधयति कल्पलतेव विद्या ।।

धनं धनं नैव मतो बुधानां
विद्येव वित्तं मतमस्ति तेषाम् ।
चोरो न यां चोरयितुं समर्थो
भूपोऽपहर्तुं न च यां समर्थः ।।

विद्या धनं श्रेष्ठधनं तन्मूलमितरद्धनम् ।
दानेन वर्धते नित्यं न भाराय च नीयते ।।

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानम् लब्ध्वा पराम् शान्तिमचिरेणाधिगच्छति ।।

सद्विद्या यदि का चिन्ता वराकोदर पूरेण ।
शुष्कोऽप्युष्णमाप्नोति रामरामेति च ब्रुवन् ।।

## शिक्षा एव आचार

✍ प्रवीणदेव शर्मा
अनुक्रमाङ्क – 15

सबसे पहले हमारे मन में ये प्रश्न होता है कि , शिक्षा क्या है ? हम शिक्षा क्यों ग्रहण करते है ? इस प्रश्न के उत्तर में हम कह सकते है कि ” शिक्षा “ शब्द का अर्थ है ” आचार “ जो हमें सिखाता है कि , समाज में रहते हुए समाज के मनुष्यों के साथ किस तरह से व्यवहार करना है । इसलिए मनुस्मृति में कहा है दृ ” आचारः परमो धर्मः घ“ अर्थात् आचार ही सबसे बडा धर्म है । आचार समाज में मनुष्यों की स्थापना करता है । इसलिए कहते है , जो भी विद्वान पुरुष है , उन्हें भी आचार सिखना चाहिए । शिक्षा शब्द का अर्थ यह नहीं है कि, पाठ्यक्रम में जो पुस्तकें है , उनके रहते परीक्षा में अच्छे अंक लेना । शिक्षा का उद्देश्य है –

1. उत्तम नागरिकों का निर्माण करना ।
2. सामाजिक परिष्कार ।
3. चरित्र निर्माण करना ।
4. आत्मानुभूति ।

इन सब की प्राप्ति तब ही हो सकती है , जब आचार अर्थात् व्यवहार अनुकूल हो ।

एक बालक का सर्वाङ्गीणविकास तभी हो सकता है । जब उसका चरित्र सही हो इसलिए एक श्लोक में कहा है –

एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिता ।
वासितं तद्वनं सर्वं पुत्रेण कुलं तथा ।।

अर्थात् घन–घोर वन में एक सुवृक्ष जिस समय पुष्पित होता है तो वन के चारों तरफ उसकी सुगन्ध फैल जाती है , वैसे ही आचार युक्त एक सुपुत्र फूल के समान इस संसार में सुगन्ध फैला देता है । ( वृक्ष ) इस पुष्प की सुगन्ध प्रवाहमान वायु के विपरीत दिशा में नहीं जा सकती है परन्तु आचार युक्त सुगन्ध इस संसार के चारों दिशाओं में फैल जाती है ।

स्वामीविवेकानन्द कहते है कि –

मान्वान्तर्निहितपूर्णतायाः अभिव्यक्तिरेव शिक्षा ।

इस कथन को वही समझ सकता है , जो आचारवान हो । उदाहरण के रूप में कह सकते है – हजारी प्रसाद द्विवेदी द्वारा लिखित " शिरीष का फूल " गद्याशं में कहते है कि शिरीष एक फूलों का पौधा है और यह फूल हिमालय के शिलास्तरों में जमता है । जब ग्रीष्मकाल आता है तो हिमालय के चारों तरफ प्रखर धूप के कारण पेड पौधे सुख जाते है , अर्थात् धूप इतनी प्रखर होती है कि, रहना बहुत ही कष्टदायक होता है । इस स्थिति में भी " शिरीष " के फूल खाद्यरुपी जल संग्रह करके पल्लवित और पुष्पित होकर उनकी सुगन्ध चारों दिशा में फैला जाती है । वैसे ही " शिक्षा या आचार " हमें यह ज्ञान देते है कि , किस स्थिति में हमें कैसे जीना चाहिए ।

## शिक्षादर्शनम्

✍ संजय भट्टः
अनुक्रमाङ्कः –16

**दर्शनशब्दस्यार्थः**

दर्शनशब्दस्तावद् 'दृश् दर्शने' इत्यस्माद्धातोः ल्युट् प्रत्यये कृते सति निष्पद्यते । अत्र दर्शनस्य दृश्यतेऽनेन इति व्युत्पत्तिं कुर्मः । नितान्तलौकिकदर्शने वास्तविकतायाः अन्वेषणं तस्याः व्याख्या एव दर्शनमस्ति । दर्शनशास्त्रे 'शासनात् शंसनात् चैव शास्त्रम् इत्यभिधीयते' इत्यनुसृत्य शास्त्रमित्यस्य व्याख्या क्रियते । अत्र शंसनमित्यस्य वर्णनमित्यर्थो भवति । पाश्चात्याः दर्शनशब्दस्योत्पत्तिः (Philosophy) ग्रीकभाषा (यूनानी philos, sophi) इति शब्दद्वयं मिलित्वा जाता

इति मन्यन्ते । अत्र philos इत्यस्यार्थोऽस्ति अनुरागः (Love) ophia इत्यस्य च ज्ञानं (0f wisdom) अर्थो भवति । उभयोः अर्थो भवति ज्ञानस्य अनुरागः (Love of wisdom) एतदनुसृत्य दार्शनिकः सोऽस्तिः यः सत्यस्य अन्वेषणं करोति ज्ञानं प्राप्तुमिच्छति तथा पठनाय सदैव सन्नद्धः भवति । अत्र दर्शनशब्दस्यार्थविषये प्राच्यापाश्चात्योर्मध्ये मतविभिन्नता विद्यते । प्राच्यास्तु दर्शनमेकं शास्त्रत्वेन स्वीकुर्वन्ति । परञ्चात्र शिक्षाशास्त्रिणः दर्शनं शास्त्रत्वेन नाऽङ्गीकुर्वन्ति । अत्रैतदपि ध्यातव्यं यद् दार्शनिकाः शिक्षाशास्त्रं शास्त्ररूपेण न स्वीकुर्वन्ति । अत्र शास्त्रमित्यस्य व्याख्या आवश्यकी । शास् अनुशिष्टौ शास्ति अनेनेति शास्त्रम् । शास्त्रं कर्तव्याकर्तव्यविषये मानवं शास्ति । यद्यत्र शास्त्रं न भवेत् तर्हि वयं संयमरहिताः भवामः । सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः इत्यादि प्रकारेण शास्त्रम् अस्मान् शास्ति । पुनश्चात्र प्राच्याः दर्शनं अनूभूतिविषयः इति निगदन्ति । जिज्ञासावसरे दर्शनस्य कार्यं भवति अनुभवेन ज्ञानान्वेषणमिति । पाश्चात्याश्चात्र दर्शनं ज्ञानत्वेन स्वीकृतवन्तः । तेषाङ्कृते दर्शनन्तावद् ज्ञानात्मकान्वेषणं भवति । परञ्च वयमात्मानं उच्चकोटौ स्थापयामः । अतः अनयोर्मध्ये महान् भेदो दृश्यते ।

**प्राच्यानां मते दर्शनस्य परिभाषा**

डा. राधाकृष्णनमतमनुसृत्य – दर्शनन्तु वास्तविकतायाः स्वरूपस्य तार्किकविवेचनं विद्यते । आदिगुरुशङ्कराचार्यः, दयानन्दसरस्वती, महात्मा गान्धी, डा. सर्वपल्ली राधाकृष्णन् इत्यादयः श्रेष्ठाः दार्शनिकाः आसन् ।

प्लेटो महोदयानुसारम् – पदार्थानां सनातनस्वरूपज्ञानप्राप्तिरेव दर्शनम् ।

अरस्तुमहाशयमनुसृत्य – दर्शनं तादृशं विज्ञानमस्ति यत्र परं तत्वस्य यथार्थस्वरूपस्य परीक्षणं भवति । उक्तपरिप्रेक्ष्ये वयं दर्शनस्य परिभाषां कर्तुं शक्नुमः । दर्शनं प्रकृति–व्यक्ति–वस्तूनां अपि च तल्लोक्ष्योद्देश्यानां च विषये निरन्तरविचारं करोति । ये जनाः उक्तविषये किमपि वक्तुमर्हन्ति ते एव दार्शनिकाः उच्यन्ते । दर्शनस्य विषयक्षेत्रेषु आत्मसम्बन्धिज्ञानं ईश्वरसम्बन्धिज्ञानम्, सृष्टिशास्त्रम्, सत्ताविज्ञानम्, तर्कशास्त्रमित्यादि विषयाः समायान्ति ।

**शिक्षादर्शनस्वरूपम्**

साम्प्रतिके युगे दर्शनस्यार्थः व्यापको जातः । अस्य क्षेत्रमतिविस्तृतमस्ति । एतदर्थमद्य अस्माकं समक्षे आध्यात्मिकदर्शनं, नैतिकदर्शनम् (Moral philosophy) एव न तु अपितु सामाजिकदर्शनम् (Social philosophy) आर्थिकदर्शनम् (Economic philosophy) शिक्षादर्शनम् (Educational philosophy) आदि विषयाः अपि समागच्छन्ति । उक्तविषये शिक्षादर्शनं प्रतिपादयन् कनिंघममहोदयः लिखितवान् यत् प्रथमतः दर्शनं सर्वेषां वस्तूनां विज्ञानमस्ति । इत्थं शिक्षादर्शने दर्शनं शिक्षायाः समस्याः स्वमुख्यरूपेण पश्यति । इत्थमत्र वक्तुं शक्नुमो यद् शिक्षादर्शनं दर्शनशास्त्रवदेव विषय एकोऽस्ति यच्छिक्षागतगहनसमस्यानां समाधानं दार्शनिकदृष्ट्या करोति ।

**शिक्षादर्शनस्य परिभाषा**

जान ड्यूवीमहोदयमनुसृत्य – दर्शनं स्वीयसामान्यमते रूपे शिक्षा सिद्धान्त एवास्ति ।

हर्वर्टस्पेन्सरमतमनुसृत्य – वास्तविकशिक्षायाः सञ्चालनं वास्तविकदार्शनिकाः एव कर्तुं शक्नुवन्ति।

हेण्डरसनमतमवलम्ब्य – शिक्षादर्शनन्तु शिक्षायाः समस्थानं अध्ययने दर्शनस्य प्रयोगो भवति ।

**दर्शनशिक्षयोस्सम्बन्धः**

**शैक्षिकसिद्धान्तः**

**1. दार्शनिकविचाराणां व्यावहारिकप्रयोगः** – प्रत्येकं जीवनदर्शनम् एकस्य विश्वासस्योपरि आधारितं भवति । यदि विश्वासोऽयं जीवनाय उपयोगी वा आवश्यकोऽस्ति तर्हि तस्य शैक्षिकमहत्वमपि अवश्यमेव भवितव्यम् । दर्शनशिक्षयोर्मध्ये घनिष्ठसम्बन्धोऽस्ति । यत्र वयमितिहासं पश्यामस्तर्हि प्लेटो, लाक, काण्ट, स्पेन्सर इत्यादीनां दार्शनिकानां शैक्षिकसिद्धान्तः तद्दार्शनिकसिद्धान्तानां व्यावहारिकप्रयोगः आसीत् ।

**2. दर्शनेन जीवने शिक्षामहत्वस्यान्वेषणम्** – दर्शने नवीन तथ्यानि न भवन्ति । शास्त्रमिदं केवलं तेषामेव तथ्यानामन्वेषणं करोति यानि पूर्वस्थापितानि सन्ति । इदमस्माकं शैक्षिकमहत्वं तस्मिन्नेव रूपे स्वीकरोति यस्मिन् रूपे तद् भवति ।

**3. दर्शनशिक्षयोः पारस्पारिकनिर्भरता** – दर्शनशिक्षयोः घनिष्ठसम्बन्धोऽस्ति । एतयोः पारस्पारिकनिर्भरता अस्ति। दर्शनं शिक्षां प्रभावयति , अपि च शिक्षा दार्शनिकदृष्टिकोणे नियन्त्रणं स्थापयति । इदमेव कारणमस्ति यद् विश्वस्य महान्तः शिक्षाशास्त्रिणः सर्वे महान्तः दार्शनिकाः अपि अभवन् । अत्र जी.ई. पार्ट्रिजमहोदयो भणति अत्यन्तगभीरार्थे इदम्मतं समीचीनमेव यद् यदा शिक्षा दर्शनाधारिता अस्ति तथैव दर्शनमपि शिक्षाधारितं विद्यते ।

**दार्शनिकदृष्टिकोणस्य वैशिष्ट्यम्**

**1. विस्मयस्य भावना** (Sense of wonder) – दार्शनिकव्यक्तिः सा एव भवति या स्वं परितः प्राकृतिकघटनानाम् अवलोकनम् आश्चर्येण करोति एवञ्च तेषां मूलकारणानाम् अन्वेषणं करोति ।

**2. सन्देहः** (Doubt) – दार्शनिकाः प्रत्येकं वस्तुनः मूलकारणान्वेषणाय प्रत्येकं वस्तु सन्देहात्मकदृष्ट्या पश्यन्ति।

**3. मीमांसा** (Criticism) – दार्शनिकाः किमपि वस्तु यथावन्न प्राप्नुवन्ति अपितु तेषां मीमांसा (मन्थनं) कृत्वा एव मान्यतां प्रददति ।

**4. चिन्तनम्** (Reflection) – मीमांसायाः कृते चिन्तनस्यावश्यकता भवति । अतः दार्शनिकदृष्टिः चिन्तशीला भवति।

**5. तटस्थता** (Detachment) – दार्शनिकाः अन्धविश्वासिनो न भवन्ति । तटस्थदृष्ट्या कस्यचित् प्रश्नस्य समाधानं प्राप्नुवन्ति इति ।

# स्वामिदयानन्दसरस्वतिमहोदयानां शिक्षादर्शनम्

✍ ब्रह्मानन्दः

अनुक्रमाङ्कः – 17

## शिक्षादर्शनम्

वैदिकधर्ममाश्रित्य शिक्षाविषये स्वविचारान् सः प्रकटयामास । सः शिक्षाव्यवस्थाम् आश्रमधर्मे निवेशितवान्। शिक्षायाः पञ्च लक्षणानि उक्तानि – विद्याप्रदानम्, सभ्यतासम्पादनम्, धर्मात्मसम्पादनम्, जितेन्द्रियत्वसम्पादनं, विद्यया मुक्तिपथगमनम् इति । स्वरचितव्यवहारभानुनामके ग्रन्थे लिलेख " अविद्यादि अशुभगुणामां परित्यागपूर्वकं विद्यादिशुभगुणान् स्वीकृत्य सदानन्दमयजीवनयापनं भवति शिक्षा । अविद्यया वशीभूतः सन् मनुष्यः अनित्यं नित्यं इति, अपवित्रं पवित्रमिति मनुते । अतः एव विद्या आश्रयणीया येन नित्यानित्यशुभाशुभसत्यासत्यविषयकभेदज्ञानं जायेत । तदर्थं वेदः उपास्यः, कारणं वेदः सर्वासां सद्विद्यानाम् आकरः । वेदस्य पठनम् अध्ययनम् अध्यापनञ्च सर्वेषामार्याणां परमो धर्मो वर्तते इति स्पष्टयत्येदम् आर्यसमाजस्य दशनियमाः । ते अवदन् – हे मनुष्य ! विरोधं विहाय परस्परं संगता भवत येन युष्माकमुत्तमं सुखं सर्वदा वर्धेत सर्वदुःखनाशश्च भवेत्, संगता भूत्वा परस्परं जल्पवितण्डादिविरुद्धवादं विहाय संप्रीत्या प्रश्नोत्तरविधानेन संवादं कुरुत, यतो युष्मासु सम्यक् सत्यविद्याद्युत्तमगुणाः सदा वर्धेरन् यूयं जानन्तो विज्ञानवन्तो भवत जानतां वो युष्माकं मनांसि यथा ज्ञानवन्ति भवेयुस्तथा सम्यक् पुरुषार्थं कुरुत , अर्थाद्येन युष्माकं मनांसि सदानन्दयुक्तानि स्युस्तथा प्रयतस्वमिति । तत्रैव ते पुनः कार्यसिध्यर्थं समादिशन् । असत्यं मा वद अन्यायं मा चर वेदोक्ताविषयः प्रमाणितः भवति, तदेव अनुसरणीयम् । तत्रैव स्वकीयं चित्तं स्थापनीयम् इति तेषां वचनम् । शिक्षादर्शनस्याधारभूताः दशसिद्धान्ताः सन्ति । यथा –

1. पञ्चमे वर्षे बालकस्य, अष्टमे वर्षे बालिकायाः शिक्षारम्भः करणीयः ।

2. बालकस्य बालिकायाः च कृते शिक्षा – संस्था नगरात् बहुदूरे, एकान्तस्थले तथा उभयेषाम् एकयोजनान्तरेण भवेत्।

3. बालकानां शिक्षासंस्थायां सर्वेऽपि कर्मकराः शिक्षकाः च पुरुषाः भवेयुः, बालिकानां शिक्षासंस्थायां सर्वाः अपि कर्मकाराः स्त्रियः भवेयुः ।

4. शिक्षया यथा बालकस्य नैतिकं, बौद्धिकं, अध्यात्मिकं, शारीरिकं च विकासः क्रियते तथा बालिकायाः अपि भवेत्।

5. उभयेषां ब्रह्मचर्यव्रतपालनम् अनिवार्यमासीत् ।

6. उभयेषां दैनिकहोमः ईश्वरप्रार्थना, प्राणयामः, व्यायामः च अनिवार्यः आसीत् ।

7. शिक्षया बालकाः बालिकाश्च मातृदेवो भव, पितृदेवो भव, आचार्यदेवोभव इत्यादिगुणैः उद्बुद्धाः भवेयुः ।

8. उभयेषां निष्ठा, आत्मत्यागभावना, आत्मसन्तोषभावना च जागरणीया ।

9. अनुशासनपूर्णजीवनेन सहनशक्तेः विकासः कथं करणीयः इति विषये उभयेषां शिक्षणं भवति

10. शिक्षाप्राप्त्यर्थं सर्वेऽपि मनुष्याः अर्हाः भवन्ति तत्र जातिगुणवर्णानां भेदः न कल्पनीयः ।

## शिक्षामनोविज्ञानस्य अर्थः

✍ कार्तिक साहु

अनुक्रमाङ्कः – 18

अत्र आदौ प्रश्नः भवेत् का नाम शिक्षा इति । उत्तरम् आयाति। (शिक्ष) विद्योपादाने धातोः निष्पन्नः शिक्षा इति शब्दः । शिक्षते अनया सा एव शिक्षा । अधिगमः ज्ञानप्राप्तिर्वा शिक्षा ।

**महापुरुषाणां परिभाषाः**

1. स्वस्थे शरीरे स्वस्थमनसः निर्माणमेव शिक्षा इति । - Aristotle.

2. बालकस्य आन्तरिकविकास एव शिक्षा इति । - Rousseau.

3. मानवान्तर्निहितपूर्णतायाः अभिव्यक्तिरेव शिक्षा इति – Swami Vivekananda ।

शिक्षामनोविज्ञानं शब्दद्वयेन निर्मितमस्ति । शिक्षा–मनोविज्ञानञ्च । शिक्षा शब्दस्य अर्थः अस्ति मानवस्य सर्वाङ्गीणविकासः । मनोविज्ञानस्य अर्थः अस्ति मस्तिष्कस्य विज्ञानम् ।

मनोविज्ञानशास्त्रं हि पुरातनं शास्त्रं विद्यते । इदं शास्त्रमादौ दर्शनशास्त्रेण सम्बद्धमासीत्। आरम्भे आत्मविज्ञानं चैतन्यविज्ञानं मस्तिष्कविज्ञानञ्चेति रूपेण स्वीकृतं शास्त्रं कालान्तरे व्यवहारविज्ञानमिति पदं प्राप्नोत् ।

आंग्लभाषायां मनोविज्ञानस्य कृते "PSYCHOLOGY" इति उच्यते । एषः शब्दः यूनानि शब्देन निसृतः । PSYCHOLOGY शब्दः निर्मितः (PSYCHO + LOGOS) शब्दस्य अर्थः अस्ति "आत्मा" (LOGOS) इति शब्दस्य अर्थः अस्ति अध्ययनमिति । अतः (PCYCHOLOGY) इति शब्दस्य अर्थः अस्ति "आत्मनः अध्ययनम्" "शिक्षायाः क्षेत्रे मनोविज्ञानस्य प्रयोगः एव शिक्षामनोविज्ञानमिति" । शिक्षामनोविज्ञानं

मनोवैज्ञानिकं ज्ञानमस्ति यत् शिक्षासम्बद्धसमस्यानां विवेचनम्, विश्लेषणं, समाधानं च प्रस्तौति । विंशतिशताब्द्यां गहनाध्ययनमभवत् । मनोविज्ञानं अस्मान् बोधयति यत् बालकस्य आवश्यकताः युवाप्रौढेभ्यः भिन्नाः भवन्ति । अतः बालकस्य शिक्षा तस्य आवश्यकतानाम् अनुकूला भवेत्। शिक्षा व्यक्तीनां व्यवहारपरिर्वतनं करोति । मनोविज्ञानस्य सम्बन्धः अस्य एव व्यवहारिकपरिर्वतनेभ्यः अस्ति यत् व्यक्तिषु शिक्षायाः माध्यमेन आगच्छति अतः शिक्षामनोविज्ञानयोर्मध्ये घनिष्ठसम्बन्धः वर्तते । मनोविज्ञानस्य ज्ञानं विना सफलशिक्षणं सम्यक् सम्भवं नास्ति । मनोविज्ञानं मानवस्य व्यवहारस्य अध्ययनं करोति" इति वाटसन् महोदयेन उक्तम् । मनोविज्ञानेन मानवस्वाभावस्य ज्ञानं प्राप्य अध्यापकः बालकेभ्यः उचितनिर्देशं ददाति । शिक्षा बालकस्य व्यवहारस्य परिष्कारं करोति । इदानीं शिक्षायाः उद्देश्यं बालकस्य भविष्यस्य निर्माणम् अस्ति । बालकस्य जीवनस्य प्रत्येकावस्थायां तस्याभिवर्धने विकासे च सहयोगं करणीयमस्ति । शिक्षा सामाजिकप्रक्रियायाः एका स्थितिरस्ति, यस्या उद्देश्यं समाजस्य जनान् आजीवनं स्वस्य वर्गे निवसनार्थं योग्यान् करणीयमस्ति । अतः शिक्षायाः उद्देश्यं व्यक्तेः योग्यतानां विकासोऽस्ति । मनोविज्ञानस्य उद्देश्यं मानवव्यवहाराणामध्यनं अस्ति ।

❋ ❋ ❋

## सम्प्रेषणस्य प्रकाराः

✍ कमलिनी पधान

अनुक्रमाङ्कः– 19

सम्प्रेषणं नाम प्रेषकात् ग्राहकाय तस्य विचारस्य अथवा भावनायाः आदानप्रदानं वर्तते। यञ्च विचारम् आहोस्वित् भावं ग्राहकः परिज्ञातुं शक्नोति। सम्प्रेषणस्य चत्वारि अङ्गानि।

1. प्रेषकः
2. ग्राहकः
3. विषयः
4. माध्यमः

सम्प्रेषणम् इति आङ्ग्लभाषयां साईबरनेटिक (Cybernetic) इति शब्दः यूनानीभाषायाः काईबरनेटिके (Kybernetike) इति शब्दात् स्वीकृतः वर्तते। यस्य अर्थः शासनमिति। सम्प्रेषणं मानवव्यवहारं नियन्त्रयति सञ्चालयति च। या स्वीयक्रियाः स्वतः उत्पाद्य ताः क्रियाः प्रेरकरूपेण

वातावरणमाध्यमेन वा नियन्त्रयति। प्रतिपुष्टेः प्रविधयः छात्राणां व्यवहारिकपरिवर्तनं कुर्वन्ति। छात्राणां शिक्षणाधिगमवेलायाम् अनुक्रियाः प्रतिपुष्टेः कार्यं निर्वहन्ति नवीनज्ञानं च प्रयच्छन्ति।

सम्प्रेषणस्य सहाय्येन छात्राध्यापकेषु शिक्षणकौशलस्य विकासः कार्यते। सम्प्रेषणशिक्षणाय यथार्थाधारं प्रयच्छति। सम्प्रेषणमाध्यमेन प्रत्येकं छात्रः स्वीयक्षमतायाः योग्यताश्च आधारेण अधिगमं प्राप्तुं शक्नुयात्। छात्रेभ्यः अध्ययनकाले निरन्तरं प्रतिपुष्टिप्रदानं क्रियते, येन छात्रस्य अधिगमक्रिया तीव्रा भवेत्।

विचाराणां भावनां च परस्परं वितरणमेव सम्प्रेषणमिति Delus महोदयोऽब्रवीत्। द्वीतीयविश्वयुद्धानन्तरं स्मिथ एवं स्मिथ महोदयः सम्प्रेषणस्य विचारधारायाः प्रवर्तक इत्यङ्गीक्रियते। सम्प्रेषणस्य प्रकाराः एवं दर्शयितुं शक्यन्ते। तद्यथा –

क. शाब्दिकसम्प्रेषणम्

ख. अशाब्दिकसम्प्रेषणम्

**शाब्दिकसम्प्रेषणम्**

शाब्दिकसम्प्रेषणं मौखिकसम्प्रेषणं लिखितसम्प्रेषणं चेति द्विधा विभक्तुं शक्यते। शाब्दिकसम्प्रेषणे सर्वदा भाषायाः प्रयोगः क्रियते। एतत् सम्प्रेषणं मौखिकरूपेण, वाचा, लिखितरूपेण शब्दैः सङ्केतैः वा विचाराः भावनाः वा ग्राहकस्य समक्षं प्रस्तोतुं प्रयुज्यते।

## I. मौखिकसम्प्रेषणम्

मौखिकसम्प्रेषणे मौखिकरूपेण वाचा तथ्यानां भावानां, सूचनानां परस्परं विनिमयः क्रियते। तस्मिन् सन्देशस्य प्रेषकग्राहकहावभावऽपि परस्परं सम्मुखिनौ भवतः। सम्प्रेषणेस्मिन् वार्ता, व्याख्या, सामुहिकचर्चागोष्ठी, प्रश्नोत्तरं, कथनोपकथनम् इत्यादिमाध्यमैः विचाराणामभिव्यक्तिः क्रियते।

## II. लिखितसम्प्रेषणम्

अत्र सन्देशस्य सम्प्रेषकसङ्ग्राहकयोः परस्पराभिमुखत्वं नापेक्षितम्। अत्र सन्देशप्रेषकः लिखितरूपेण शब्दैः सङ्केतैः वा सन्देशं प्रदातुमर्हति। येन सङ्ग्राहकः प्रेषकस्य भावमवगन्तुं शक्नुयात्। लिखितसम्प्रेषणे सन्देशस्य समुचितार्थग्रहणार्थं लिखितभाषा सरला, बोधगम्या, स्पष्टा च स्यात् येन क्लेशं श्रमं च विना ग्राहकः अवगन्तुं शक्नोति। अत्र सन्देशः समुचितरूपेण, उचितशब्दैः लघुपदैः प्रभावविधिना च प्रस्तूयते।

**अशाब्दिकसम्प्रेषणम्**

अशाब्दिकसम्प्रेषणे भाषायाः प्रयोगः न भवति। अत्र वाक्सङ्केतः चक्षुहस्तादिसङ्केतः इत्यादयः प्रमुखसम्प्रेषणानि भवन्ति।

**I. वाक्सङ्केतः**

वाक्सङ्केतात्मके सम्प्रेषणे विचाराणां भावनां च अभिव्यक्तिः वैयक्तिकरूपेण लघुसमूहेषु वा परस्पराभिमुखत्वेनैव वाचा क्रियते। उदाहरणार्थं वार्तालापसमये आं, न, अस्तु, इत्यादि कथनम्। मुखेनैव केनचित् शब्देन स्मितहास्येन, चीत्कारादिबहुविधभावैः वाक्सङ्केतैः क्रियते।

**II. चक्ष्वादिमुखसङ्केतः**

वैयक्तिकसम्प्रेषणे चक्षुसङ्केतेन मुखमुद्राप्रदर्शनेन च जायमानसम्प्रेषणम् अत्यन्तं प्रभावि इत्युच्यते। कक्ष्यायां चक्षुसङ्केतेन शिक्षकः छात्राणां मानसिकी स्थितिम् अवगन्तुं शक्नोति। संवेगात्मकस्थितेः अभिव्यक्तौ छात्राणां मुखमुद्रा अत्यन्तं प्रमुखा भवति। मुखमुद्रामाध्यमेन प्रसन्नता, भयं, क्रोधः, आश्चर्यं सम्प्रेषणानि अत्यन्तसरलतया कर्तुं शक्यन्ते। मूकबधिराणां कृते एतत् सम्प्रेषणम् अत्युत्तमोपयोगी वर्तते ।

**III. स्पर्शमाध्यमेन सम्प्रेषणम्**

एतस्मिन् सम्प्रेषणे स्पर्श एव सम्पेषणस्य प्रमुखमाध्यमं भवति। स्पर्शमाध्यमेन व्यक्तिः स्वभावानां विचारान् अभिव्यञ्जयितुं समर्थो भवति। परस्परहस्तमेलनेन व्यक्तिः मित्रतायाः भावः इति ज्ञातुं शक्नोति। मातुः स्पर्शमात्रेणैव रुदन् शिशुः तूष्णीं भवति। स्नेहसम्मितमेकं चुम्बनम् अनेकेषां भावनानां सवेदानानां, विचाराणाम् अभिव्यक्तेः एकं महत्वपूर्णं साधनं भवति। नेत्रहीनछात्राणां कृते स्पर्शात्मकसम्प्रेषणं प्रमुखः भवति।

सम्प्रेषणप्रणालि, परिकल्पनायाः माध्यमेन प्रदत्तान्तःक्रियायाः प्रक्रियायाः बहिः क्षेपस्य च क्रियाविश्लेषणं कृत्वा वैज्ञानिकविधिना व्यवस्थापयति ।

# आधुनिकशिक्षायां शिक्षाधिगमयोः प्रक्रिया

✍ शुभस्मिता साहु

अनुक्रमाङ्कः – 20

शिक्षामनोविज्ञानम् अधिगमस्य मनोविज्ञानम् वर्तते। अधिगमो नाम मनोवैज्ञानिकी प्रक्रिया या कस्यामपि शिक्षाप्रणाल्यां महत्वपूर्णं स्थानं धत्ते। प्रयोगैः अनुसन्धानैश्च इदं प्रतिपादितं यत् अधिगमप्रक्रिया सरला न प्रत्युत जटिला प्रक्रिया वर्तते।

**अधिगमस्य अर्थः**

अधिगमशब्दः अधिगमप्रकियां तत्परिमाणं चापि अभिप्रैति। प्रक्रिययाः रूपे अधिगमः अधिगमस्य अनुभवान्, तस्य अन्तर्बाह्यक्रियाः तदीयान् परिस्थितिं च उल्लिखति। तत्र अधिगमप्रक्रियायाः

परिणामः व्यवहारपरिवर्तनम् इत्याभिधीयन्ते । इत्थम् अधिगमस्य अर्थो वर्तते व्यवहारपरिवर्तनम् । इदं व्यवहारपरिवर्तनम् अनुभवेन, प्रशिक्षणेन वा आनीयते।

**अधिगमस्य परिभाषाः**

गेटस् – अनुभवप्रशिक्षणाभ्यां सम्पादितं व्यवहारपरिवर्तनम् अधिगमः इति कथ्यते।

वुड्वर्थ – अभिनवं ज्ञानम् अभिनवा अनुक्रियाश्च अर्जितुं प्रवर्त्यमाना प्रक्रिया अधिगमप्रक्रिया भवति।

स्किन्नर – व्यवहारे उत्तरोत्तरं सामञ्जस्य प्रक्रिया अधिगमः इति उच्चते।

क्रो एवं क्रो – अधिगमः स्वभावस्य, ज्ञानस्य अभिवृत्तीनां चार्जनं वर्तते।

पावलोव – अनुकूलितानाम् अनुक्रियाणां परिणामत्वात् स्वाभावनिर्माणमेव अधिगमो वर्तते।

**अधिगमस्य नियमाः**

अधिगमस्य नियमा अधिगमस्य सिद्दान्तानां प्रमुखेभ्यस्त्रिभ्यः समूहेभ्यो विकासं अवाप्नुवन् । ते नियमाः सन्ति –

**उद्दीपनानुक्रियासिद्धान्ताधारितनियमाः**

1. सक्रियोऽधिगमः अधिकः प्रभावशाली भवति ।
2. अधिगमस्य पुनरावृत्तिः महत्वपूर्णा भवति । अयमेव अभ्यासस्य नियमः उच्चते ।
3. अधिगमे पुनर्बलनं महत्वपूर्णम् । अभीष्टव्यवहाराय च ऋणात्मकं पुनर्बलनं अपेक्षितिम् ।
4. नूतनव्यवहारम् अधिगन्तुं छात्राः समधिकं रुचिमन्तो भवन्ति । अतः ते अनुकरणेन शीघ्रम् अधिगच्छन्ति ।
5. आवश्यकतानां परितुष्टया छात्राः शीघ्रं शिक्षन्ते यतोहि आवश्यकताः आततिं (Tension) जनयन्ति छात्राश्च आततिं न्यूनयितुम् इच्छन्ति ।

**अन्तर्दृष्टिसिद्धान्ताधारितनियमाः**

1. शिक्षकपक्षतो ज्ञानस्य सङ्घटनं परमावश्यकम् ।
2. बोधगम्यतासहितोऽधिगमः अधिकः स्थायी भवति।
3. यथार्थज्ञानस्य पुष्टिः ज्ञानात्मिकां प्रतिदृष्टिं प्रददाति ।
4. छात्राय निर्धारितानि लक्ष्यानि छात्रम् अधिगमाय अभिप्रेरयन्ति ।

**अभिप्रेरणाव्यक्तित्वसिद्धान्ताधारितनियमाः**

1. अधिगमे छात्राणाम् योग्यता महत्वपूर्णं कार्यं सम्पादयन्ति ।

2. वंशानुक्रमोऽपि छात्रस्य विकासे महत्वपूर्णं भागमावहति ।

3. अधिगमप्रक्रियायै छात्रस्य उत्सुकतायाः स्तरस्य निर्धारणं करणीयम् ।

4. प्रतिछात्रं प्रेरकघटकानि अन्येभ्यो भिन्नानि भवन्ति ।

5. छात्रस्य प्रेरकाणां मूल्यानां च सङ्घटनमपि महत्वपूर्णं भवति ।

6. सामूहिकं वातावरणं अपि अधिगमप्रिक्रियायै महत्वपूर्णं भवति ।

**अधिगमस्य विशेषताः**

अर्वाचीनमनोवैज्ञानिका अधिगमस्य अधोलिखितान् विशेषान् वर्णयन्ति।

**1. अधिगमः काचन अभिवृद्धिः वर्तते** – अधिगमो बालस्य वातावरणेन सम्बन्धं ज्ञानं अभिवर्धयति । यावदभीष्ट वातावरणं स्यात् । तदनुरूपेण व्यक्तेः अभिवृद्धिः जायते । अतः प्रभावशीलाय अधिगमाय सम्पन्नं वातावरणं अपेक्षितम्, यस्मिन् छात्रोऽभीष्टान् अनुभवान् प्राप्नुयात् ।

**2. अधिगमः समायोजनं वर्तते** – अधिगमव्दारा व्यक्तिः समाजे तदीयं समायोजनं विभिन्नरीत्या विदधाति । गूढः सामाजिकाः सम्बन्धः सद्भावेन जीवनं यापयितुम् समायोजनं अपेक्षन्ते ।

**3. अधिगमः अनुभवानां सङ्घटनं वर्तते** – मानवः स्वानुभवस्य लाभमादर्तुं क्षमते । एतदर्थं तस्मै स्वानुभवानां विश्लेषणाय अवसराः कल्प्यते चेत् स तेषां अभिप्रायं विज्ञाय तदालोके व्यवहारान् आचरणं च परिष्कर्तुं शक्नुयात्।

**4. शिक्षणं सोद्देश्यं भवति** – सोद्देश्यः अधिगम एव समधिकः प्रभावशाली भवति । उद्देश्यविहीनः अधिगमः अस्थायी लाभरहितश्च भवति ।

**5. अधिगमः बुद्धिपूर्णः सर्जनात्मकश्च भवति** – अधिगमस्य यान्त्रिकः सिद्धान्त उचितो न प्रतीयते । वस्तुतो लघु लघु कार्येषु अपि बुद्धेः कश्चन उपयोगस्तु भवति खलु । अधिगमेन पुरातनविचारेभ्यः अभिनवानां विचाराणां सृष्टिः भवति । तेन व्यक्तिः परिस्थितिं रूपान्तरितां करोति आत्मानमपि तदनुगुणं रूपान्तरं प्राप्नोति ।

**6. अधिगमः सक्रियो भवति** – सक्रियो अधिगमः उद्देश्यपूर्णः भवति ।

**7. अधिगमो वातावरणात् उत्पद्यते** – अधिगमः वातवारणे एवाश्रितो भवति । वातावरणस्य भिन्नः स्थितयो मानवं प्रभावयन्ति । मानवस्य प्रतिक्रियासु अनुभवाधारेण परिवर्तनं जायते ।

**8. वास्तविकोऽधिगमः अधिगामकस्य आचरणं प्रभावयति** – वास्तविकोऽधिगमो नाम जीवने अनुकूलनस्य क्षमता । सम्प्रति वास्तविकोऽधिगमः तादृशं अधिगमं अभिप्रैति यो व्यक्तेः आचरणे सकारात्मकं प्रभावं जनयेत् ।

# प्रणाली उपागमः

✍ रामचन्द्रः

अनुक्रमाङ्कः –21

प्रणाली उपागमः इत्यस्य शब्दस्य तात्पर्यमस्ति यत् केषाञ्चित् घटनानां प्रक्रियाभ्यः समग्रावलोकनम् । प्रणाली उपागमस्य उद्भवः उद्योगः, प्रबन्धः, प्रतिरक्षादीनां समस्यानां निराकरणाय अभवत् । अस्य विकासः द्वितीय विश्वयुद्धस्य काले अभवत् । प्रणाली उपागमस्यान्तर्गते प्रणालीविश्लेषणम्, प्रणालीविकासः, प्रणालीमूल्याङ्कनं च सम्मिलितानि वर्तन्ते । 1960 तः प्रारभ्य प्रणाली उपागमस्य प्रयोगः सामाजिकविज्ञानस्य प्रयोगः वर्तते । प्रणाली उपागमस्य प्रयोगः शिक्षायाः विभिन्नक्षेत्रेषु अपि क्रियते । यद्यपि शिक्षाक्षेत्रे गणितीयप्रक्रियायाः अभावः तथापि प्रणाली उपागमः शैक्षिकसमस्यानां निराकरणे समग्रदृष्ट्या विकासं करोति ।

## अर्थः विशेषता च

प्रणाली उपागमस्य विकासः वैज्ञानिकज्ञानस्य क्षेत्रे समस्यानां निराकरणं कर्तुं विधिरूपेण अभवत्। अभियान्त्रिकप्रौद्योगिक्या क्षेत्रे साफल्यानन्तरं शिक्षायाम् अपि सिस्टम् एप्रौच इत्यस्य प्रायोगिकरुपेणाभवत् । प्रणाली शब्दस्याभिप्राय एका क्रमबद्धव्यवस्था भवति । शिक्षा शब्दकोषानुसारम्–

system is an assembling of objects united by some from of regular interaction or interdependence, and organic or organized whole, as the solar system or new telegraph system .

## प्रणाल्या अर्थः

विभिन्ननियमानां, तर्काणाम् आधारेण अन्तनिर्भरं सम्बन्धेभ्यः भवति । कस्याश्चित् प्रणाल्याः चतस्रः मुख्याः विशेषताः भवन्ति ।

1. प्रणाल्यां निश्चितानि उद्देश्यानि लक्ष्याणि च भवन्ति येषां प्राप्तिः करणीया भवति ।
2. प्रणाल्यां नैके भागाः भवन्ति ।
3. एते भागाः परस्परम् अन्तःक्रियां कुर्वन्ति अन्तनिर्भराः च सन्ति ।
4. प्रणाल्याम् उद्देश्यप्राप्तये अस्याः परस्परं सहयोगं कुर्वन्ति ।

## प्रणाल्याः घटकाः

एकस्यां प्रणाल्यां त्रयः घटकाः भवन्ति –

अदा (input), प्रक्रिया (process), प्रदा (output)

प्रणाली वातावरणमाध्यमेन अदा पदार्थस्य ग्रहणं करोति तदा उत्सर्जनं सम्पादयति ।

### 1. अदा

अदा इत्यस्य शब्दस्य तात्पर्यं तादृशं अपरिपक्वपदार्थं भवति यस्य माध्यमेन कस्याचिदपि वस्तोः निर्माणं भवति ।

**2. प्रदा**

कस्यांचिद् प्रक्रियायां 'अदा' इत्यस्य परिवर्तितं स्वरुपं 'प्रदा' भवति । अर्थात् पदार्थस्य प्रक्रियायाः माध्यमेन परिमार्जनेन संशोधनेन च यस्य स्वरुपस्य निर्माणं भवति तत्प्रदा भवति ।

**3. वातावरणम्**

शब्दस्य प्रणाली उपागमे तात्पर्यमस्ति तस्याः परिस्थित्याः निर्माणं यस्यां हि प्रक्रियायाः संचालनं भवति । औद्योगिकक्षेत्रे वातावरणं हि उद्योगस्थलीयं भवति यत्र कस्याचिदपि वस्तुनः निर्माणं यन्त्राणां श्रमिकाणां वा माध्यमेन भवति ।

## विद्या एव महारत्नम्

✍ शुभश्री भूयाँ

अनुक्रमाङ्कः – 22

इह जगति विद्यैव सर्वधनप्रधानं धनमस्ति। विद्या माता इव रक्षति, पिता इव हिते नियुङ्क्ते, कान्ता इव खेदमपनीय अभिरमयति। किं बहुना विद्या कल्पलता इव सर्वकार्यसाधिका अस्ति। कथ्यते –

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते नहि धनं विद्या विहीनः पशुः।।

उपनिषत्सु द्विविधा विद्या निदर्शिता – परा अपरा चेति। अपरा नरस्य सांसारिकां समुन्नतिं साधयति। अनया नरो जीविकामर्जयितुं प्रभवति। इयं विद्या उपनिषत्सु अविद्या इत्यपि सङ्कीर्तिता। परा विद्या परमार्थं नरस्य साधयति। इयं तस्य मोक्षाय कल्पते। केचन तत्वद्रष्टारः परामेव वास्तविकीं विद्यां मन्यन्ते। तथा चोक्तम् – "सा विद्या या विमुक्तये" इति। किन्तु अपरा विद्या हेया इति मतं विवेकिनः। एषापि जीवनस्य सर्वाङ्गीणविकासाय सर्वथा अपेक्षते। अत एव अपरा विद्यापि वेदितव्येति उपनिषदः उपदिशन्ति।

विद्यां च अविद्यां च यस्य द्वे दो मयै सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।

विद्या हि ज्ञानविशेषरूपा। सा च शस्त्रविद्या शास्त्रविद्येति प्रथमतो द्विविधा । प्रथमं वार्धक्ये निष्फला, द्वितीया च सर्वदेव फलप्रसविनीति सर्वैरेव समाद्रियते। अस्याश्च भेदाः अनन्ताः। विद्या नाम मानवानाम् एकं मूल्यं महद्धनम्। यत् तस्करैरपि नापहर्तुं शक्यते । रत्नादीनां विनिमयेनापि यत् अधिगन्तुं न शक्यते, यथेच्छव्ययेनापि यदणुमात्रमपचयं नोपयाति, वैपरीत्येन नितरामुपचयमेव भवति। यदेव चतुर्वर्गफलसिद्धेः साधकतमम् । तस्मात् प्रियतरं पुनः किं नाम वस्तुजगति अस्ति ?

विद्यायाः किमहो माधुरीमयी मूर्तिः। यथा तावत् समलङ्क्रियते पण्डितमण्डलीनां विमलं मानससरोवरम्, तया विहीनानां नरसमूहानां मानसमन्दिरन्तु अमावस्या रात्रिरिव निबिडतिमिरावृतं भवति। विद्यार्चनया मनुष्याणां हृदयालुसंस्काररूपः अन्धकारः दूरीभवति। अस्या एव कृपया सौभाग्यशालिनां मानसाकाशे विवेकशारदपूर्णचन्द्रः उदेति। अतः विद्या एव परमसुखसम्पद् निधानम्। इयमेव धैर्य–विनय–क्षमा–शिष्टताप्रभृतीनां गुणानां प्रसविनी भवति। अतः उच्यते –

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ।।

सम्प्रति विद्याबलेनैव पाश्चात्याः सभामानवाः वाष्पीयजलस्यलाकाशयानादीनाम् अणुवीक्षण–दिग्दर्शन–वायुयान–तापमानयन्त्रसमूहानाम् आविष्कारेण जगदवासिनः विस्मयजलधौ निमज्जयन्ति। अमूल्यहीरकर्मणिकाञ्चनालकृतोऽपि, धनसमृद्धोपि, अनुपमसौन्दर्यगर्वितोऽपि विद्याहीनः नरः पशुसमानः भवति।

वस्तुतो विद्यया जीवने सर्वविधा श्रेयस्करी श्रीरुपलभ्यते। संसारे यत् किमपि महनीयम्, उदात्तं, रमणीयम्, उपभोगार्हं च विद्यते, तत्सर्वं विद्यायाः प्रभावात् प्राप्तुं शक्यते। यथा काव्यस्य प्रयोजनानि काव्यतत्वदर्शिभिः गणितानि, तथैव विद्यया अपि अर्थावाप्तिः, यशः, व्यवहारज्ञानम्, शिवेतरक्षतिः परनिवृत्तिश्चेत्यादीनि भवितुमर्हन्ति बहूनि प्रयोजनानि। विद्यया समाजे सम्मानं संभवति। अतः कश्चित् सूक्तिकारः साधु परामृशति–

स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।

वस्तुतः अस्मिन् संसारे यत्किमपि कमनीयं, मङ्गलं, वरेण्यं च वर्तते, तस्य सर्वस्य अमृतमिति समाम्नायते। तत्सर्वं विद्यया अधिगम्यते, अत एव उक्तम् –"विद्ययाऽमृतमश्नुते" इति।

विद्या एव सर्वधनानां मूलम्। अनेकसंशयोछेदकः अस्ति। विद्या नरस्य समुन्नतिपथं विशदीकरोति, बुद्धिं प्रकटयति, कर्तव्यपालनपरां धियम् आदधाति, इहलोके विद्या सर्वश्रेष्ठं धनमस्ति। सुखस्य परमं कारणं विद्यैव। विद्यया यावज्जीवनं तृप्तिर्भवति। उक्तञ्च –

विद्यानीतिकरी जगद्वशकरी विद्या विशालादशा
विद्या बन्धुरसौ विदेशगमने विद्यापरं सम्बलम्।
विद्या नाम नरस्य रूपमधिकं विद्या च रत्नं महत्
विद्यागौरवकारणं त्रिभुवने विद्याविहीनः पशुः ।।

विद्याबलेनैव नरः त्रिभुवनं करस्थितमामलकवत् पश्यति। अतएव "विद्यारत्नं महद्धनम्" इत्युक्तिः सत्यम् विद्यते इति मम आशयः।

❋ ❋ ❋

## भाषोत्पत्तिविषयकवादाः

✍ तपस्विनी साहु
अनुक्रमाङ्कः – 23

भाषाविज्ञाने भाषोत्पत्तिविषयकाः विविधवादाः प्रस्तूयन्ते । तत्र पञ्च वादाः प्राधान्यं लभन्ते। तेषां समासतोऽत्रविवरणं प्रस्तूयते ।

**1. देव्युत्पत्तिवादः**

भाषोत्पत्तिविषये प्राचीनतमोऽयं वादः । तदनुसारं यथैवेश्वरेण वेदज्ञानं प्रदत्तं तथैव वैदिकभाषा संस्कृतभाषाऽपि ईश्वरप्रदत्तैव । दैवी प्रेरणया मानवो भाषणे प्रवृत्तः । मानवजातेः जन्मना सहैव भाषाऽपि प्रादुरभूत् । अतएव ऋग्वेदे प्रोच्यते –

देवीं वाचमजनयन्त देवास्तां विश्वरुपाः पशवो वदन्ति ।

अइउण् इत्यादि चतुर्दशप्रत्याहारसूत्राणां प्रादुर्भावः शिवस्य ढक्कानादेन जातमिति मन्यते। उक्तं चापि –

नृतावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्

परमेतन्मतं न विदुषां रुचिकरम् । यदि भाषा ईश्वरप्रदत्तं स्यात् तर्हि कथं लोके विविधभाषोत्पत्तिः स्यात्। जीवजन्तभाषादिवत् तद् विपर्ययो न लक्ष्येत । ईश्वरसृष्टा भाषा प्रागेव पूर्णविकाससम्पन्ना स्यात् तत्र विकासक्रमो न लक्ष्येत । किन्तु भाषासु विकासक्रमः संलक्ष्यते ।

समीक्षणम् – एतन्मतखण्डनम् आपाततः समीचीनमिव प्रतीयते । परन्तु विचारदृशा विविच्यन्ते चेत् स्फुटमेतद् अवगम्यते यद् भाषा संस्कृतभाषा वा देवप्रदत्ता ईश्वरप्रदत्ता भवेन्न वा भवेत, भाषोत्पत्तिः

स्फुटस्थान प्रयत्नादिकरणजन्या इति तु निश्चप्रचम् । मानवः कथं भाषणे प्रवर्तते ? इति विचारे " आत्मा बुद्ध्या समेत्यार्थं मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहान्ति स प्रेरयन्ति मारुतम् । मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् । " इत्यत्र न कस्यापि भाषाविदः विप्रतिपत्तिः । दिव्योत्पत्तिः एतत् पारमार्थिकं तथ्यं यत् मानव एव परिष्कृतध्वनियन्त्रयुक्तः प्रतिभोपेतश्च । प्रतिभा ईश्वरप्रदत्ता, ईश्वरस्वरूपा वा । प्रतिभयैव ज्ञानं विज्ञानं च प्रस्तूयते । प्रतिभैव भाषणशक्तिप्रदानेन समं भाषाप्रदानेऽपि समर्था ।

**2. सङ्केतसिद्धान्तः**

एष एव वादः साङ्केतिकोत्पत्तिवादः निर्णयसिद्धान्त इत्यप्युच्यते । एतन्मानुसारं हस्तादिसङ्केतानां पूर्णत्वमपर्याप्तत्वं चोदवीक्ष्य मानवैः संभूय प्रतिवस्त्वर्थध्वनिसङ्केताः निर्धारिताः। तथा च भाषायाः उत्पत्तिः ।

**समीक्षणम् –**

क. भाषायाः अभावे कथं विचारविनिमयः ?

ख. विचारविनिमयस्य का भाषा ?

ग. कः कथं वा सङ्केतशब्दरचनामकरोत् ?

घ. भामहेनोच्यते – ''इयन्त ईदृशाः वर्णा ईदृगर्थाभिधायिनः । व्यवहाराय लोकस्य प्रागित्थं समयः कृतः'' भाषायाः अभावे कथमेष समयः सम्भवति ? एवं मतमेतद् निःसारमेव ।

**3. अनुरणनसिद्धान्तः**

मतमिदं धातुसिद्धान्त नाम्नापि निर्दिश्यते । सर्वप्रथमं मतमिदं प्लेटो महोदयेन सङ्केतितम्। प्रो हेस महोदयेन एतद् व्यवस्थितरुपेण प्रतिपादितम् । मैक्समूलर महोदयेन समर्थितमेतन्मतं रहस्यात्मको नैसर्गिकः सम्बन्धः।

**समीक्षणम्**

शब्दार्थयोनैसर्गिकसम्बन्धस्य कल्पना रहस्यात्मिकैव । विश्वस्य बहु भाषासु धातुनामभावे विज्ञायते । तत्र धातुसिद्धान्तस्य का जातिर्भविष्यति ? घण्टानादे अनुरणनवस्तुदर्शने न कापि नित्यभावानुभूतिः।

**4. श्रमध्वनिसिद्धान्तः**

एष एव सिद्धान्तः श्रमापहारमूलकतावादोऽपि कथ्यते । न्यायर महोदयः सिद्धान्तस्यास्य जनकः । श्रमकाले श्वास प्रश्वासवेगात् स्वरतन्त्रोकम्पनेन तदनुरुपं ध्वन्युच्चारं जायते । श्रमिकाः श्रमकाले श्रमपरिहारार्थं केषाञ्चित् शब्दानां प्रयोगं कुर्वन्ति । यथा – हो, हो, हे, हूँ छियो हियोप्रभृतयः शब्दाः । क्रियया सहजसंगतोध्वनिस्तत् क्रियाबोधक इति तेषां मतम् ।

**समीक्षणम्**

मतमेतद् निकृष्टतमम् । नैते शब्दाः भाषायां किञ्चिदपि स्थानं ग्रह्णन्ति । न चैतेषां ध्वनीनां कोऽपि विशिष्टोऽर्थः । अर्थभावपक्षस्य अर्थपक्षस्य च शून्यात्वमेवावलोक्यते ।

**5. अनुकरणमूलकतावादः**

एषः वादः ध्वयात्मकानुकरणसिद्धान्तः शब्दानुकरणवादः शब्दानुकरणमूलकतावादः, ध्वनिवादो वा कथ्यते। एतन्मतानुसारं ध्वन्यनुकरणमाश्रित्य कतिपयाः नामधेयाशब्दाः प्रवर्तन्ते । यथा – काँव–काँव–ध्वन्यनुकरणत्य काक शब्दः । एवमेव कोकिल दर्दुर–खटखट–पट–पट–घर्घत प्रभृतयः शब्दाः वर्तन्ते ।

**समीक्षणम्**

मैक्समूलर महोदयो वादस्यैतस्य कुक्कुरध्वनेः पयायं बाउ–बाउ शब्दं प्रयुज्य निरर्थकत्वं प्रतिपादयति। एतादृशानां शब्दानां संख्याऽतीव लघ्वी । मतमेतद् हास्यास्पदमेव ।

❋ ❋ ❋

## समयसारिणीनिर्माणकौशलम्

✍ स्वागतिका साहु

अनुक्रमाङ्कः –24

जीवनस्योत्थानं पतनं च समयसाध्यपरिस्थितीनां महत्वपूर्णं योगदानं भवति । अपि च परिस्थितीनां समाधानाय समयस्य नियन्त्रणं समयस्य विभाजनञ्च आवश्यकं भवति । यतो हि कथ्यते समय एव जीवनादर्शानां संरक्षणस्य संवर्धनस्य च उत्तरदायित्वम् अस्ति । यतो हि वर्तमानपरिप्रेक्ष्ये सामाजिकजटिलतायाः समाधानाय आवश्यकतापूर्त्यर्थञ्च ज्ञानप्रक्रियायाः सतताभ्यासः विद्यालये एव भवितुमर्हति । यत्र बालकाः नियमितपाठ्यक्रमस्यान्तर्गतं निश्चिते स्थाने गुरोः सान्निध्ये जिज्ञासाशान्तये सततं प्रयत्नशीलाः भवन्ति । एतदर्थमावश्यकं भवति विद्यालये घटितानां सर्वासां घटनानां विभाजनम् । सहैव तत्र सम्पाद्यमानानां विभाजनम् । सहैव तत्र सम्पाद्यमानानां सर्वासाम् औपचारिकानौपचारिकक्रियाणां समुचितं स्थाननिर्धारणम् । इदमेव भवति समयविभागचक्रम्। अस्यैव समयतालिका, समयसारिणी इत्यपि व्यवहारः अस्ति ।

समयसारिण्याः सहाय्येन विद्यालये समीचीनव्यवस्था कल्प्यते । तेन विना विद्यालयस्य वातावरणं अव्यवस्थितं भवति । समयचक्रस्य समीचीनोपयोगेन आवश्यकतानुगुणविद्यालयस्य संसाधनानां अधिकोपयोगः सम्भवति । समयचक्रे विभिन्नविषयेभ्यः पाठ्यसहगामिक्रियाभ्यः समानसमयो पालितः जायते । शिक्षकाणाम् मध्ये कार्यस्य विभाजने समयसारिण्या आवश्यकता भवति ।

समयसारिण्या एव समय शक्तिसंशोधनेषु समन्वयः स्थाप्यते । समयचक्रेण कक्षाः नियमितरुपेण सुव्यवस्थितया चालयितुं शक्यन्ते ।

शैक्षणिकोद्देश्यानां प्राप्तये विद्यालयीयशैक्षिककार्यक्रमेषु समत्वसम्पादनार्थं निर्धारिते समये तेषां समापनार्थञ्च दैनिककार्ययोजनायाः निर्धारणमावश्यकं भवति ।

**समग्रविभागचक्रनिर्माणसिद्धान्तः**

**1. शिक्षाविभागस्य नियमाः**

विद्यालये शैक्षिकवातावरणस्योन्नतये शिक्षानिर्देशनालयेन निर्धारितानां नियमानां व्यवस्थापनम्। कस्मिन् विषये कस्य कस्य शिक्षकस्य कृते च कति होरा अपेक्षन्ते इति विचार्यते।

**2. विद्यालयस्य स्तरः**

यथा प्राथमिकस्तरः, माध्यमिकस्तरः,उच्चमाध्यमिकस्तरश्च । प्रकारस्य विभिन्नतां दृष्ट्वा समयतालिकायाः निर्माणं करणीयम् । छात्राणां वयबौद्धिकस्तरस्यानुरुपं समयविभागचक्रस्य निर्धारणं यथा 6 तः 10 वर्षीयाणां छात्राणां कृते 20 तः 26 निमेषात्मकः, 2 तः 12 वर्षीयाणां छात्राणां कृते 20 तः 25 निमेषात्मकः एकैकः कालांशो भवेत् ।

**3.रुच्यनुसारेण विषयचयनम्**

रुचेः सिद्धान्तस्याधारेण अधिगमप्रक्रियायां छात्रेभ्यः महत्वप्रदानम् । अध्यापकानां मानसिकस्थितिं, रूचिं योग्यताञ्च दृष्ट्वा कार्यप्रदानं भवेत् । सर्वेषां शिक्षकाणां कार्यभारः यथाशक्ति समानः भवेत् । तथा च स्वकीयनैसर्गिकयोग्यतानुसारं छात्रेभ्यः विषयचयनस्य अवसरप्रदानं भवेत्। विषयाणां जटिलतामनुसृत्य प्रथमे अन्तिमे च अन्तरे गणितं, विज्ञानं, व्याकरणादिकठिनविषयाणामध्यापनं न भवेत् । यतः प्रथमे चक्रे छात्राः नीरसाः भवन्ति एवं अन्तिमे चक्रे गन्तुकामाः भवन्ति ।

**4.वैयक्तिकावधानम्**

यथासम्भवं सर्वेषां बालकानां वैयक्तिकावश्यकतानुगुणम् अवसरः कल्पनीयः भवति ।

**5.विश्रान्तिसमयः**

छात्राणां श्रान्तेः निवारणाय अवसरः अपेक्षितः । दिने अवकाशद्वयं भवेत् ।

**6.अध्यापकच्छात्रसम्पर्कः**

बालकानां जीवनस्य उन्नत्यर्थम् इदम् अपेक्षितं भवति यत् अधिकाधिकतया अध्यापकानां कृते ते सुपरिचिताः भवेयुः । अतः समये समये तेषां सम्पर्कः कस्मिंश्चित् कालांशे भवेत् । यत्र

परस्परं सान्निध्यं भवति, येन बालकस्य व्यक्तित्वविषयं ज्ञात्वा सर्वाङ्गीणविकासार्थम् अध्यापकः प्रयत्नं करोति ।

**7.सर्वाङ्गीणविकासः**

बालकानां वैयक्तिकसर्वाङ्गीणविकासाय समयतालिकायां महत्वपूर्णस्थानं परिकल्पनीयम्। शारीरिक–नैतिक – सांस्कृतिक – रचनात्मक – सृजनात्मक – वैयक्तिक – बौद्धिक – मानसिकविकासाय क्रीडा, व्यायामः, प्रार्थना, पाठ्यसहगामिक्रिया इत्यादीनाम् अवसरः कल्पितः भवेत् ।

8. शिक्षाविभागस्य नियमानुगुणं निर्मातव्यम्।

9. विद्यालयेषु प्रकारानुगुणं स्तरानुगुणञ्च भिन्नता भवेत् ।

10. विषयस्य मुख्याधारेण समयचक्रे स्थानं कल्पनीयम् ।

11. सामाजिकावश्यकताधारितं भवेत् समयचक्रम् ।

12. उपलब्धसमयानुसारं परिस्थित्त्यनुसारं पाठ्यसहगामिक्रियाभ्योपि समयचक्रे स्थानं कल्पनीयम् ।

13. सर्वासु कक्षासु समानाः छात्राः स्युः, परन्तु विषयं दृष्ट्वा किञ्चित् संख्याव्यवस्था भवितुमर्हति।

14. समयसारिणी निर्माणे एकः एव शिक्षकः अनवरतं तथा कक्षाद्वयं न पाठयेत् ।

15. एकस्यैव विषयस्य युगपत् कालांशः न भवेत् ।

समयतालिकायां न तु केवलं पाठ्यविषयाणाम् अपि तु पाठ्यसहगामिक्रियाणां तथा भौतिकतत्त्वानां उपयोगाय अवकाशः विधेयः । समयतालिका सर्वेषामवगाहनपूर्वकं निर्मेया भवेत् तथा सरलतया सुस्पष्टतया कार्यक्रमान् ज्ञात्वा समयस्य सदुपयोगं कर्तुं प्रभवन्ति । तेन कार्यसाफल्यं भवति । तेन तेषां जीवनं सफलं कर्तुं शक्नुवन्ति ।

## शिक्षायाः समाजे आवश्यकता

✍ वरुण कुमार मोहान्ति

अनुक्रमाङ्कः – 25

शिक्षा एका आजीवना क्रियाशीला प्रक्रिया। शिक्षा एका सामाजिकी प्रक्रिया। कारणं Education isn't end off classroom, End off life. भारतं प्राचीनकालतः प्राचीनतत्वेन प्रभावितः।

गुरुः शिक्षादानं करोति। सा शिक्षा समाजस्य हितोपयोगी आसीत् । समाजस्य आवश्यकता पुरतः स्थापयित्वा गुरुः शिक्षां ददाति। शिक्षायाः कर्तव्यं समाजं प्रति महत्वपूर्णमस्ति। परन्तु दुर्भाग्यवशात् ब्रिटिशशासनसमये समाजेन सह शिक्षायाः सम्बन्धः विच्छिन्नः अभवत्।

शिक्षाप्रक्रिया समाजे अन्तर्भवति। शिक्षा सामाजिकजीवनस्य एकं महत्वपूर्णं घटकम्। गान्धीमहोदयानुसारेण जीवनस्य लक्ष्यं शिक्षायाः लक्ष्यं भिन्नं कदापि नैव भविष्यति। शिक्षायाः किमपि लक्ष्यं नास्ति चेत् जीवनस्य लक्ष्यं निरुपयुक्तं भवति।

शिक्षायाः उद्देश्यं भवति बालकस्य व्यवहारे परिवर्तनम्। शिक्षायाः माध्यमेन बालकस्य मूलप्रवृत्तिः परिमार्जिता भवति। अतः शिक्षा स्वयमेका आत्मनिर्भरप्रक्रिया। अतः आवश्यकतानुसारं तस्य मानवस्य व्यवहारः मार्जितः भवति। शिक्षा एका एषा प्रक्रिया यया माध्यमेन छात्रः स्वस्य व्यवहारं परिवर्तनं कर्तुं विभिन्नानि कार्याणि सम्पादयति। तस्य कार्यस्य फलस्वरुपं शिक्षासमाजयोः सम्बन्धः कल्प्यते।

शिक्षा विकासस्य मार्गः भवति। व्यक्तिं सज्जीवनं प्रति या प्रेरयति सा शिक्षा।

टैगोरवर्यः स्वस्य पुस्तके परोक्षप्रत्यक्षरुपेण शिक्षायाः चर्चां कृतवान् । स्वस्थशरीरम् शारीरिकविकासः च शिक्षायाः एकम् उद्देश्यम् । इतिहासः, भूगोलं, विज्ञानादिशिक्षा प्रत्यक्षानुभवेन भवति। भ्रमणेन दर्शनेन श्रवणेन अपि शिक्षायाः यथार्थदृष्टिकोणविकासः भवति। शारीरिकं तथा मानसिकशिक्षानिमित्तं कार्यम् आवश्यकम् । तदर्थं हस्तकला आवश्यकी अस्ति।

बालकः एकस्मिन् समाजे जीवनयापनं करोति। तस्य समाजस्य वातावरणं व्यवहारं प्रभावितं करोति । तस्य प्रभावेण बालकस्य व्यवहारे परिवर्तनम् आगमिष्यति। समाजस्य अन्तःक्रियां न ज्ञात्वा शिक्षायाः उद्देश्यं निश्चेतुं न शक्यते ।

अतः शिक्षकस्य शैक्षिकसमाजशास्त्रस्य अध्ययनम् आवश्यकम् । शिक्षकस्य कार्यं भवति छात्रस्य व्यक्तित्वस्य सर्वाङ्गीणविकासार्थं प्रयासः। विकासः सर्वदा सामाजिकसम्बन्धेन प्रभावितः भवति। छात्रस्य विकासः तस्य परिवारस्य वातावरणेन सह संयुक्तः भवति। परन्तु विद्यालयोऽपि अन्यम् एकं कारणं वर्तते। छात्रः यस्मिन् समूहे तिष्ठति तस्य प्रभावोऽपि अनुभूयते । समाजशास्त्रस्य सिद्धान्तः शिक्षानिमित्तम् उपयोगी भवति। शिक्षा सामाजिकनियन्त्रणस्य सशक्तसाधनम् अस्ति । ततः सामाजिकसम्बधस्य ज्ञानम् आवश्यकम् अस्ति। George Payne 1928 तमे वर्षे "शैक्षिकसमाजशास्त्रसिद्धान्तः" नाम्ना एकं पुस्तकं प्रकाशितवान् ।अस्मिन् पुस्तके सः विस्ताररूपेण सामूहिकजीवनस्य प्रभावः कीदृशः इति वर्णनं कृतवान्।

❋ ❋ ❋

# समयसारिणिः

✍ विनय एम् भट्टः

अनुक्रमाङ्कः – 26

अस्माकं जीवने समयस्य नियन्त्रणं, समयस्य विभाजनञ्च आवश्यकं भवति । जीवनादर्शानां संरक्षणस्य, संवर्धनस्य च दायित्वं समाजः विद्यालयस्योपरि च न्यस्तवान् अस्ति । यतो हि इदनीन्तनकाले सामाजिकजटिलतायाः समाधानाय आवश्यकतापूर्त्यर्थञ्च ज्ञानप्रक्रियायाः सतताभ्यासः विद्यालये एव भवितुमर्हति । यत्र बालकाः नियमितपाठ्यक्रमस्यान्तर्गते निश्चिते स्थाने गुरोः सन्निध्ये जिज्ञासोपशान्तये सततप्रयत्नशीलाः भवन्ति । एतदर्थं विद्यालये घटितानां सर्वासां घटनानां विभाजनं निश्चयेन करणीयं भवति । सहैव तत्र सम्पाद्यमानानां सर्वासाम् औपचारिकानौपचारिकक्रियाणां समुचितं स्थाननिर्धारणम्, इयमेव भवति समयविभागचक्रं, समयतालिका अथवा समयसारिणी।

किमर्थं समयसारिणीः अवश्यकी ?

1. विद्यालये सम्पद्यमानशैक्षिककार्थक्रमेषु समत्वसम्पादनार्थम् ।
2. निर्धारितसमये शैक्षिककार्याणां समापनार्थम् ।
3. विद्यालये समीचीना व्यवस्थाकल्पनार्थम् ।
4. छात्रम्, अध्यापकं, कर्मकारञ्च विना सोत्साहं कार्यं कर्तुं प्रेरयितुञ्च ।

**समयसारण्याः सिद्धान्ताः**

1. विद्यालयस्य प्रकारानुगुणं स्थलानुगुणञ्च समयचक्रे विभिन्नता आयाति ।
2. विषयस्य गुरुत्वाधारेण समयचक्रे स्थानं कल्पनीयम् ।
3. सामाजिक आवश्यकताधारितं समयचक्रं भवेत् ।
4 उपलब्धसमयानुसारं परिस्थित्यानुसारं पाठ्यसहगामिक्रियास्यापि समयचक्रे स्थानं कल्पनीयम्।
5. सर्वासु कक्षासु समानाः छात्राः स्युः । परन्तु कदाचित् विषयदृष्ट्या किञ्चिन्मात्रं अन्तरं भवितुमर्हति ।
6. समयसारिणिनिर्माणे वैविध्यं आनेतव्यम् ।
7. एकः एव शिक्षकः अनवरततया कक्षाद्वयं न पाठयेत् एवमेव एकस्येव विषयस्य युगपत् कालांशः न योजनीयः ।

**समयसारिण्याः उद्देश्यानि**

1. विषयाणां जटिलतायाः अनुसारेण अध्ययनकालस्य निर्माणम् ।
2. सर्वदा छात्राध्यापकेषु गतिशीलत्वसम्पादनम् ।

3. छात्रेषु नैतिकोत्थानस्य आत्मानुशासनस्य च भावोत्पादनम् ।

4. छात्राणां श्रमाधिक्यात् विश्रान्तेश्च संरक्षणम् ।

येन समयस्य सदुपयोगः भूत्वा विद्यालयस्य सर्वाङ्गीणविकासः जायते । तेन उत्तमप्रजानिर्माणं सिध्यत्येव।

❋ ❋ ❋

## संस्कृतमस्माकं भाग्यम्

✍ शुभम हातगिणे

अनुक्रमाङ्कः – 27

अस्माकं राष्ट्रस्य सर्वांगीणविकासाय अहर्निशं प्रयत्नान् कुर्वन्तः सन्ति नैके जनाः । अस्माभिः अपि राष्ट्रहिताय यथाशक्ति प्रयासाः करणीयाः । वयं भारतीयाः भारतमातुः अङ्के जन्मलब्धाः भारतीपुत्राः स्मः । तथा संकृतस्य साधनायाम् अर्थात् भारत्याः सेवायाम् अनुरक्ताः स्मः। अतः कियत् उत्कृष्टं भाग्यम् अस्माकम् । यतोहि संस्कृतं भारतस्य पुरातनी भाषा अस्ति, एषा देवभाषा इति लोके प्रसिद्धिः । संस्कृतभाषायाः व्याकरणं वैज्ञानिकम् अस्ति। संस्कृतसाहित्यस्य परम्परा अत्यन्ता सुदीर्घा समृद्धाश्च एव । संस्कृतसाहित्ये सर्वं समायाति, सर्वेषां विषयाणां विषये व्यापकं वर्णनं संस्कृतभषायां वर्तते । अतः लोके संस्कृतस्य महती प्रतिष्ठा वर्तते ।

पुरातनकले तु एषा व्यवहारभाषा आसीत् एव, सर्वेषु क्षेत्रेषु अस्याः प्रभावः अद्यापि द्रष्टुं शक्यते । परन्तु अधुना आधुनिककाले आङ्गलभाषायाः व्यवहाराधिक्येन संस्कृतस्य स्थानं अधः जातम् । परन्तु अस्याः भाषायाः पुनप्रतिष्ठापनार्थं वयं संस्कृतसेवकाः संस्कृतसैनिकाः संस्कृतानुरागिणः च एव किमपि कर्तुं शक्नुमः । एषा भाषा न केवलं व्यवहारभाषा आसीत् परन्तु सांस्कृतिकभाषा अपि अस्ति यतोहि महाभारतरामायणयोः कथा संस्कृतेन लिखिता अस्ति, वेदोपनिषदादयः संस्कृते एव सन्ति । अनेकानि महान् दर्शनानि शास्त्राणि च संस्कृते एव सन्ति । भारतीयचिन्तनस्य सारः एव संस्कृते अस्ति अतः संस्कृतिसंस्कृतयोः विशेषः महान् सम्बन्धः अस्ति । एवमपि वक्तुं शक्यते यत् संस्कृतिः संस्कृतम् च एकस्यैव नाणकस्य पार्श्वद्वयं वर्तते । अतः एतादृश्याः भाषायाः कृते अस्माकं मानसिक – वाचिक –कायिकयोगदानं दातव्यम् एव । सर्वप्रथमं तु अस्याः भाषायाः शिक्षायां यत् स्थानं वर्तते तत्र परिवर्तनम् कर्तव्यम् । आधुनिके काले परिवर्तमानासु परिस्थितिषु संस्कृतशिक्षणं रोचकं कथं स्यात् ? इति सन्दर्भे नवचिन्तनस्यावश्यकता अस्ति । प्रौद्योगिकयुगेस्मिन् कथम् अभिभावकानां, छात्राणां मनस्सु संस्कृतभाषां प्रति सकारात्मक रुचिः उत्पादनीया ? इदमपि विचारणीयम् । संस्कृतभाषायां भारतस्य ये सांस्कृतिकविचाराः उच्चादर्शाश्च सन्ति । यथा –"सर्वे

भवन्तु सुखिनः", "वसुधैव कुटुम्बकम्", "न हि कृतमुपकारं साधवो विस्मरन्ति" एतादृशाः उत्प्रेरणात्मकसिद्धान्तानाम् विषये जागरूकता आवश्यकी । अतः संस्कृतं जनप्रियं कर्तुम् केचन परामर्शाः –

1. संस्कृतसंभाषणशिबिरम्
2. व्यक्तिगतकक्षाणामायोजनम्
3. संस्कृतसङ्घसम्मेलनम्
4. संस्कृतप्रचारप्रसारसभा
5. संस्कृतशिक्षणविधीनां सरलीकरणम्
6. संस्कृतसांस्कृतिककार्यक्रमाणामायोजनम् इत्यादि ।

एवं प्रकारेण संस्कृतकार्यक्रमानाम् आयोजनम् कर्तव्यम् । संस्कृताध्ययनस्य कृते यत् धनं सम्पतिर्वा दीयते तस्याः संस्कृतस्य संरक्षणाय संवर्धनाय च व्ययीकरणम् । अतः संस्कृतस्य कृते कार्याणि तु बहुनि सन्ति । कार्याणां कृते कार्यक्रमाणाम् आवश्यकता अस्ति । अतः संस्कृतस्य कृते अस्माभिः यथाशक्ति योगदानं तु दातव्यमेव इति ।

## विश्वस्तरे भारतीयसंस्कृतेरवदानम्

✍ ओमप्रकाश पण्डा

अनुक्रमाङ्कः – 28

भगवतः परमवैचित्रविमण्डितासु सृष्टिषु श्रेष्ठजीवः मानवः। तस्य जीवस्य अधिको विशेषो भवति ज्ञानम्। येन ज्ञानबलेन मानवाः सर्वत्र पूजिताः वन्दिताश्च। उक्तञ्च –

आहारनिद्रा भयमैथुनञ्च समानमेतद् पशुभिर्नराणाम्।
ज्ञानो हि तेषामधिको विशेषः ज्ञानेन हीनः पशुभिः समानः।।

तादृशानां मानवानां शुद्धज्ञानोपार्जनाय संस्कृतस्यावश्यकता अपरिहार्या। यतोहि संस्कृतं नाम परिमार्जितं परिशोधितं परिष्कृतं परमपवित्रञ्च। तेन संस्कृतज्ञानेन जीवश्रेष्ठमानवानां निर्माणं समीचीनम्। तत्र मूलमस्माकं महनीया संस्कृतिः। संस्कृतिश्च संस्कृताश्रिता। तदर्थं विश्वे भारतस्य प्रतिष्ठा अद्वितीया भवति। उक्तञ्च –

भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा

यदुक्तं महर्षिणा मनुना–

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

उत्तमचरित्रगठनाय भारतस्य महनीया संस्कृतिः विश्वे सर्वेषाम् आदरणीया पूजिता वन्दिताश्च।

सम्प्रति निबन्धेऽस्मिन् याः संस्कृतवाण्यः अस्माकं संस्कृतेर्महत्वं प्रकटयन्ति तासु काश्चित् अत्र उदाह्रियन्ते–

1. सहनाववतु सहनौ भुनक्तु सह वीर्यं करवावहै।
तेजस्विनावधीतमस्तु मा विद्विषावहै।।

अयं वेदमन्त्रो गुरुशिष्ययोः उच्चनीचयोः सहावस्थानं सुमधुरं कर्त्तुं प्रयतते।

2. पितृदेवोभव, मातृदेवोभव, आचार्यदेवोभव, अतिथिदेवोभव इत्येतादृग् वैदिकोपदेशजातं गुरुजनान् प्रति देवताज्ञानं निर्दिशति।

3. कुलालेभ्यो नमः इत्येतादृशवेदवाक्यं समाजे नीचवर्गीयजनानां गुरुत्वं प्रति साधारणजनानां सम्मानबोधञ्च सूचयति।

4. असतो मां सद्गमय, तमसो मां ज्योतिर्गमय, मृत्योर्मां अमृतंगमय इत्येतादृशानि वाक्यानि भारतीयनागरिकस्य शुद्धान्तःकरणसम्बद्धसूचनां प्रददति।

5. वेदान्तेषु भारतीयसंस्कृतेर्महनीयता वहुषु स्थलेषु प्रतिफलति।

तत्र ईशोपनिषदि–

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।।

इति मन्त्रः सर्वत्र परमेश्वरस्य संस्थितिं, त्यागभावेन भोगं, धनं प्रति अनासक्तिभावञ्च निर्दिशति। अपि च –

यस्तु सर्वानि भूतान्यात्मन्येवानु पश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।

इत्ययं मन्त्रः सर्वत्र समदर्शनं कर्तव्यमिति परामृशति। आतंकवाद निरोधे अयं मन्त्रः सर्वाधिकमहत्वपूर्णरूपेण गणयितुं शक्यते।

6. भारतीयसंस्कृतिः सर्वत्र भगवद्दर्शनस्य वार्त्तां वितरति।

यदुक्तं श्रीमद्भगवद्गीतायाम् –

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति।

तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।।

पुनश्च संसारिकीं मायां दूरीकर्तुं परमेश्वरे प्रपन्नतां प्रतिपादयति गीतायाम् –

देवी ह्येषा गुणमयी मम माया दुरत्यया।

मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।।

इत्येवं गीतावाण्यः अस्माकं संस्कृतेः महनीयतां प्रतिपादयन्ति।

7. वसुधैव कुटुम्बकम् इति कल्पना केवलं भारतीयसंस्कृतौ परिदृश्यते।

यथा चोक्तम् –

अयं निजः परोवेति गणना लघुचेतसाम्।

उदारचरितानान्तु वसुधैव कुटुम्बकम्।।

अयं वेदमन्त्रो समग्रे विश्वे शान्तिप्रतिष्ठापनार्थं विश्वभ्रातृत्वपरिकल्पनार्थं सर्वजीवेषु समत्वभावनां पोषयति। 8. पुनश्च प्रियवाक्यप्रयोगपूर्वकं सर्वत्र मैत्रीस्थापनार्थं नीतिवाणीमाध्यमेन भारतीयसंस्कृतिः प्रयत्नं विदधाति।

यथा –

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।।

अपि च संहतिः सर्वत्र कार्यसाधिका भवतीति वार्ता नीतिशास्त्रात् समुपलभ्यते।

यथा–

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।

तृणे गुणत्वमापन्नैर्वध्यन्ते मत्तदन्तिनः।।

9. संस्कृतभाषायां लिपिबद्धं योगदर्शनमस्माकं भारतीयसंस्कृतेः महत्वं आवहति। ''अहिंसा प्रतिष्ठायां तत्सन्निधौ वैरत्यागः। ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः'' इत्यादीनि योगसूत्राणि समग्रविश्वस्य उपकारकाणि भवन्ति। सम्प्रति रामदेववर्यः समग्रविश्वे योगमाध्यमेन भारतीयसंस्कृतेः चिन्तनस्य च प्रचारं सम्पादयति। एवं रामायणादिषु समुल्लिखिताः ''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'' इत्येतादृशवाक्यानि भारतीयसंस्कृतेः महत्वं गुरुत्वं च प्रतिपादयन्ति। अतो महनीया भारतीयसंस्कृतेः संरक्षणार्थं संस्कृतभाषा सततं बद्धपरिकरा वर्तते। तस्मादस्याः भाषायाः संरक्षणमपि अस्माकं सर्वेषां कर्तव्यम्।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग् भवेत्।।

# दार्शनिकानां दृष्ट्या शिक्षोद्देश्यानि

✍ गणेश भट्टः

अनुक्रमाङ्कः – 29

शिक्षायाः महत्वं मनुस्मृतौ एवं प्रकारेण सम्यगेव कथितमस्ति यत्

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

भारते जातस्य प्रत्येकं जनस्य सच्चरित्रेण विदेशीयाः जनाः अपि शिक्षिताः भवन्ति। प्राचीनकालादेव शिक्षणे प्रवृत्ताः जनाः देवपितृऋषिप्रभृतिभिः ऋणैः मुक्ताः आसन् । अस्माकं भारते तु आचार्यस्य स्थानं देवतुल्यम् इत्येव प्रतिपादितम् अस्ति। यदा आङ्लजनाः भारतं प्रविष्टाः तदा ते एतत् आचार्यस्य गौरवं तथा स्थानं हीनकार्येण नाशितुं प्रारम्भमकुर्वन् । भारतस्य शिक्षाव्यवस्था पूर्णरूपेण नाशिता अभवत् । एतस्मादेव कारणात् आङ्लशिक्षाव्यवस्था भारते प्रचलिता जाता। भारते साम्प्रतिके युगे प्रचलितायाः शिक्षायाः स्वरूपनिर्धारणे विविधाः ऋषयः नेतारः, शिक्षकाः, सामाजिकाश्च प्रभूतं प्रयत्नं कृतवन्तः। अत्र शिक्षाशास्त्रिणां नामानि तथा तैः उक्तरीत्या शिक्षायाः उद्देश्यानि मया अत्र प्रस्तूयन्ते।

### 1. डा. एनिबेसेन्टमहोदयाः

डा. एनिबेसेन्टमहोदयया शिक्षायाः उद्देश्यानि एवं निरूपितानि –

☞ शारीरिकविकासः

☞ मानसिकविकासः

☞ धार्मिकतायाः नैतिकतायाश्च विकासः । एतस्मिन् विविधाः विकासाः मानवस्य सर्वाङ्गीणविकासं जनयन्ति। इमानि शिक्षायाः उद्देश्यानि भवेयुः इति कथयन्ति।

### 2. श्री रवीन्द्रनाथठाकुरः

रवीन्द्रनाथठाकुरवर्येण निर्धारितानि प्रमुखानि शिक्षोद्देश्यानि अधः वर्तन्ते। तान्यथा –

☞ बालकानां शरीरस्य स्वस्य स्वाभाविकस्य विकासस्तेषाञ्च विविधानामङ्गानाम् इन्द्रियाणाञ्च प्रशिक्षणम्।

☞ बालकेभ्यः यथार्थजीवनस्य तत्वानां, परिस्थितीनां च ज्ञानं प्रदाय, तदनुरूपं तेषां मस्तिष्कस्य विकासः।

☞ बालकानां धैर्यम्, शान्तिः, अनुशासनम्, आभ्यन्तरीया स्वतन्त्रता अन्तशक्तिः, आन्तरिकज्ञानस्य मूल्यमित्येतेषां परिचयपूर्वकं तेषां नैतिकी आध्यात्मिकी चोन्नतिः।

☞ बालकानां वैयक्तिकः व्यावसायिकः सामाजिकश्च विकासः ।

☞ बालकानां पूर्णजीवनस्य प्राप्तये तेषां पूर्णविकासः।

**3. स्वामीविवेकानन्दः**

विवेकानन्दमहोदयेन प्रकटितेषु विचारेषु शिक्षोद्देश्यानि अत्र वक्तुं शक्नुमः। तद्यथा –

☞ आत्मानुभूतेः प्राप्तिः ।

☞ शारीरिकमानसिकविकासः।

☞ वैय्यक्तिकसामाजिकानां विकासः।

☞ सच्चारित्र्यनिर्माणम्।

☞ श्रद्धायाः विकासः।

☞ जीवने निष्ठायाः प्राप्तिः।

**4. महात्मागान्धी**

गान्धीमहोदयः शिक्षायाः उद्देश्यं भागद्वये विभक्तवान्। तात्कालिकं उद्देश्यं तथा अन्तिमोद्देश्यम् इति।

☞ शिल्पादिमाध्यमेन जीविकोपार्जनस्य योग्यतायाः विकसनम्।

☞ बालकाय स्वकीये व्यवहारे स्वसंस्कृतेः अभिव्यक्तेः प्रशिक्षणम् । बालकस्य सामञ्जस्यपूर्णं व्यक्तित्वस्य निर्माणम्।

☞ बालकाः विचारान् पविञ्चीकृत्य तस्य चरित्रनिर्माणम्।

☞ मानवानां सर्वविधदासतायाः मुक्तिः तस्यात्मनश्च उच्चजीवनाय अभिप्रेरणम्।

☞ यथार्थानुभवः, आत्मानुभूतिरीश्वरस्य च ज्ञानम्।

**5. महर्षिः अरविन्दघोषः**

अरविन्दघोषवर्येण महत्वपूर्णानि उद्देश्यानि निर्धारितानि । तान्यथा –

☞ बालकस्य शरीरस्य शुद्धः पूर्णश्चविकासः।

☞ बालकस्य चित्तसंबद्धां क्रियाशीलतां समुन्नतां विधाय तस्य अन्तःकरणस्य विकासः ।

☞ बालकस्य स्नायुशुद्धिं चित्तशुद्धिञ्च कृत्वा इन्द्रियाणां उचितप्रयोगस्य विकासः ।

☞ बालकानां स्मृतेः, कल्पनायाः, चिन्तनस्य, निर्णयस्य च विकासः।

☞ बालकस्य आध्यात्मिकविकाससम्पादनम्।

☞ प्रशिक्षणपूर्वकं तस्य तर्कशक्तेः विकासः।

# संस्कृतरक्षा देशरक्षा

✍ अमूल्य भोई

अनुक्रमाङ्कः – 30

प्राचीनकालात् संस्कृतभाषा भारतवर्षे भावनात्मकं तथा संस्कृतेः एकतायाः मूलाधारः वर्तते। काश्मीरतः कन्याकुमारीपर्यन्तं सम्पूर्णभारतवर्षः एकतायाः सूत्रे बन्धनस्य श्रेयः अस्याः भाषायाः विद्यते। अस्यां भाषायां शक्तिः विद्यमानाऽस्ति यस्याः कारणात् प्रायशः एकसहस्रवर्षपर्यन्तं परतन्त्रतायाः अनन्तरमपि भारतवर्षे संस्कृतेः मूलरूपं वर्तते।

संस्कृतभाषायां निहिता वर्तते भारतस्य एकता अखण्डता च। भारते सत्स्वपि अनेकेषु बाह्यभेदेषु जनानां संस्कृतिः समाना वर्तते। कदाचित् जनाः साम्प्रदायिकता, प्रान्तीयभाषा इत्यादि विषयेषु कलहं कुर्वन्ति। इर्ष्या, द्वेषः, घृणा इत्यादि दुर्भावनाः उत्पद्यन्ते। एतादृशपरिस्थितौ संस्कृतभाषायाः राष्ट्रियमहत्वं सम्यक् भवति। संस्कृतम् आर्यभाषाणाम् जननी द्राविडभाषाणां पोषिणी च वर्तते । सर्वा अपि भारतीयभाषाः संस्कृतनिष्ठाः संस्कृतसम्पृक्ताश्च । समग्रे भारतवर्षे निखिले च देशवाङ्मये सस्कृतस्यैव प्राधान्यं दृश्यते । नास्ति देशस्य कोऽपि भागः यत्र संस्कृतवाङ्मयं नाधीयते, नावगम्यते, न श्रूयते, न आद्रियते च । विद्या सम्पादने भाषायाः विशदत्वं, स्थिरत्वं गुणभावाभिव्यञ्जनसामर्थ्यं चापेक्षते। राष्ट्रभाषा पदलाभाय लोकप्रियत्वं, सरसत्वं, अक्षयवाङ्मयसम्पत्तिमत्वम्, अविवादग्रस्तत्वं च भाषायाः नितरामपेक्षते । संस्कृतवाङ्मयज्ञानमपि सारल्येन सम्भाव्यते । एवं विचारदृष्ट्या विविच्यते चेत् संस्कृतं राष्ट्रभाषा पदम् अलङ्कर्तुं सर्वथा समर्था योग्योपयुक्ता च । संस्कृतिमन्तरेण निर्जीवं जीवं जीविनः । संस्कृतिर्हि स्वान्त्र्यस्य संस्कर्त्री सद्भावनां भावयित्री, गुणगणस्य ग्राहयित्री, दमस्य दात्री, सदाचारस्य संचारयित्री, शान्तेः सन्धात्री काचिदनुत्तमा शक्तिः च अस्ति।

## संस्कृतस्य भाषाशास्त्रीयमहत्वम्

भारोपीयपरिवारे संस्कृतभाषेव प्राचीनतमा तन्मूलकमेव भाषाविज्ञानस्य उद्भवः । संस्कृतं, ग्रीक, लैटिन भाषाणां तुलनात्मकेनाध्ययनेन भाषाविज्ञानस्य उद्भवः। संस्कृतभाषाश्रयेण सर्वा अपि भारतीयभाषाः सारल्येनावगन्तुं पार्यन्ते । यतो हि तत्र प्रतिशतं षष्ठिप्रतिशतादारभ्य अशीतिप्रतिशतं यावत् संस्कृतशब्दाः प्रयुज्यन्ते । एवं विज्ञायते भाषाविज्ञानदृष्ट्या संस्कृतभाषा अमूल्यनिधिः विद्यते।

## अन्ताराष्ट्रियमहत्वम्

" संगच्छध्वं सवदध्वं संवो मनांसि जायताम् " " एकं सद् विप्रा वहुधा वदन्ति " केवलाघो भवति केवलादि इत्येतादृशाः विचाराः संस्कृतभाषायामुपलभ्यमानाः अस्मान् अन्ताराष्ट्रियजीवनाय प्रेरयन्ति । जवाहार लाल नेहेरू महोदयः विशदयति यत् भारतीयप्राचीनसंस्कृति अस्मान् सहनशीलतां

शिक्षयति । वर्तमानभारतस्य विदेशनीतौ एते एव नियमाः पञ्चशीलरूपं धारयन्ति । अन्ताराष्ट्रियक्षेत्रे अस्माकम् उदात्ताः प्राचीनादर्शाः कार्यान्विताः भवेयुः ।

**कलात्मकमहत्वम्**

वैदिककाले कलानामपि उन्नतिः जायते स्म । मूर्तिकला चित्रकला च भारते प्रसिद्धे आस्ताम् । एतदतिरिक्तं नाट्यकला अभिनयसामग्री, वेशभूषा, संगीतं, नृत्यम् इत्यादयः चतुषष्ठिकलाः संस्कृतग्रन्थेषु वर्णिता उपलभ्यन्ते । प्राचीनकाले इव पुनरपि भारतं लोके सर्वेषु राष्ट्रेषु अग्रस्थानं प्राप्नुयात् ।

**भारते भातु भारती**

यदि भारतस्य सर्वाङ्गीणा समुन्नतिः काम्यते विकासश्चाभिलशिता तर्हि संस्कृतस्य प्रचारः प्रसारश्च नितरामनिवार्यम् । वैदिकसाहित्याद् उद्भूता सेयं संस्कृतभाषापरम्परा अद्यावधिः जीवति । मातृभाषाभाषिणो जनाः संस्कृतवाङ्मयज्ञानाभावात् स्वीयम् आनन्दमेव प्रदर्शयन्ति । हर्षावहोऽयं विषयो यदद्यत्वेऽपि संस्कृतसाहित्यं, काव्यानि, नाटकानि, गीतिकाव्यानि गद्यसाहित्यं, विविधपत्रपत्रिकाश्च प्रतिसंवत्सरं प्रकाश्यन्ते । सहस्रशो लक्षशश्च तेषामध्येतारः दरीदृश्यन्ते । भारतसर्वकारोऽपि विषयेऽस्मिन् जागरूकताम् प्रदर्शयति ।

संस्कृतभाषा अध्ययनेन मेक्समूलरवत् अनेके इसाई जनाः भारतं इसाईदेशं निर्मातुं स्वप्नं पश्यन्ति स्म । परन्तु ते स्वयं भारतीयसंस्कृतेः सभ्यतायाः पूर्णभक्तरूपेण परिगण्यन्ते । यावत् भारतवर्षे सस्कृतं जीवितं भविष्यति तथा भारतं स्वीय अमूल्यसम्पत्तिः गोपयिष्यति, तावत् भारतवर्ष अखण्डरूपेण जीवति । भारते संस्कृतस्य विनाशेन भारतवर्षस्य सर्वनाशः अवश्यम्भावी वर्तते।

## राष्ट्रियशिक्षानीतिः

✍ दीपक सरकार

अनुक्रमाङ्कः – 31

भारतशासनेन राष्ट्रियशिक्षानीतिः 1986 शिक्षायां प्रास्तावि । राष्ट्रियशिक्षायां नीतिरेषा नवशिक्षानीतिनाम्ना ख्याता वर्तते । एषा द्वादशसङ्ख्याकेषु खण्डेषु सप्तपञ्चादशादधिकैकशततमेषु बिन्दुषु च लिपिबद्धा वर्तते । एतेषां संक्षिप्तं निरूपणमत्र विधीयते ।

**राष्ट्रियशिक्षाव्यवस्था**

भागेऽस्मिन् राष्ट्रियशिक्षायाः स्वरुपं निरूपितं वर्तते । यत्र समानतायाः सिद्धान्तोऽपि स्वीकृतो वर्तते । एतस्याः शिक्षायाः विकासस्य कृते विश्वविद्यालयानुदानायोगप्रभृतीनां संस्थानां सुदृढीकरणस्याऽऽवश्यकता प्रतिपादिता ।

**शिक्षायाः समानता**

नूतनशिक्षानीतौ शिक्षायां व्याप्तस्य वैषम्यस्य उन्मूलनस्य सङ्कल्पो विहितो वर्तते । बिन्दावस्मिन् अनुसूचितजातीयानाञ्च शैक्षिकविकासस्य महत्वं प्रतिपादितं वर्तते । तत्र शिक्षारम्भ एव छात्रवृत्तिप्रदानादिकं प्रोत्साहनं प्रस्तावितं वर्तते ।

**अनुसूचितजनजातीयानां शिक्षा**

एतस्मिन् बिन्दावादिवासिनां जनजातीयानां कृते तेषां क्षेत्रेषु विद्यालयानामुद्घाटनम्, तेषां मातृभाषायां शिक्षणम्, शिक्षितेभ्यः शिक्षकप्रशिक्षणम्, छात्रवृत्तिप्रभृतीनामुपायानां निरूपणं वर्तते । एतेषां शिक्षायै सुव्यवस्थायाः सङ्कल्पो नीत्यां कृतो वर्तते । तेभ्यः पृथग्रूपेण शिक्षासंस्थानानाम् उद्घाटनस्य सुविधाः प्रदेया इति ।

**प्रौढशिक्षा**

शिक्षायाः परम्परायां प्रौढशिक्षायाः महत्वमत्र प्रदर्शितं वर्तते । तेषु व्यावसायिककुशलतायां वृद्धिरपि प्रस्ताविता वर्तते । प्रौढानां शिक्षायै जनसञ्चारमाध्यमानां सहयोगः स्वीकरणीयः । नीतौ सततशिक्षाया अपि प्रस्तावो वर्तते ।

**विविधेषु स्तरेषु शिक्षायाः पुनर्घटनम्**

बालानां राष्ट्रियनीतेः प्रस्तावानुसारं पुष्टाऽहाराय शरीरिकविकासाय, नैतिकविकासाय, परिचर्यायै च प्राथमिकता प्रदेया । स्थाने स्थाने दिवसपरिचर्याकेन्द्राणाम् उद्घाटनस्यापि समुल्लेखो शिक्षानीतौ वर्तते । बालानां कृते क्रीडाधारितायाः शिक्षायाः व्यवस्था नीतौ प्रतिपादिता वर्तते ।

चतुर्दशवर्षवयः पर्यन्तानां बालानां विद्यालयेषु नामाङ्कनं शिक्षा च देया। अत्रैव शैक्षिक–स्तरस्योन्नयनस्य सङ्कल्पो विद्यते । बिन्दावस्मिन् बालानां मनोभावानुरूपं शिक्षणं प्रस्तावितं वर्तते। तत्र शारीरिकदण्डस्य सर्वथा निषेधः प्रतिपादितो वर्तते । अत्र विद्यालयभवनानामाकृत्यादिकं प्रस्तावितम् । शिक्षणसामग्रीणां श्यामपट्टाभियानस्य प्रस्तावो वर्तते । येषां शिक्षा निर्धारिते काले परिसमाप्तिं न गता, ये च कर्मरताः वर्तन्ते तेषां कृते अनौपचारिकशिक्षायाः व्यस्थायाः प्रस्तावो वर्तते। अनौपचारिकशिक्षायाः कृते स्वैच्छिकसङ्घटनानां सहयोगः स्वीकार्यः। नूतनशिक्षानीतौ शिक्षायाः क्रमिकस्य विकासस्य चित्रमेतस्मिन् बिन्दौ कृतं वर्तते ।

**माध्यमिकशिक्षा**

स्तरेऽस्मिन् पाठयचर्यायाः विषयः सह व्यवसायानामपि स्थानं नीतौ प्रस्तावितं वर्तते। ग्रामेषु स्थलेषु माध्यमिकविद्यालयानामुद्घाटनस्य प्रस्तावोऽत्र विलसति । उत्तमशिक्षायाः कृते एतेषां विद्यालयानां सर्वेषां प्रतिभावतां कृते उद्घाटनं भवेदिति प्रस्तावितं वर्तते । एताः शाला आवासीयाः निःशुल्काश्च भवेयुः । शिक्षानीतौ अस्मिन् बिन्दौ छात्रेषु व्यावसाकिदक्षताया उपायाः निर्देशिताः वर्तन्ते । एतेन ते आत्मनिर्भराः भविष्यन्ति । माध्यमिकस्तरे शासनं प्रवेशनीतेर्पुनरीक्षणं विद्यास्यतीति।

**उच्चशिक्षा**

एतस्मिन्नेव स्तरे शिक्षकाणामुत्पादनं भवति । एषा हि शिक्षा सक्रिया विधेया । तत्रानुसन्धानं प्रोत्साहितं भविष्यति । उच्चशिक्षायाः विकासायैकस्य राष्ट्रियस्य निकायस्य स्थापना प्रस्ताविता नीतौ। उच्चशिक्षायै अवसरान् जनयितुं मुक्तविद्यालयानाम् उद्घाटनं सावधानतया भविष्यति। सुदूराध्ययनव्यवस्थायाः विस्तारोऽपेक्षितो वर्तते । चयनितक्षेत्रेषु उपाधीनां नियोजनतः पृथक्करणं भविष्यति । राष्ट्रियपरीक्षणसेवायाः व्यवस्थायाः कार्यान्वयनम् भविष्यति ।

**प्रविधिशिक्षा प्रबन्धशिक्षा च**

उभयोः शिक्षयोः परस्परसम्बन्धात् एतयोर्विकासस्य प्रयासाः भविष्यन्ति । जनशक्तिसूचनाप्रणाल्याः विकासो भविष्यति । अत्रैव सङ्गणकसाक्षरतायाः प्रस्तावोऽपि वर्तते । नूतनान्वेषणपद्धतेः विकासो व्यवस्थितरीत्या विधेयः ।

**सर्वेषु स्तरेषु दक्षतायाः प्रभावोत्पादकतायाश्च विकासः**

प्राविधिशिक्षाया आधुनिकीकरणं भविष्यति । तत्र बालिकानां कृते छात्रावासादिसुविधानां व्यवस्था भविष्यति । शिक्षकाः स्वकीयानां महत्वपूर्णभूमिकानां निर्वाहं करिष्यन्ति । संस्थानां जनानाञ्च महत्वपूर्णेभ्यः कार्येभ्यो मान्यता भविष्यति। प्रबन्धपद्धतिषु सम्भावितं परिवर्तनमनुलक्ष्य प्रभावोत्पादनरीतीनां निर्माणं विधीयते । अखिलभारतीयप्राविधिकशिक्षापरिषदः प्रस्तावाः व्यवहारे कार्यान्विताः भविष्यन्ति ।

**शैक्षिकविषयाणां प्रक्रियाणाञ्च नवीकरणम्**

येन केनापि प्रकारेण संस्कृतिहीनता, अमानवीयता, पृथक्करणभावना च दूरीकरणीया । एतस्मिन् अध्याये ललितकलादिविषयेष्ववधानस्य सङ्कल्पोऽस्ति । सामाजिकानां नैतिकानाञ्च मूल्यानामभिवर्धनाय शिक्षायाः पाठ्यचर्यायां परिवर्तनं विधेयम् । मूल्यशिक्षायाः रूढिवादः धर्मान्धता, हिंसा, अन्धविश्वासश्च विनष्टो भविष्यतीति । वैदेशिकभाषायां विरचितानां ग्रन्थानां भारतीयभाषासु अनुवादाय अनुवादकाः प्रोत्साहनीयाः। प्रचलितेषु ग्रन्थालयेषु परिष्कारो नूतनानाञ्च स्थापनाय प्रयासाः व्यापके स्तरे विधेयाः ।

शैक्षिकप्रौद्योगिक्याः प्रसारः सर्वत्र विधेयो येन सर्वे लाभान्विताः भवेयुः। एतस्याः शिक्षणप्रशिक्षणस्य प्रसारोऽपि स्यात् । शिक्षायाः उद्देश्यपूर्तये दूरदर्शनम् , रेडियो, चलचित्रप्रभृतीनां माध्यमानां उपयोगः करणीयः ।

**संसाधनं समीक्षा च**

अध्यायेऽस्मिन् शिक्षासंस्थानां प्रचालनाय वित्तीयानां संसाधनानां स्रोतांसि प्रदर्शितानि ।

सकलपरिव्ययस्य षट् प्रतिशतपरिमितं धनं शिक्षायै व्ययीकरणस्य प्रस्तावोऽप्यत्र प्रदत्तो वर्तते । शिक्षानीतेः प्रथमभागेऽस्मिन् तस्याः कार्यान्वयस्य मानदण्डानाञ्च समीक्षा पञ्चसु वर्षेषु अवश्यं विधेया इति प्रतिपादितं वर्तते । कार्यान्वयनस्य प्रगतेः च समये समये जायमानानां प्रवृत्तीनाञ्च निश्चयो यथावसरं भविष्यति ।

एतस्मिन् भागेऽतीव जटिलशिक्षायाः लक्ष्यस्य प्राप्तेः कामना कृता वर्तते । मानवसंसाधनस्य विकासे शिक्षायाः भूमिका महत्वपूर्णा इति निरूपितं वर्तते ।

## डा. सर्वपल्लीराधाकृष्णानुसारेण शिक्षणम्

✍ पार्श्वनाथ जैन

अनुक्रमाङ्कः – 32

डा. राधाकृष्णन् महोदयस्य पूर्णं नाम सर्वपल्लीराधाकृष्णन् वर्तते। राधाकृष्णन् महोदयो उद्भटो दार्शनिकः, प्रख्यातो वक्ता, धर्मस्य विद्यायाश्च सजीवा प्रतिमूर्तिः, महान् मानवश्च आसीत्। एतेषां जन्म सेप्टेम्बर मासस्य पञ्चमे दिनाङ्के 1888 तमेऽब्दे मद्रासनगरस्य 'तिरुतणी' एति स्थले एकस्मिन् धार्मिकमध्यमवर्गस्य तेलुगुब्राह्मणस्य परिवारे अभवत्।

**राधाकृष्णन् अनुसारेण शिक्षादर्शनम्**

राधाकृष्णन् महोदयः प्रख्यातो दार्शनिको आसीत्। दार्शनिकत्वात् तस्य शिक्षादर्शने धार्मिकानां नैतिकानां लोककल्याणस्य विचाराणां सामञ्जस्यं भारतीयसंस्कृतिं प्रति उदारभावं विश्वबन्धुत्वस्य भावनायाश्च प्रामुख्यं वर्तते । तन्मते विश्वस्य सर्वे एव मानवा एकस्यैव कुटुम्बस्य सदस्याः वर्तन्ते।

**शिक्षायाः अर्थः**

राधाकृष्णन् महोदयः शिक्षा जीवनाय परमावश्यकी इति अमन्यत्। सः क्षणिकस्य ज्ञानस्य कौशलस्य च विकासायैव शिक्षा आवश्यकी इति न मनुते स्म, प्रत्युत स जीवनयापनकलादक्षतां सम्पादयितुमपि अनिवार्यम् इति मनुते स्म। तन्मते वयं शिक्षकाद् अधिगच्छामः, स्वयमप्यधिगमं कुर्मः, जीवनेन शिक्षणं प्राप्नुमः। राधाकृष्णन् महोदयेन शिक्षायाः अधोलिखितपक्षेषु बलं प्रदत्तम्। यथा –

1. शिक्षा प्रकृतिम् अनुशास्ति ।
2. शिक्षा विकासस्य प्रक्रिया वर्तते।
3. शिक्षा रूपान्तरणं करोति।

4. शिक्षा अभिवृद्धिः वर्तते।
5. शिक्षा अनवरतं प्रवर्धमाना प्रक्रिया वर्तते।
6. ज्ञानस्य स्वकीये गहनरूपे शिक्षा वर्तते।
7. शिक्षा मानवस्य नैतिकं विकासं करोति।

**शिक्षायाः उद्देश्यम्**

राधाकृष्णन् महोदयस्य मते शिक्षा मानवसमाजयोर्निर्मात्री भवेत् । सः शिक्षायाः प्रमुखम् उद्देश्यं पूर्णमानवस्य निर्माणमिति स्वीकरोति स्म। तन्मते शिक्षायाः उद्देश्यानि –

1. शिक्षा जनं बुद्धिज्ञानयोः समन्वयस्थापनाय विकासाय च तत्परं कुर्यात् ।
2. शिक्षा सामाजिकविकासाय सामाजिकयुक्तये च कार्यं कुर्यात् ।
3. शिक्षा समाजस्य निर्माणे कुशलानां चरित्रवताञ्च नागरिकाणां विकासं कुर्यात् ।
4. शिक्षा सामाजिकोन्नतये सत्यान्वेषणाय च कार्यं कुर्यात् ।
5. आत्माभिव्यक्तेर्विकासः शिक्षयैव कार्यः ।

**पाठ्यचर्चा**

राधाकृष्णन् महोदयः शिक्षायाः पाठ्यचर्चायां दर्शनस्य, साहित्यस्य, विज्ञानस्य, इतिहासस्य, कृषेः, अर्थशास्त्रस्य, मानवशास्त्रस्य चेत्यादीनां विषयाणां स्थानं वाञ्छति स्म। बालकानां पाठ्यचर्चायां स पाकशास्त्रं, हस्तकौशलम्, गृहविज्ञानम्, नीतिशास्त्रम्, ललितकला प्रभृतिविषयाणां इति ।

**शिक्षणविधिः**

राधाकृष्णन् महोदयानुसारेण शिक्षणप्रक्रिया एकध्रुवीया नास्ति, अपितु द्विमुखी परस्परक्रियात्मिका च प्रक्रिया वर्तते ।

**प्रत्यक्षविधिः**

एतेन विधिना शिक्षको बालकेभ्यः शब्दानां, प्रत्ययानां परिचयं कर्तुं शक्नोति। सर्वेषां विज्ञानानामध्ययनमध्यापनञ्च प्रत्यक्षविधिना सम्भवति । यतो हि प्रत्यक्षतया प्रदत्तं ज्ञानं स्थायी भवति।

**अनुमानविधिः**

एतस्य मतमासीद्यत् विज्ञानस्य, गणितस्य, समाजशास्त्रस्य च अध्ययने अनुमानविधेः प्रयोगः समुचितो वर्तते।

**शब्दविधिः**

राधाकृष्णानुसारेण स्थायीज्ञानं शब्धविधिनैव प्रदेयम् । यतो हि 'शब्दः' नाम स्वतन्त्राश्रितो वर्तते।

**शिक्षायाः संरचना**

प्रचलितशिक्षायाः गुणवत्ता परिष्करणीया । येन भारतीयानां लोकानां जीवनस्तरमुन्नतं भवेत् इति चिन्तनं राधाकृष्णन् महोदयस्य आसीत् । अतः स्वतन्त्रभारतस्य कृते 10+2+3 इत्येतस्याः शिक्षायाः संरचनायाः प्रतिपादनं अकरोत् ।

**शिक्षकः**

डा. राधाकृष्णन् महोदयः मानवतावादिविचारकः प्राचीनभारतीयसंस्कृतेश्च प्रतिपादक आसीत्। अस्य मते "यस्य ज्ञानस्यात्मना अन्यस्याऽऽत्मनि शक्तेः सञ्चारो भवति स गुरुरुच्यते। यस्य च आत्मनि सा शक्तिः सञ्चर्यते, सः शिष्यः इति कथ्यते"। सः समाजे शिक्षकस्य स्थानमतीवमहत्वपूर्णं स्वीकरोति।

**अनुशासनम्**

अनुशासनेन कस्यचित् प्राणिनः चरित्रस्य प्रज्ञानं भवति। अनुशासनेन मानवः समाजे उत्तमस्थानं प्राप्नोति। तेन सौम्यस्वभावस्य सद्भावस्य चोन्मेषो भवति।

**स्त्रीशिक्षा**

तन्मते स्त्रीष्वात्मत्यागस्य अहिंसायाश्च भावनाः बलवत्यः भवन्ति । तासां शिक्षायाः सङ्कल्पना शारीरिके स्तरे न विधेया प्रत्युत मानसिकधरातले करणीया। महिलानां कृते प्रधानतया पाकशास्त्रम्, हस्तकौशलम्, गृहविज्ञानम्, नीतिशास्त्रम् बोधनीयम् इति मनुते ।

**राधाकृष्णन् महोदयस्य शैक्षिकयोगदानम्**

राधाकृष्णन् दार्शनिकचिन्तनस्य धारायाः प्रवाहेण प्राच्यपाश्चात्यसंस्कृत्योर्मिथः सम्बन्धः समन्वयश्च अभवत् । जनेषु मानवीयानां गुणानां विकासाय महत्वं ददाति स्म । सः भारतस्य राष्ट्रपतिपदे आरूढः भूत्वाप्यात्मानं शिक्षकरूपेण मनुते स्म। अतः एव अस्य जन्मदिनं भारते "शिक्षकदिवस" इति श्रद्धया आयोज्यते।

## शिक्षयां दण्डनीतिः

✍ शिवम् कुमार शुक्लः

अनुक्रमाङ्कः – 33

छात्राणां एवं शिक्षकाणां च इतिहासम् अनुशीलयामः चेत् ज्ञायते यत् प्राचीना शिक्षाप्रणाली दण्डनीत्याश्राता आसीत् । यस्याः लक्ष्यम् आसीत् शारीरिकदण्डद्वारा आत्मानुशासनस्य भावनायाः विकासः । तदानीं दमनवादिविचारधारायाः उपरि राजनैतिकविचारधारायाः प्रभावः आसीत् । दमनवादिसिद्धान्तम् आधारीकृत्य शिक्षकाः छात्राणां व्यक्तित्वनिर्माणे शारीरिकदण्डप्रदानेन छात्राणां दुर्गुणान् परिशोध्य सद्गुणान् अभिवर्धयन्ति स्म । केषांचित् कथनमस्ति यत् बालकानां अन्तः

दुर्गुणाः निवसन्ति ये दुर्गुणाः सर्वदा बालकान् दुराचारे प्रेरयन्ति । अतः तान् दुर्गुणान् दमयितुं एव दण्डनीतिः साधनत्वेन अनुसर्तव्या । वैदिककाले अपि दण्डस्य विधानमासीत् । यदि छात्राः अपराधं कुर्वन्ति तदानीं तर्जनम्, भोजनस्य निषेधः, शीतजले स्नानम् एते दण्डाः निर्धारिताः आसन्।

लालने बहवो दोषाः ताडने बहवो गुणाः।
तस्मात् पुत्रञ्च शिष्यञ्च ताडयेन्नतु लालयेत्।।

महाभाष्ये अपि अनुदात्तस्वरम् उदात्तम् एवम् उदात्तस्वरम् अनुदात्तकथने आचार्येण चपेटायाः संकेतं कृतमस्ति।

य उदात्ते कर्तव्येऽनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटाम् ददाति

सुभाषितञ्च केनचित्

लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ।।

**शिक्षायां दण्डनीतिपक्षे तर्काः**

☞ बालकः जन्मतः एव दुष्टः एवं पापी भवति। तस्य ह्रदयस्य क्रूरतां निवारयितुं दण्डः अवश्यं देयः।

☞ दण्डनीतेः समर्थकानां मतम् अस्ति यत् शिक्षकस्य दण्ड एव बालकं स्वाध्यायं प्रति प्रेरयति।

☞ तेषां मतानुसारं नियन्त्रणं अथवा दण्डेन दुष्टच्छात्राः अपि अनुशासिताः भवन्ति एवं पठने तेषां रुचिः अपि आयाति ।

☞ जेरिमिया महोदयस्य मतानुसारं बालकं उत्तमनागरिकं कर्तुं अवश्यं दण्डः देयः इति ।

**दण्डनीत्याः विपक्षे तर्काः**

☞ दण्डनीतिः पूर्णतया अमनोवैज्ञानिकप्रक्रिया अस्ति।

☞ दण्डेन छात्रस्य मनोवृत्तिः, इच्छाशक्तिः, रुचिः इत्यादीनां दमनं भवति ।

☞ दण्डप्रक्रिया शिक्षकं अनुचितबलं प्रयोक्तुं स्वतन्त्रतां प्रददाति ।

☞ दण्डप्रक्रिया द्वारा प्रजातन्त्रात्मकादर्शाणां पतनं भवति ।

☞ छात्राणां ह्रदये प्रतिकूलात्मकभावाः उत्पद्यन्ते ।

☞ दण्डनीतिः अनुचितं वातावरणं निर्माति एवं दण्डनीतिः छात्राणां स्मरणशक्तिमपि नाशयति ।

☞ विद्यालये दण्डं दीयते इति मनसि निधाय छात्राः विद्यालयं नागच्छन्ति, तेषां पठने रुचिरपि नश्यति।

☞ निरन्तरदण्डस्य भयकारणेन छात्राः मानसिकरोगेणपीडिताः भवन्ति एवं तेषां शारीरिकविकासोऽपि न भवति।

☞ कामेनियस् महोदयेन एतादृशविद्यालयानां संज्ञा पशुहननस्थानमिति मत्वा निन्दाम् अकरोत् । एवं छात्राणां कृते दण्डेन न अपितु प्रेम्णा शिक्षां दातुं निर्देशं दत्तं विद्यते ।

एवं च मनोवैज्ञानिकानामेव दार्शनिकानां मतमस्ति यत् शिक्षायां दण्डः कदापि न देयः । भारतीयसंविधानेऽपि 2009 तमे वर्षे सप्तदशधारायाः अन्तर्गतशिक्षायां दण्डः मास्तु इति कृत्वा नियमः उल्लिखितः अस्ति ।

- धारा 17 (1) छात्राय दण्डः न देयः शारीरिकं वा भवतु मानसिकं वा भवतु ।
- धारा 17 (2) प्रथमधारायां दत्तनियमस्य यदि कोऽपि उल्लङ्घनं करोति तर्हि सर्वकारेण तस्मै दण्डः दीयते ।

शिक्षायां दण्डस्तु पूर्वकालेऽपि आसीदिति मत्वा शिक्षकाः शनैः शनैः लघुत्रुटिं स्वीकृत्य दण्डं प्रारब्धवन्तः । अनन्तरं लोकोक्तिनां निर्माणमपि जातम् । यथा –

"गुरुजी मारें धम–धम, विद्या आये छम – छम्" ।

एषा लोकोक्तिः मम बाल्यकाले मया बहुधा श्रुतमस्ति । शिक्षायां दण्डकारणेन छात्राः भीताः भवन्ति एवं विद्यालयं गन्तुं न इच्छन्ति । दण्डकारणात् एव बालकाः अध्ययनं मध्ये एव त्यजन्ति। भोपालराज्यस्य एकस्मिन् विद्यालये षड्वर्षीय अनमोलं तस्य एका शिक्षिका तं बहु ताडितवती । तेन कारणेन तस्य हस्तः भग्नः जातः । सः आङ्गलभाषायां दोषमाचरितवान् इति दण्डः दत्तः आसीत् । शिक्षायां दण्डः छात्राणां कृते शिक्षायाः अधिकारस्य हननं करोति । दण्डकारणेन छात्राणां मनसि आत्महननविषये विचाराः समुत्पन्नाः भवन्ति । अतः एव भारतीयसर्वकारेण शिक्षायां दण्डः अपराधरूपेण स्वीकृतोऽस्ति ।

## शिक्षादर्शनम्

✍ भुवनेश नौड़ियाल

अनुक्रमाङ्कः – 34

शिक्षा चैतन्यप्रक्रियास्ति । यामुचितरूपेण संचालयितुं दर्शनस्य आवश्यकता अस्ति । विना मार्गदर्शनस्य शिक्षा स्वलक्ष्यं कदापि प्राप्तुं न शक्यते । दर्शनं जीवनस्य वास्तविकलक्ष्यं निर्धारयति । लक्ष्यस्य प्राप्त्यै उचितमार्गदर्शनमपि करोति । अनेके दार्शनिकविचारधाराः समये समये शिक्षायाः विभिन्नाङ्गानि प्राभावयन् ।

**दर्शनस्य अर्थः**

दर्शनस्य शाब्दिकः अर्थः – " दृश्यतेऽनेनेति " व्युत्पत्या दर्शनपदं दृश (दर्शने) धातोर्ल्युटि निष्पन्नम् । दृश्यते तत्त्वज्ञानं प्राप्यते अनेनेत्यर्थः । दर्शनं जीवनस्य सर्वस्मिन् पक्षे प्रकाशं वितरति। दर्शनपदम् आङ्गलभाषायाः फिलोसफी (phiosopha) इति पदस्य रूपान्तरं वर्तते । अस्य शब्दस्य उत्पत्तिः ग्रीकस्य द्वाभ्यां शब्दाभ्यां भवति । सर्वप्रथमं फिलोस (philos) तथा सोफिया (sophia) इति संस्कृतभाषायां दर्शनशब्दस्य अत्यन्तं व्यापकमर्थं प्रकटितवान् अस्ति ।

**शिक्षा**

शिक्षाशब्दस्य आविर्भावः संस्कृतस्य शिक्ष् धातोः निष्पन्नं भवति । अमरकोशे शिक्षा शब्दस्य प्रयोगः षड्वेदाङ्गेषु एकस्य वेदाङ्गस्य कृते प्रयुक्तं भवति । तस्मिन् समये शिक्षाशास्त्रस्य प्रयोजनं वेदानां ऋचाणां शुद्धोच्चारणशिक्षार्थमभवत् । कदाचित् तस्मिन् युगे वेदानां पठनं पाठनमेव शिक्षायाः एकमात्रमुद्देश्यं आसीत् । आङ्गलभाषायां शिक्षा (Education) उक्तमस्ति या लैटिनभाषायाः (educatum) शब्देन निर्मितमस्ति । यस्य वास्तविकार्थमस्ति जन्मजातबालकस्य शक्तीः अन्तस्तात् बहिः विकसितं विदधति ।

शाब्दिकार्थस्य अनुसारं शिक्षा एका विकाससम्बन्धी प्रक्रियास्ति । अस्य विकासस्य गतिं एवं प्रकृतिं प्रारम्भं कर्तुं बालकस्य प्रकृतेः अवगमनमावश्यकं भवति । वर्तमानसमये शिक्षायाः प्रयोगः अनेकेषु सन्दर्भेषु भवति । प्रयोजनवादी दार्शनिकाः जॉन.डी.वी तथा च भारतीयदार्शनिकानां विचारकाणां महात्मागान्धीनामनुसारं – शिक्षा आजीवनपर्यन्तं प्रवहमाना प्रक्रियास्ति तथा अनुभवैः अस्माकं व्यवहारेषु किमपि परिवर्तनमायाति तत् शिक्षायाः फलस्वरुपेणैव जायते ।

**दर्शनं तथा शिक्षायाः सम्बन्धः**

विद्वासः दर्शनं तथा शिक्षा एकैव अस्ति इति वदन्ति । दर्शनं शिक्षायाः विभिन्नाङ्गानि प्रभावयति । अतः वक्तुं शक्यते शिक्षादर्शनयोः अन्योन्याश्रयः सम्बन्धः वर्तते इति ।

**शिक्षायाः उद्देश्यं जीवनस्य लक्ष्यं च**

जीवनलक्ष्यस्य निर्धारणं दर्शनं करोति । अस्य लक्ष्यस्य प्राप्तये जीवने बहून् प्रयत्नान् कुर्वन्ति । शिक्षा सामाजिकजीवनस्य एकः महत्त्वपूर्णघटकः अस्ति, यः लक्ष्यस्य प्राप्तौ महत्त्वपूर्णयोगदानं ददाति । गान्धीवर्यैः उक्तम् – जीवनस्य लक्ष्यं तथा शिक्षायाः लक्ष्यं न भिन्नं भवितुमर्हति इति ।

# शिक्षादर्शनयोः सम्बन्धः

✍ स्वर्णलता मूधुलि

अनुक्रमाङ्कः – 35

**शिक्षाशब्दस्य उत्पत्तिः**

'शिक्षा' इति शब्दः शिक्ष् विद्योपादाने धातोः अजाद्यतष्टाप् सूत्रेण 'टाप्' प्रत्ययात् निष्पन्नोऽस्ति। यस्य च अर्थः भवति शिक्षणम् अध्ययनं वा । शिक्षा शब्दस्य पर्यायवाचकः शब्दः विद्या, ज्ञानम् इत्यादीनि । आङ्गलभाषायां शिक्षा इति शब्दः 'Education' नाम्नाभिधीयते ।

**दर्शनस्य उत्पत्तिः**

इदानीं दर्शनम् इत्युक्ते प्रेक्षणार्थकाद 'दृश' धातोः ल्युट प्रत्यये दर्शनमिति पदं सिद्धम् । 'ज्ञानचक्षुषा यद् गृह्यते तद् दर्शनम्' । तथा च येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, जीवात्मा, प्रकृतिश्च यथातथ्येन दृश्यते निरीक्ष्यते, परीक्ष्यते, समीक्ष्यते, विविच्यते च तद् दर्शनम् । दर्शनम् इत्यस्य आङ्गलपदं भवति 'Philosophy' इति । इदं च 'Philosophy' पदं यूनानी(Greek, Philos, Sophia इति पदद्वयात् निष्पन्नम् ' Philos' शब्दस्य अर्थः भवति स्वम् एवं Sophia शब्दस्य अर्थः भवति Wisdom । अर्थात् विद्यानुरागः, ज्ञानानुरागश्चेति ।

**परिभाषा**

"विचारप्रयोज्यज्ञानं दर्शनम्" ।

'प्रकृतेः तात्विकान्वेषणं दर्शनम्' इति Dr. Radhakrshn वर्येण उक्तम् ।

**शिक्षादर्शनयोः मध्ये सम्बन्धः**

केचन वदन्ति दर्शनस्य एका शाखा 'शिक्षादर्शनम्' इति । शिक्षादर्शनयोः मध्ये व्यापकः प्रगाढः सम्बन्धः अस्ति । रूसोवर्येण शिक्षा दर्शनं च एकस्यैव नाणकस्य पार्श्वद्वयमिति उक्तम् । दर्शनं नाणकस्य सैद्धान्तिकभागस्य व्यावहारिकं रूपम् अथवा क्रियात्मकरूपम् अथवा आचरणात्मकरूपं भवति । आचरणस्य कृते सिद्धान्तः मार्गदर्शकः न भवति चेत् आचरणं लक्ष्यविहीनम्, अनिश्चितं, असंगतम्, असमर्थं च भवेत् । एवमेव सिद्धान्तस्य कृते आचरणं यदि न भवति तर्हि सोऽपि सिद्धान्तः निरुपयुक्तः, अव्यवस्थितः, अस्पष्टश्च भवेत् । अतः शिक्षादर्शनयोः मध्ये अविनाभावसम्बन्धः अथवा अन्योन्याश्रयः सम्बन्धो वर्तते ।

शैक्षिकसमस्यानां समाधानाय दर्शनशास्त्रम् अपेक्षते। शिक्षायाः सर्वेषु क्षेत्रेषु दर्शनस्य प्रभावः दृश्यते। यथा शिक्षायाः सिद्धान्तानामुपरि, उद्देश्यानामुपरि, पाठ्यक्रमाणामुपरि प्रभावः अस्ति।

यदि शिक्षा काचिद् प्रयोगशाला भवति तर्हि अस्यां प्रयोगशालायां दार्शनिकसिद्धान्तानां विधीनां परीक्षणं भवति । अतः एव शिक्षा दर्शनं विना अपूर्णं भवति । दर्शनं विना शिक्षायाः विकासः न भवति।

✽ ✽ ✽

## वर्तमानयुगे नारीणां स्थितिः

✍ रश्मिता वेहेरा

अनुक्रमाङ्कः – 36

काले काले राष्ट्रस्य अभ्युदयाय स्त्रीणां भूमिका महती वर्तते । समाजे स्त्रियः क्षमतायाः प्रतिभायाः च प्रतिमूर्तिरुपाः । सत्यमेतद् यद् वैदिककाले, स्मृतिकाले, रामायणमहाभारतादिकाले च नारीणां स्थितिः अतीव गौरवास्पदम् आसीत् । सा गृहिणी, गृहस्वामिनी, परिवारकल्याणकारिणी च आसीत् । "जायेदस्तम्" ( ऋग–3.53.4 ) जाया एव गृहं मन्यते स्म । "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" ( मनु – 3.56 ) यत्र नारीणां पूजा सम्मानं च क्रियते तत्र देवानाम् निवासः।

प्रायशः एकशताब्देः पूर्वं नारी स्वातन्त्र्यस्य स्वायत्तायाश्च आन्दोलनं प्रारब्धम् । एतस्य आन्दोलनस्य प्रवर्तकाः मुख्यत्वेन सन्ति स्वामिदयानन्दसरस्वती, राजाराममोहनरायः, महात्मागान्धी, रवीन्द्रनाथठाकुर प्रभृतयः । एते प्रगतिशीलविचारधारायाः समर्थकाः आसन् । नार्यः सुशिक्षिताः स्युः, समाजे तासां स्थानम् आदरास्पदम् भवेत् । तासु जागरणं स्यात् । ताः वाह्यकार्येषु, गृहकार्येषु शिक्षाक्षेत्रे, व्यापारक्षेत्रे, अन्येषु शिल्पकलादिकार्येषु च भवेयुः । एतेषां महापुरुषाणां प्रयत्नेन सतीप्रथा, बहुविवाहः, बालविवाहप्रभृतयः समाप्तप्राया एव ।

शिक्षा प्रतिदिनं वर्धते एव । ताः शिक्षिताः नार्याः विज्ञानक्षेत्रे, व्यवसायक्षेत्रे, व्यापारवाणिज्यसम्बन्धेषु कार्येषु महती क्षमतां द्योतयन्ति । न केवलमेतदेव अपि तु ताः क्रीडाक्षेत्रे, सैनिकसेवायाम्, राजकीयकार्येषु प्रशासनसंबद्धेषु च कार्येषु अपि स्वीयाम् उत्कृष्टतां साधयन्ति । विमानसंचालने, ग्रहोपग्रहानुसंधानसम्बद्धेषु अन्तरिक्षयानेष्वपि तासाम् उपस्थितिः अस्ति । शिक्षणकार्ये, चिकित्साक्षेत्रे, सेवाक्षेत्रे, प्रधानकार्येषु च नार्यः विशेषरूपेण अधिकं साफल्यम् लभन्ते । संगणकस्य उपयोगः सांप्रतं प्रतिगृहं प्रतिकार्यालयं च अनिवार्यत्वेन वर्तते । तत्र नार्यो विशेषरूपेण साफल्यं लभन्ते । अतः तासाम् एतादृशेषु उद्योगेषु प्रवेशो विशेषरूपेण विधीयते ।

कार्यक्षमतादृष्ट्या विचार्यते तर्हि एतद् वक्तुं सुकरम् यत् स्त्रियोऽपि पुरुषवत् सर्वं कार्यालयीयं कार्यम्, विज्ञानसंबद्धं कार्यम्, अनुसन्धानकार्यम्, व्यावहारिकं च कार्यं कर्तुं क्षमाः । विचारणीयं यत्

नारीषु पुरुषेषु च प्राकृतिको भेदोऽस्ति । पुरुषः शारीरिकदृष्ट्या हृष्टाः पुष्टाः सबलाः भवन्ति । नार्यश्च शरीरेण कोमलाङ्गाः भवन्ति । नारीषु गृहप्रबन्धनस्य, भोजनव्यवस्थायाः शिशुपालनस्य च अतिरिक्तो भारो भवति । नारी समाजे सत्यामपि जागरूकतायाम् समाजे दुष्प्रवृतेः प्रभावेण अपहरणबलात्कारादि समस्याः न निरोधम् प्राप्नुवन्ति । एषां निराकरणाय सामाजिकम् आन्दोलनम् सर्वथा अपेक्ष्यते ।

**शिक्षितनारीणां समस्याः**

शिक्षिताः नार्यः वृत्तिपराः भवन्ति । तासां विविधाः समस्याः साम्प्रतं लभ्यन्ते । तासाम् निराकरणं प्रवृद्धाः जनाः एव कर्तुं क्षमाः ।

1. **चरित्रशुचिता** – वृत्तिप्राप्त्यनन्तरं ताः परिवारेण चरित्रशुद्धिं प्रति सन्देहदृष्ट्या अवलोक्यन्ते ।

2. **सपत्निवत् व्यवहारः** – नारीणां वेतनं पुरुषस्यापेक्षया न्यूनं निर्धार्यते । समाने कार्येऽपि ताः समानं वेतनं न लभन्ते ।

3. **दाम्पत्यसंबन्धेऽपि कुप्रभावः** – वृत्तिपराः नार्यः यदि पृथक् पृथक् स्थाने नियुज्यन्ते, तदा तासां दाम्पत्यसम्बन्धोऽपि प्रभावितः भवति ।

## शैक्षिकपरिवेशे सम्प्रेषणम्

✍ मोहित जोशी

अनुक्रमाङ्कः – 37

व्यवहारे समुचितपरिवर्तनमेव शिक्षणम् । शिक्षणेनैव अधिगमो जायते । शिक्षणाधिगमप्रक्रियायां नावीन्यं सम्पादयितुं सम्प्रति प्रविधेः महद्योगदानं सर्वत्र परिदृश्यते । प्रविधेः कारणात् सम्प्रति वयम् अल्पकाले अल्पेन च श्रमेण अधिकाधिकं कार्यं युगपदेव साधयितुं शक्नुमः । ज्ञानप्राप्तिक्षेत्रे शिक्षणक्षेत्रे चायं प्रविधिः छात्रेषु अधिगमोत्पादनार्थं सततं प्रयतते । सर्वैरपि शिक्षा प्राप्तव्या एव । यतोहि शिक्षाप्राप्तिः सर्वेषां मानवानां जन्मगतोऽधिकार इति । उक्तमस्ति स्वामिविवेकानन्दमहोदयेन–

मानवातर्निहितपरिपूर्णदैवात्मकताभिव्यक्तिरेव शिक्षा ।

शिक्षायां तथा शिक्षणाधिगमप्रक्रियायां सम्प्रेषणस्य असाधारणं योगदानं कालानुरोधेन अभिवर्धत एव । सम् उपसर्गपूर्वकात् ईष् धातोः निष्पन्नोऽयं सम्प्रेषणमिति शब्दः । शिक्षोद्देश्यपूर्त्यर्थं

एकं साधनं माध्यमं वा भवति सम्प्रेषणम् । यत्र च छात्रशिक्षकयोर्मध्ये विचाराणाम्, अनुभवानां, अभिप्रेरणानां, संवेदनानां वा विनिमयप्रक्रियैव सम्प्रेषणमिति पदेन व्यपदिष्यते । सम्प्रेषणं तादृशं भवेत् येन ग्राहकः सम्पूर्णरूपेण अधिगतः स्यात् । इदं सम्प्रेषणं द्विधा प्रतिपाद्यते । तद्यथा –

1. शाब्दिकसम्प्रेषणम्
2. अशाब्दिकसम्प्रेषणम्

**1. शाब्दिकसम्प्रेषणम्** – ( Verbal communication )

शाब्दिकसम्प्रेषणं सर्वदा भाषायाः मौखिकरूपेण वाचा, लिखितरूपेण शब्दैः सङ्केतैः वा विचारान् अन्यान् प्रापयितुं सम्प्रेषयितुं प्रयोगः क्रियते । शाब्दिकसम्प्रेषणं पुनः द्विधा विभज्यते ।

1. मौखिकसम्प्रेषणम् ( Oral communication )
2. लिखितसम्प्रेषणम् ( Written communication )

**2. अशाब्दिकसम्प्रेषणम्** – (Non & verbal communication)

अशाब्दिकसम्प्रेषणे भाषायाः प्रयोगः नैव क्रियते । अपि तु शरीरस्य बाह्याङ्गान्येव अर्थात् चक्षुः मुखं तथा चर्मपादादि प्रमुखाः एव भवन्ति । अशाब्दिकं सम्प्रेषणं वयं बहुधा विभक्तुं शक्नुमः। केचन अंशाः अत्र प्रतिपाद्यन्ते । तद्यथा –

1. चक्ष्वादिमुखसङ्केतः
2. वाक्यसङ्केतः
3. उपकरणसङ्केतः
4. स्पर्शसम्पर्कसम्प्रेषणम्

**प्रमुखोद्देश्यानि**

सम्प्रेषणं विना पारस्परिकावगमनं विकसितं नैव भवति । मानवेषु पारस्परिकावगमनं सम्प्रेषणमाध्यमेनैव सम्भवति ।

☞ सङ्घटनेषु सूचनादानमवाप्तिश्च निरन्तरप्रक्रिया वर्तते ।

☞ सम्प्रेषणोद्देश्यं न केवलं नीतिनियमादेशपद्धत्योद्देश्यानां विनिमयः अपि तु संरक्षणे उपयोगाय कल्पते ।

☞ उत्पादनानां कार्यस्थितीनाञ्च परिष्कारार्थं स्वतन्त्रपरामर्शाः विचाराः च सम्प्रेषणेनैव सम्भवन्ति।

# भारते शिक्षायाः उद्देश्यानां महत्त्वम्

✍ बिप्लब राय

अनुक्रमाङ्कः – 38

यदा मानवसभ्यतायाः सूर्योदयः जातः ततः भारतं स्वस्य शिक्षादर्शनयोः कृते प्रसिद्धमस्ति। इदं सर्वं भारतीयशिक्षोद्देश्यानामेव चमत्कारः वर्तते यत् भारतीयसंस्कृतिः संसारस्य सदैव पथप्रदर्शनम् अकरोत् तथा च अद्यापि जीवितमस्ति । अग्रे प्राचीनशिक्षोद्देश्यानि विव्रियन्ते –

## पवित्रता तथा जीवनस्य सद्भावना

प्राचीनभारते प्रत्येकं बालकस्य मस्तिष्के पवित्रतायाः तथा धार्मिकजीवनस्य भावनानां विकासः करणीयमिति शिक्षायाः प्रथममुद्देश्यम् आसीत् । शिक्षारम्भाय उपनयनसंस्कारस्य आवश्यकता आसीत् । शिक्षायाः प्राप्तिसमये प्रातः तथा सायंकाले ईश्वरस्य महिमायाः गुणगानं तथा गुरुकुले भूत्वा धार्मिकोत्सवानां पालनं कर्तव्यमासीत् ।

## चरित्रनिर्माणम्

प्राचीनभारतस्य शिक्षायाः द्वितीयं उद्देश्यमासीत् यत् बालकस्य नैतिकचरित्रस्य निर्माणं करणीयम् । युगेऽस्मिन् भारतीयदार्शनिकानां महान् विश्वासः आसीत् यत् लेखनं पठनमेव केवलं शिक्षा नास्ति परं तु नैतिकभावनानां विकासाय चरित्रस्य निर्माणं करणीयमेव अस्ति इति।

## व्यक्तित्वस्य विकासः

व्यक्तित्वविकासः प्राचीनशिक्षायाः प्रमुखमुद्देश्यं वर्तते । एतदर्थं बालकस्य आत्मविश्वासः, आत्मनियन्त्रणादिविषये प्रामुख्यं दत्तमासीत् ।

## नागरिकसामाजिककर्तव्यानां विकासः

प्राचीनभारतीयशिक्षायाः चतुर्थोऽद्देश्यमासीत् यत् नागरिकसामाजिककर्तव्यानां विकासः । एतन्निमित्तं मनुष्यः आदौ समाजिकः भवेत् न तु स्वार्थी । देशः अथवा समाजस्य कृते अपि स्वस्य कर्तव्यानां पालनं कुरु इति शिक्षा दीयमाना वर्तते । कथनस्य तात्पर्यं वर्तते यत् तत्कालीनशिक्षा एतादृशनागरिकाणां निर्माणं करोति यो स्वस्य पालनं कृत्वा समाजोन्नत्यै अपि यथाशक्ति योगदानं दद्यात्।

## सामाजिककुशलतायाः सुखस्य च उन्नतिः

सामाजिककुशलतायाः, सुखस्य च उन्नतिः प्राचीनशिक्षायाः पञ्चममुद्देश्यम् आसीत्। एतदर्थं ज्ञानस्य विभिन्नेषु क्षेत्रेषु, व्यवसायेषु, उद्योगेषु च प्रशिक्षणं दीयमानं आसीत् । तस्मिन् समये कार्यविभाजनस्य सिद्धान्तः प्रचलन्नासीत् ।

अनेन परामर्शनेन ज्ञायते यत् अस्माकं तदानींतनशिक्षाप्रणाल्यां बालकस्य कृते शारीरिकं, मानसिकं, बौद्धिकं, आध्यात्मिकं च ज्ञानं निहितमासीत् इति।

## आधुनिकी शिक्षापद्धतिः

✍ सुमन्त पधान
अनुक्रमाङ्कः – 39

**शिक्षाया उद्देश्यम्**

शिक्षा मानवविकासस्य परमं साधनम् । ज्ञानोदयेन नैतिकं चारित्रिकं च विकासं संपादयति। शिक्षा सांस्कृतिकी दृष्टिम् उद्‌बोधयति। शिक्षया स्वजीवनोन्नत्यै स्वजीवनयापनाय च प्रशिक्षणं प्राप्यते । शिक्षा गुणसाधनस्य मार्गं प्रशस्तं विदधाति। शिक्षा आधुनिकविषयाणां विज्ञानादीनां प्रशिक्षणं प्रशस्तं करोति। शिक्षाया उद्देश्यम् अस्ति यत् मानवस्य सर्वाङ्गीणविकाससाधनम्। तत्र स्वावलम्बनभावना, लोकहितसाधनं, राष्ट्रियभावनोद्भावनम्, समाजहितसम्पादनम्, सर्वासु परिस्थितिषु स्वकार्यसम्पादनक्षमता, उत्तरदायित्वभावना, जात्यादिभेदनिराकरणपूर्वकं मानवस्य विकसनं इत्यादयः सन्ति। एतत् तु सुविदितमेव यत् शिक्षा मानवस्य निर्मात्री शक्तिर्वर्तते। सा एव कर्तव्याकर्तव्यं बोधयति, उन्नतेः साधनं प्रस्तौति, सद्‌गुणान् आविर्भावयति, दुर्गुणनिराकरणस्य बुद्धिं जनयति, स्वजीवनयापनाय बुद्धिं प्रददाति, वृत्तिसमस्यां निराकरोति, स्वावलम्बनभावनां प्रबोधयति, नैतिकगुणानां महत्वं प्रस्तौति, जीवनसाफल्याय उपकरोति।

**आधुनिकी शिक्षा पद्धतिः**

1. वर्तमानशिक्षापद्धतौ बालकस्य सर्वाङ्गीणविकासस्य कल्पना
2. यान्त्रिकी शिक्षा
3. सङ्‌णकशिक्षा
4. प्रविधिशिक्षा
5. चिकित्साशास्त्रम्
6. सर्वविषयावगाहिज्ञानम्
7. कन्याशिक्षायाः प्रोत्साहनम्

**वर्तमानशिक्षापद्धतेः दोषाः**

वर्तमानशिक्षापद्धतौ यथा गुणाः सन्ति, तथैव केचन दोषाः अपि दृष्टिपथम् आरोहन्ति। यथा

1. पाश्चात्यसभ्यताप्रभावः

2. सुविधाऽभिलाषः

**वर्तमानशिक्षापद्धतौ आपेक्षिताः परिष्काराः**

वर्तमानशिक्षापद्धतेः दोषाणां निराकरणाय केचन परिष्काराः सुतराम् अपेक्षिताः सन्ति। यदि एते परिष्काराः संगृह्यन्ते, तर्हि पूर्वोक्तानां दोषाणाम् अपाकरणं संभवति। यथा –

1. आचारशिक्षा, नैतिकशिक्षा च अनिवार्यरूपेण भवेत्। संयमस्य महत्वं स्यात्।

**2.** श्रमस्य महत्वं भवेत्।

3. विश्वविद्यालयेषु छात्राणां प्रवेशनियन्त्रणं स्यात् ।

4. औद्योगिकं प्रशिक्षणम् ।

❋ ❋ ❋

# पाठ्यक्रमे संस्कृतस्य स्थानम्

✍ चिरस्मिता शेटि

अनुक्रमाङ्कः – 40

संस्कृतम् अत्यन्तविशिष्टा भाषा इति अस्माभिः पठितम् । तर्हि एतस्याः स्थानं 'वर्तमानशिक्षाप्रणाल्यां' पाठ्यक्रमे वा कीदृशमिति विषयं विचारयामः । अस्मिन् विषये त्रयः विचाराः प्रधानतया दृश्यन्ते ।

**प्रथमविचारः – संस्कृतम् अनावश्यकम्**

केचन शिक्षाशास्त्रविदः चिन्तयन्ति यत् संस्कृतं पाठ्यक्रमे अनावश्यकम् इति । एते संस्कृतसाहित्यं न पठितवन्तः । काव्यस्य रसास्वादनमपि न कृतवन्तः । एतेषां संस्कृतसाहित्यविषये भाषाविषये वा किमपि ज्ञानं नास्ति । यदि कश्चन कारणं पृच्छति चेत् एतेषां समाधानं वर्तते यद् संस्कृतं सार्वजनीनभाषा नास्ति इति। सार्वकालीनभाषा अपि नास्ति । इयं भाषा केवलं ब्राह्मणानां विद्यते । प्रायः एते असूयापरकाः कदापि विश्वामित्रः, जाबालिः, सूतः, जनकः इत्यादीनां नामानि न श्रुतवन्तः स्युः । इयं मृतभाषा इति ये कुविमर्शं कुर्वन्ति तेभ्यः इदमुत्तरं यत् देशे विविधकोणेषु कोटिशः संरक्षकाः छात्राः संस्कृतं पठन्ति इति । एतद्विषयमपि एते न जानन्ति स्म । अतः पाठ्यक्रमे संस्कृतमनावश्यकमिति ये प्रतिपादयन्ति , ते सर्वे द्वेषादिकुप्रभावैः बद्धाः सन् एवं वदन्ति । एतादृशजनानां कृते सम्यक् अवबोधयितुमपि कोऽपि समर्थः न भवति । तथापि संस्कृतमहत्त्वविषये भाषायाः पाठ्यक्रमे स्थानविषये केषाञ्चन महापुरुषाणां विचाराः अत्र प्रस्तूयन्ते।

संस्कृतशिक्षायाः अविलम्बित–अकुण्ठितसमुन्नतिः स्यात् इति वयं सर्वे आशास्महे । न केवलं विद्यापीठेषु, किन्तु नगरे नगरे ग्रामे ग्रामे संस्कृतभाषा प्रसूता भवेत् । ये संस्कृतशिक्षणस्य आवश्यकता नास्ति इति वदन्ति ते प्रायः भारतीयसंस्कृतिं न जानन्ति । भारतदेशमपि सम्यक्तया नावगतवन्तः । अधुना नेतारः अपि चिन्तयन्ति भारतं नाम संस्कृतभारतमिति । अर्थात् भारतस्य यत् स्वरूपं संस्कृतभाषायां विद्यते तदेव भारतस्य वास्तविकं स्वरूपमिति । इदं वयं महता गर्वेण वक्तुं सक्षमाः यद् विदेशेषु भारतस्य यद्गौरवं मिलति तत् सर्वं संस्कृतभाषाकारणात् एवेति । वैदशिका अपि जानन्ति, भारतं नाम संस्कृतमेति, संस्कृतं नाम भारतमिति । प्रायः वैदेशिकाः इच्छन्ति, भारतीयाः सर्वे संस्कृतभाषायामेव व्यवहारं कुर्वन्ति इति । अतः संस्कृतभाषायाः शिक्षणं नितराम् अनावश्यकमिति विचारः न स्वीकरणीयः न वा पालनीयाः । भारते संस्कृतभाषाशिक्षणं भवेदेव ।

**द्वितीयः विचारः**

संस्कृतमन्यैः आधुनिकविषयैः सह शिक्षणीयम् । यद्येवं भवति चेत् तदानीं संस्कृतस्योपरि अधिकं ध्यानं दातुं न शक्यते । एते संस्कृतमनावश्यकमिति न वदन्ति । किन्तु उपेक्षाभावं प्रदर्शयन्ति । संस्कृतं वैकल्पिकरूपेण स्थापयितुम् अभिलषन्ति । अर्थात् येषां संस्कृतपठने रूचिः अस्ति, ते संस्कृतं पठन्ति, येषां नास्ति ते न पठन्ति । अनेन किं भवतीत्युक्ते संस्कृतं यत्र यत्र पाठ्यते, तत्र तत्र एव भवति । संस्कृतभाषायाः व्याप्तिः न भवति । अन्यभाषाजनाः ये सन्ति, ते संस्कृतस्योपरि दुष्प्रचारं कुर्वन्ति । संस्कृतविषये न जानन्ति, तर्हि कथं पठितुम् अग्रे आगच्छन्ति । अन्यः विचारणीयः विषयः यत् भारतसर्वकारः यदा संस्कृतायोगस्य नियुक्तिम् अकरोत्, तदानीं तस्य आयोगस्य अध्यक्षः डा. सुनीति कुमारी चटर्जी महोदयाः तामिलनाडुराज्यं गतवन्तः, तदा तत्रत्याः उक्तवन्तः यदि प्रतिदिनं संस्कृतभाषायां प्रार्थनां कुर्मः, तदा अन्ये चिन्तयन्ति अयं विद्यालयः एकस्यैव वर्गस्य कृते एव भवति इति । एवं प्रकारेण जनानां मनः संस्कृतविरुद्धं भावपूर्णं भवति तदानीमपि अस्माभिः तूष्णीमेव स्थातव्यं वा ?

वस्तुतः संस्कृतभाषा भारतीयानां जीवनभाषा अस्ति । संस्कृतभाषामन्तरा काऽपि भाषा न केवलं समृद्धा भवति अपितु जीवितुमेव न शक्नुयात् । तथा संस्कृतभाषां विना कोऽपि भारतीयो यथार्थभारतीयो भवितुं न अर्हति । यदि कश्चन जनः भारतीयसंस्कृतिं प्रति श्रद्धां, राष्ट्रियैकतां प्रति निष्ठां च प्रदर्शयति तर्हि संस्कृतेः संरक्षणं कर्तुं पारयामः । भूतपूर्वप्रधानमन्त्री मुरार्जी देसायि वदति स्म यद्यपि विज्ञानेन देशस्य अत्युन्नतस्थितिः भविष्यति तेन मानवस्य ज्ञानाभिवृद्धिः भवति । एतस्य ज्ञानस्य उपयोगः बुद्धिबलेन करणीयः । भारतीयानां बुद्धिकुशलता साहित्यपठनादेव भवति । साहित्यं सर्वं संस्कृतभाषायामेव वर्तते । अतः अस्याः भाषायाः अध्ययनं करणीयमेव इति ।

तृतीयः विचारः – संस्कृतम् अनिवार्यम् – संस्कृतस्य अध्ययनविषये भारतसर्वकारेण एका समितिः गठिता । तस्याः एव नाम संस्कृतायोगः । अस्य आयोगस्य अध्यक्षः डा. सुनीत कुमार चटर्जी आसीत् । संस्कृतभाषायाः महत्त्वदृष्ट्या अस्याः स्थानं पाठ्यक्रमे अनिवार्यतया भवेत् इति अनेन

आयोगेन प्रस्तावः दत्तः । तदर्थं त्रिभाषासूत्रस्य परिवर्तनं करणीयमस्ति । अस्मिन् विषये चत्वारः अंशाः एवं प्रस्ताविताः । यथा–

क. मातृभाषा अथवा प्रान्तीयभाषा आङ्गलम्, अथवा हिन्दी संस्कृतम् ।

ख. मातृभाषा अथवा क्षेत्रीयभाषा आङ्गलम् हिन्दी संस्कृतम् ।

ग. "ख" योजना इव भवति । परं संस्कृतस्य कृते परीक्षा न भवति । परीक्षाफले अपि संस्कृतस्य प्रभावः न पतति । किन्तु छात्रवृत्तये संस्कृतस्य अङ्कानां गणना क्रियते । परम् आयोगेन एषः प्रस्तावः तिरस्कृतः ।

घ. द्वितीययोजनायाम् उल्लिखितासु त्रिभाषासु संस्कृतम् अङ्गभूततया, अनिवार्यतया पठनीयम् अर्थात् संयुक्तभाषारूपेण । एवं प्रकारेण संस्कृतशिक्षणं न्यूनातिन्यूनं पञ्चवर्षं भवेत् ।

संस्कृतायोगेन या प्रथमयोजना अस्ति सा सर्वोत्तमा इति निश्चिता ।

## अधिगमः

✍ दीपक रतूड़ी

अनुक्रमाङ्कः – 41

मानवस्य अधिगमप्रक्रिया जन्मतः एव आरभ्यते । अतः सः आजीवनम् अधिगच्छन् भवति। मानवस्य अधिगमार्थं न कोऽपि निश्चितः समयः न किञ्चित् सुनिश्चितं स्थानं भवति । सः सर्वदा सर्वत्र यत्किमपि अधिगच्छन् भवति । न केवलं शिक्षासंस्थाभ्यः, अपि तु परिवारात् समाजात् मित्रसमुदायात् चलच्चित्रात् परिचितापरिचितव्यक्तिभ्यः सः यत्किमपि शिक्षमाणः भवति ।

**अधिगमस्यार्थः**

"अधिगमः" इति शब्दः अधिगमप्रक्रियार्थं, तस्याः प्रक्रियायाः परिणामार्थञ्च प्रयुज्यते । अधिगमस्य अर्थः शिक्षणम् अथवा व्यवहारपरिवर्तनम् । व्यवहारपरिवर्तनम् अनुभवेन प्रशिक्षणमाध्यमेन च सञ्जायते । यथा – कश्चन लघुबालः ज्वलन्तं दीपं स्पृशति । दीपस्य स्पर्शेण तस्य हस्तः दग्धो भवति । तेन सः पीडामनुभवति । भविष्ये सः बालः कदापि तथा न समाचरिष्यति । एतदेव अनुभवेनाधिगमः इत्युच्यते ।

**अधिगमस्य परिभाषाः**

अधिगमः व्यवहारपारिवर्तनस्य एका प्रक्रिया । मनोवैज्ञानिकैः एतस्य अर्थं स्पष्टयितुं नैके परिभाषाः प्रदत्ताः, यतो हि मनोविज्ञाने एव बहुविधाः शैक्षिकसम्प्रदायाः वर्तन्ते । अतः एकैकेनापि

सम्प्रदायेन अधिगमस्य परिभाषाः स्वदृष्टया प्रतिपादिताः –

1. गेट्समहाशयः अनुभवेन प्रशिक्षणेन च जायमानं व्यवहारपरिवर्तनम् अधिगमः इति वदति ।
2. वुडवर्थमहाशयः नवीनज्ञानमनुक्रियां च प्राप्तुं क्रियमाणा प्रक्रिया अधिगमप्रक्रिया इति वदति।
3. स्किनरमहाशयः व्यवहारे उत्तरोत्तरसामञ्जस्य प्रक्रिया एव अधिगमः इति वदति ।
4. क्रो एवं क्रो महाशयौ अधिगमः अभ्यासम्, ज्ञानमभिवृत्तिं च अर्जयति इति कथयतः।
5. गिल्फोर्डमहाशयः व्यवहारकारणेन जायमानं परिवर्तनमधिगमः भवति इति वदति।
6. गेरट्महाशयः अधिगमः व्यवहाराणां सङ्घटनं भवति इति वदति।

**अधिगमस्य प्रकृतिः**

अधिगमः काचन मनोवैज्ञानिकी प्रक्रिया भवति । अधिगमस्य अनेके परिभाषाः अनेके अधिगमसिद्धान्ताः च प्रतिपादिताः सन्ति । एतेषामाधारेण अधिगमस्य प्रकृतेः व्याख्या कर्तुं शक्यते।

1. अधिगमः व्यवहारस्य परिणामः अस्ति ।
2. व्यवहारपरिवर्तनमेव अधिगमः वर्तते।
3. अधिगमः मानवस्य काचित् प्रवृत्तिः अस्ति।
4. अधिगमः मानसिकक्षमतानां विकासस्य काचित् प्रक्रिया विद्यते।
5. अधिगमः काचित् सततप्रक्रिया भवति ।
6. अधिगमः समायोजनप्रक्रिया वर्तते ।
7. अधिगमः काचित् आविष्कारात्मिका प्रक्रिया अस्ति ।
8. अधिगमः अभिवृद्ध्यात्मिका प्रक्रिया विद्यते ।
10. अधिगमः तत्कालप्रतिपुष्टेः प्रक्रिया भवति ।

**अधिगमसिद्धान्ताः**

शिक्षामनोविज्ञानस्य केन्द्रबिन्दुः अधिगमः भवति । अतः अधिगमस्य विविधान् अर्थान् विभिन्नाः परिभाषाः च पर्यालोच्य एतस्य प्रमुखाः केचन सिद्धान्ताः विव्रीयन्ते ।

1. अधिगमे उद्दीपनस्य अनुक्रियायाश्च विकासः सञ्जायते ।
2. वाञ्छितव्यवहाराणां कृते सकारात्मकप्रतिपुष्टिः अवाञ्छितव्यवहाराणां कृते नकारात्मकप्रतिपुष्टिः लभ्यते । अतः अधिगमे पुनर्बलनमत्यन्तं महत्त्वपूर्णं भवति ।
3. अधिगमे अभ्यासस्य पुनरावृत्तिः अत्यन्तं महत्त्वपूर्णा भवति । एतदेव अभ्यासस्य सिद्धान्तः इत्युच्यते ।

4. शिक्षणे कृत्वाधिगमः अत्यन्तं प्रभावशाली भवति । अतः छात्रैः क्रियाशीलैः भाव्यम् ।
5. शिक्षकाणां विविधविषयेषु सङ्घटितज्ञानमावश्यकं भवति ।
6. नवीनव्यवहारान् अधिगन्तुं छात्राणामभिरुचिः अधिका भवति । यतः छात्राः अनुकरणेन एव शीघ्रं शिक्षन्ते ।
7. अधिगमे छात्राणां योग्यता महत्त्वपूर्णा भवति ।
8. छात्राणां विकासार्थं वंशानुक्रमस्य अपि महत्त्वपूर्णस्थानं वर्तते ।
9. सामूहिकवातावरणमपि अधिगमप्रक्रियायाः कृते महत्त्वपूर्णं भवति ।

✾ ✾ ✾

## पाठयोजनायाः स्वरूपम्

✍ सायिरामः

अनुक्रमाङ्कः – 42

पाठशालायाम् अध्यापनदायित्वं बहुपरिश्रमस्य निष्ठायाः च कार्यं विद्यते । निश्चितलक्ष्यस्य प्राप्तये, निश्चितानां उद्देश्यानां साधनाय कार्यप्रणाली सुनिश्चिता स्यात् । प्रत्येकमपि कार्यस्य साफल्यम् असाफल्यं वा तद् योजनां आश्रित्य एव भवति। गृहनिर्माणाय पूर्वं यथा योजना निर्मीयते तदनुसारं कार्यं क्रियते, तथैव अध्यापकेन कक्ष्यायां पाठस्य बोधनात् पूर्वं बोधनकार्यस्य योजना निर्मेया भवति । अध्यापकः कक्ष्यायां पाठ्यवस्तु केन क्रमेण, केन विधिना, कैः सहायकोपकरणैः, कुत्र, कथम् उपस्थापयेत् इत्यपि पूर्वमेव निश्चयं कुर्यात् । पाठं सरलं, सहजम्, आकर्षकं स्पष्टं च कर्तुं तेन कः उपायः आश्रयणीयो भवतीति सः पूर्वमेव निर्धारयेत् । एषा एव योजना इति कथ्यते। एषा योजना विषयानुगुणं, छात्राणां स्तरानुगुणं च स्यात् । मनोवैज्ञानिकैः मानवमस्तिष्कस्य त्रेधा विभागः क्रियते । यथा – ज्ञानविभागः, कौशलविभागः, सौन्दर्यविभागश्चेति। तद्दृष्ट्या अध्यापनविषयाणां अपि त्रेधा विभागः सिध्यति। यथा – ज्ञानपाठाः, कौशलपाठाः, सौन्दर्यपाठाः चेति। परन्तु भाषाविषये प्रायः त्रयाणामपि सम्मेलनमेव दृश्यते।

**ज्ञानपाठप्रकाराः** – नूतनशब्दज्ञानम्, गद्यपाठाः, व्याकरणं, रचना, अनुवादः।

**कौशलज्ञानपाठप्रकाराः** – उच्चारणम्, मौखिकनिबन्धः, भाषाणं, दृष्टलेखनम्, श्रुतलेखनं, वाचनमित्यादयः।

**सौन्दर्यपाठप्रकाराः** – पद्यपाठाः, वर्णनादयः ।

**पाठयोजनायाः परिभाषाः**

☞ वेलेण्टाइन् डेविस् (Valantine Davis) महोदयानुसारं छात्रशिक्षणे न केवलं व्याख्यानश्रवणं, अपि तु पाठस्य निर्माणं तस्य प्रस्तुतीकरणं च महत्वपूर्णं तथ्यं वर्तते।

☞ प्रो.बी.डी भाटिया (Prof.B.D.Bhatiya) महोदयानुसारं योजना समयनाशं वारयति । यतो हि इयं शिक्षणं क्रमबद्धं कर्तुं व्यवस्थापयितुं च शिक्षकः सहकरोति ।

**पाठयोजनायाः आवश्यकताः**

वस्तुतः पाठयोजनायाः लिखितस्य अलिखितस्य वा स्वरूपस्य अभावे कक्ष्यायां प्रायः न कापि अधिगमक्रिया भवितुमर्हतीति Dr.A.K.M Pareekh वर्याः पाठयोजनायाः आवश्यकता अस्तीति उक्तवन्तः।

☞पाठयोजना पाठ्यविषयस्य प्रस्तुतिक्रमं निश्चिनोति।

☞पाठयोजना पाठस्य विभिन्नस्तरेषु क्रियासु च सम्बद्दं स्थापयति ।

☞पाठयोजना कक्ष्यायां शिक्षणोपयोगिवातावरणं निर्माति।

☞पाठ्यविषयस्थानां विभिन्नतत्त्वानां क्रमनिर्माणे, चिन्तने, तद्विकासे च पाठयोजना क्रमबद्धतां कल्पयति।

☞कक्ष्यायां शिक्षणात् प्राक् प्रयोज्यमानानां सहायकसाधनानां विषये पाठयोजना शिक्षकं पूर्णतया बोधयति।

**पाठयोजनायाः उद्देश्यानि**

☞समयानुसारं पाठनीयस्य विषयस्य निर्धारणम् ।

☞पाठनीये विषये समान्यांशानां विशिष्टांशानां च विवेचनम् ।

☞शिक्षकाय मनोवैज्ञानिकोद्देश्यानां पूर्तिः।

☞विविधमूल्याङ्कनकार्यस्य सम्पादनम् ।

☞शिक्षाविधीनां सुगमरीत्या चयनम् ।

☞पाठ्यक्रमे सक्रियता सम्पादनम् ।

☞छात्राणां नूतनज्ञानार्जने साहाय्यम् ।

एवं रूपेण पाठयोजना अध्यापकस्य कक्ष्यागतसमस्यानां न्यूनीकरणे सहाय्यं आचरति ।

# शिक्षणसन्नाहपूर्वं पाठयोजनायाः आवश्यकता

✍ पूर्णा डि.एस

अनुक्रमाङ्कः – 43

पाठस्य योजना पाठयोजना। अर्थात् पाठे नियोजितं पाठयोजना इत्यपि वक्तुं शक्यते। पाठयोजनायाः विषये महोदयेनोक्तं – "शक्षिणप्रक्रियायाः तथा उद्देश्यानां व्यवस्थितं सुनियोजितं लेखनमेव पाठयोजना" इति।

**प्रभावपूर्णपाठयोजनानिर्माणार्थमवधेयांशाः**

☞ शिक्षकाः विषयवस्तुनः विशेषज्ञाः भवेयुः।

☞ ते अध्यापनसमये कक्षाव्यवस्थायाः नियन्त्रणमात्मविश्वासेन कुर्युः।

☞ शिक्षणकाले शिक्षणसमस्यानां समाधानार्थमेते समाधानकौशलेषु दक्षाः स्युः।

☞ शिक्षणकाले विविधशिक्षणविधीनां, प्रविधीनां, सामग्रीणाञ्च यथावसरमुपयोगार्थं दक्षाः स्युः।

☞ शिक्षकाणां बालकस्यावश्यकतां प्रति जागरूकता, तस्य रुचिं, योग्यताञ्च बोधने सहायिका भवति । यया शिक्षकाः वयसः स्तरानुगुणं वातावरणं प्रभावयितुं समर्थाः स्युः।

**पाठयोजनानिर्माणस्यावश्यकता**

शिक्षाशास्त्रिकक्षायां छात्राध्यापकाः छात्राध्यापिकाश्च शिक्षणाभ्यासससमये कक्षाशिक्षणात्पूर्वं लिखितरूपेण पाठयोजनायाः निर्माणमनिवार्यरूपेण कुर्वन्ति। येषां पाठ्यवस्तूनां शिक्षणं करणीयं भवति तेषां पाठ्यांशानां विभागं कृत्वा विविधेषु कालांशेषु पाठयन्ति। तेषां पाठ्यांशानां प्रत्येकं विभागस्य अध्यापनार्थं तस्य सुविस्तृतं कार्यरूपं प्रस्तुवन्ति । तस्य स्वरूपस्य सङ्घटनमेव पाठयोजना इति नाम्ना अभिधीयते।

**पाठयोजनानिर्माणकाले ध्यातव्याः बिन्दवः**

☞ शिक्षणात्पूर्वं शिक्षणक्रियोद्देश्यानां निर्धारणं शिक्षकैः अवश्यं करणीयम्।

☞ उद्देश्यानां स्पष्टता स्यात्।

☞ पाठ्यविषयस्य पूर्वज्ञानं भवेत् एवञ्च सह विषयस्यापि ज्ञानं स्यात्।

☞ शिक्षणसिद्धान्तानां सूत्राणां विधीनाञ्च ज्ञानं भवेत्।

☞ कक्षाविद्यार्थिनां स्तरस्य ज्ञानं भवेत्।

☞ समयपरिवर्तनादीनां निश्चितज्ञानं भवेत्।

☞ सहायकसामग्रीणां यथायोग्यं प्रयोगः भवितव्यः।

☞ छात्राणां वैयक्तिकभिन्नतामवगत्य अधिगमविकासाय प्रयासः कर्तव्यः।

एवमस्माभिः ज्ञातुं शक्यते यत् शिक्षणप्रक्रियायां योजनायाः सोद्देश्यनिर्माणं छात्राध्यापकाध्यापिकानाञ्च कृते नूनं सहायकं भवति इति।

**शिक्षणपूर्वसन्नाहः**

पाठयोजनायाः निर्माणं शिक्षणजगति नूतनतया समागतानां प्रशिक्षूणां कृते महत् आवश्यकं भवति । यथा चिकित्सकेन उपचारात्पूर्वं रोगिणां रोगस्य गहनाध्ययनात् परमेव रोगस्योपचारः क्रियते, अभिवक्ता अभियुक्तस्य अभियोगस्य कारणानि अवगत्य एव न्यायालये स्वाभिमतं प्रकटयति, तथैव नूतनशिक्षकाः शिक्षणात्पूर्वं शैक्षणिकसूक्ष्मताम् अवबुध्य एव शैक्षिकसन्नाहेन सह शिक्षणजगति प्रवेशं कुर्युः। कक्षाकक्षप्रवेशात्पूर्वं शिक्षकेण सम्पूर्णसज्जा करणीया, यतः शिक्षार्थिनां प्रगतौ काऽपि अन्या क्रिया तथा बाधिका नास्ति यथा शिक्षणस्य पूर्वसज्जा।

एवं प्रकारेणास्माभिः कथयितुं शक्यते यत् प्रत्येकेषां छात्राध्यापकाध्यापिकानां च कृते विद्यालयीयछात्राणां शैक्षणिकविकासाय सुसङ्घठितं पाठयोजनानिर्माणमावश्यकमिति।

## अनुशासनसमस्या

✍ सञ्जिता गान्धी

अनुक्रमाङ्कः –44

किम् नामानुशासनम् ? अनुपूर्वात् शास् धातोर्ल्युटि अनुशासनम् इति रूपं सिध्यति। विधिर्नियमो वा, तदनुकूलम् आचरणम्, अनुशासनम् इति । जीवने अनुशासनस्य तादृश्येवावश्यकता यथा शरीररक्षायै भोजनस्य बौद्धिकविकासस्य ज्ञानस्य च । न स्याच्चेदनुशासनं तर्हि समग्रमपि मानवजीवनं निष्फलं निष्क्रियम् अरण्यजीवनसदृशं च सम्पद्येत ।

**अनुशासनस्य महत्वम्**

जीवनोन्नत्यै जीवनसाफल्याय चानुशासनम् अनिवार्यम् । शैशवात् आरभ्य वद्धत्वं यावत् अनुशासनम् आवश्यकम् । बाल्ये मातापित्रोः विद्यालये गुरोः, गृहस्थजीवने पत्युः, पत्न्याः वा, वृत्तिस्थानेषु उच्चाधिकारिणाम् अनुशासनं पाल्यते।

अनुशासनविषये निर्दिश्यते सुभाषितकारेण –

लालयेत् पञ्चवर्षाणि दशवर्षाणि ताडयेत् ।

लालनाश्रयिणो दोषाः ताडनाश्रयिणो गुणाः ।।

तैत्तिरीयोपनिषदि प्रोच्यते –

वेदमनूच्याचार्योऽन्तेवासिनम् अनुशास्ति।

अनुशासनं सर्वविधसमुन्नतेर्मूलम् । अनुशासनमेव शिक्षयति । बुद्धेस्तथाविधानुशासनेन कवित्वं, ऋषित्वं, ज्ञानित्वं, वैज्ञानिकत्वं च सिध्यति। अनुशासनमूलकमेव संगीत–नृत्य–विविधकला–विशेषज्ञत्वम् ।

**छात्रेष्वनुशासनसमस्या**

साम्प्रतं सर्वत्र छात्रेषु अनुशासनसमस्या अवलोक्यते श्रूयते च । न केवलं भारते अपि तु विदेशेष्वपि छात्रानुशासनसमस्या विदुषां शिक्षकाणां च विचारचर्चाविषयः। भारते छात्रानुशासनसमस्या विविच्यते विश्लिष्यते चेत् कतिपयानि कारणानि पुरतः समायान्ति, तानि निराक्रियन्ते चेत् समस्यासमाधानं भवितुम् अर्हति ।

**अनुशासनसमस्यायाः कारणानि**

1. शिक्षाप्राप्ते अनन्तरं वृत्तिप्राप्तेः समस्या । विविधोपाधिलाभेपि न विद्यते वृत्तिप्राप्तिसौकर्यम् । परीक्षोत्तीर्णा अपि न वृत्तिं जीविकोपार्जनं च लभन्ते इत्येतत् असन्तोषस्य मूलम्, नैराश्यस्य च कारणम् अस्ति ।

2. विश्वविद्यालयादिषु आचार–सदाचार–शिष्टाचारादि विषयेषु अनवधानम् । चारित्रिकीं शिक्षाम् अन्तरेण अनुशासन्समस्यासमाधानं आकाशकुसुमम् इव दुर्लभम् ।

3. गुरुशिष्ययोः अध्यापकाध्येतृषु प्रेममूलकः श्रद्धासमन्वितश्च गुरुशिष्यसम्बन्धः । अध्यापकाध्येतारश्च उभयेऽपि स्वकर्मच्युतः संलक्ष्यन्ते, तदा कथं गुरुभक्तिराचार्यभक्तिर्वा भवेत्।

4. शिक्षालयेषु प्रबन्धस्य दुरवस्था महाविद्यालयादीनां प्रबन्धकाः जातिवादसम्प्रदायवादसम्बन्धिवादादि दोषग्रस्ताः । अतोऽयोग्यानां निर्वाचनं योग्यानां परिहारः लक्ष्यते ।

5. शिक्षकेषु आचार्येषु चापि चारित्र्यदोषः आचारदोषः च संलक्ष्येते । अत एव अनुशासनसमस्यापि उदेति।

6. अनुसंधानविशेषये रुच्यभावः ।

7. शिक्षापद्धत्याः दोषपूर्णत्वम् ।

8. परीक्षाप्रणाल्याः दोषाः ।

9. शिक्षालयेषु समुचितसाधनाभावः ।

10. देशे भ्रष्टाचारव्याप्तिः।

**समस्यानां निराकरणम्**

1. वृत्तिसमस्यायाः समाधानार्थं योग्यतानुसारं शिक्षितानां विविधवृत्तिषु विनियोजनम् । औद्योगिकादि संस्थापनं सर्वकारस्य प्रमुखं कर्तव्यम्।

2. विश्वविद्यालयादिषु सदाचारशिक्षाया आचारशिक्षायाश्चानिवार्यत्वं स्यात्।

3. अध्यापकाध्येतृषु प्राचीनो गुरुशिष्यसंबन्धः भवेत्।

4. शिक्षणालयेषु भ्रष्टनेतृणां प्रवेशो निषिद्धः स्यात्।

5. आचारवन्त एव शिक्षकाः शिक्षणालयेषु विनियोज्याः।

6. छात्रसंघसदस्यत्वम् ऐच्छिकं स्यात् ।

7. मनोवैज्ञानिकपरीक्षणेन प्रवृत्तिमूलकमेव विविधविषयाध्यापनं स्यात्।

8. विशिष्टाध्ययनरुचिमन्तः, शोधप्रवृत्तिवन्तः च छात्राः विश्वविद्यालयेषु प्रवेश्याः, इतरे च प्रत्याख्येयाः।

9. शिक्षापद्धत्याः देश– काल– परिस्थिते अनुसारं पुनर्मूल्याङ्कनं पुनर्निर्माणं च स्यात्।

10. परीक्षाप्रणाल्याः दोषवारणार्थं मासिकपरीक्षादिमूला कक्षोन्नतिः स्यात् ।

12. देशे सुतरां व्याप्तो भ्रष्टाचारोऽपि छात्रानुशासनं दूषयति। तस्योन्मूलनमपि सर्वेषामेव कर्तव्यम्।

## शिक्षादर्शनयोः सम्बन्धः

✍ सजीव चन्द्र रायः

अनुक्रमाङ्कः – 45

**दार्शनिकविचाराणां व्यावहारिकप्रयोगः**

प्रत्येकं जीवनदर्शनम् एकस्य विश्वासस्योपरि आधारितं भवति । यदि विश्वासोऽयं जीवनाय उपयोगी वा आवश्यकोऽस्ति तर्हि तस्य शैक्षिकमहत्त्वमपि अवश्यमेव भवितव्यम् । शिक्षादर्शनयोः मध्ये घनिष्ठसम्बन्धोऽस्ति ।

**दर्शनेन जीवने शिक्षामहत्त्वस्यान्वेषणम्**

दर्शने नवीनतथ्यानि न भवन्ति, शास्त्रमिदं केवलं तेषामेव तथ्यानामन्वेषणं करोति यानि पूर्वं स्थापितानि सन्ति । इदम् अस्माकं शैक्षिकमहत्त्वानि तस्मिन्नेव रूपे स्वीकरोति यस्मिन् रूपे तानि भवन्ति ।

**दर्शनस्यावश्यकता**

रस्कमहाशयमतमनुसृत्य जीवनशिक्षयोः कृते दर्शनं परमावश्यकम् । तत्र जीवनाय दर्शनस्यावश्यकता जीवनस्य सदुपयोगाय भवति । प्रत्येकं मानवः विद्वान् भवतु वा मूर्खः, सर्वेषां स्वस्वजीवनदर्शनं भवति । सर्वे तमनुसृत्य एव जीवनयापनं कुर्वन्ति । शिक्षायै दर्शनस्यावश्यकता भवति । यतो हि जीवनाय शिक्षायाः आवश्यकता अस्ति । जीवनाय दर्शनस्यापि आवश्यकता भवति । अतः शिक्षायाः कृते दर्शनस्य आवश्यकता स्वाभाविकी भवति । दर्शनस्य शिक्षायाः मुख्याधारत्वे सति दर्शनेन शिक्षायाः उद्देश्यानां पाठ्यक्रमस्य, शिक्षणविधेः, विद्यालयसङ्घटनस्य अनुशासनादीनां निश्चितरूपं प्रदीयते । अतः शिक्षायोजनां सफलीकर्तुं दर्शनमावश्यकमस्ति ।

**दर्शनं शिक्षा च एकस्य नाणकस्य भागद्वयमस्ति**

अत्र हार्नमहोदयमतमनुसृत्य शिक्षायाः सर्वेषां तथ्यानां एकत्रीकरणात्परं ज्ञानद्वयं भवति । प्रथमन्तु शिक्षा विश्वप्रक्रिया अस्ति । द्वितीयञ्च शिक्षा सामान्या प्रक्रिया अस्ति । शिक्षां त्यक्त्वा दर्शनं नास्ति । दर्शनं त्यक्त्वा शिक्षा नास्ति । अतः शिक्षादर्शनयोः पारस्परिकः सम्बन्धः अस्ति । उक्तप्रक्रियाद्वयं मानवस्य स्वजीवनकाले समयानुसारं समाजानुसारं मानवानुसारं च पूर्णनिर्माणेन साहाय्यं करोति । पुनश्च इमे द्वे विश्वकालयोः सर्वान् अनुभवान् व्यक्तिविकासाय प्रयोगं कुरुतः । सर्वानुभवनिर्माणे दर्शनं साहाय्यं करोति । इत्थं शिक्षादर्शनयोः घनिष्ठसम्बन्धः सिद्ध्यति । अत्र रास महोदयेन उक्तं वर्तते यत् दर्शनशिक्षा च एकस्य नाणकस्य भागद्वयमस्ति । दर्शनं जीवनस्य विचारात्मकपक्षः तथा शिक्षा क्रियात्मकपक्षः विद्यते ।

**दर्शनशिक्षयोः पारस्परिकनिर्भरता**

यादृशः शिक्षादर्शनयोः घनिष्ठसम्बन्धः वर्तते तादृशः अत्र एतयोः पारस्परिकनिर्भरता अपि वर्तते । विश्वस्य शिक्षाशास्त्रिणः सर्वे दार्शनिकाः अभवन् । अतः सिद्धं यत् दर्शनं शिक्षां प्रभावयति शिक्षा च दर्शनं नियन्त्रयति । अत्र जी.ई. पार्ट्रिजमहोदयो भणति यद् यथा शिक्षा दर्शनाधारिता अस्ति तथैव दर्शनमपि शिक्षाधारितं विद्यते इति ।

❋ ❋ ❋

## शिक्षायाः व्यवस्था

✍ शुभश्री मोहान्ति

अनुक्रमाङ्कः – 46

शिक्षा हि मानवानां कृते न केवलम् आवश्यकतारूपेण वर्तते प्रत्युत एषा तु आधारभूता वर्तते। एषा मानवानामस्तित्वस्य, प्रत्येकं क्षेत्रे तेषां विकासस्य प्रगतेश्चाऽऽधाररूपा वर्तते । एषैव

शिक्षा शक्तिसंपन्नस्य भारतस्य प्रशासनिकस्य नागरिकविकासप्रभृतिक्षेत्रस्याऽधारं निर्माति । स्वतन्त्रताप्राप्तेरनन्तरं देशस्य सामाजिकम्, शैक्षणिकम्, औद्योगिकम् आर्थिकं च स्थितिमवलोक्य देशस्य चतुर्दिग्विकासाय सुप्रशिक्षितानां सुशिक्षितानां च जनानामावश्यकता नेतृभिरनुभूता । एतेषां जनानां सद्यः प्राप्तिः समुचितया शिक्षयैव संभवाऽसीत् ।

**संस्कृतशिक्षा**

संस्कृताऽऽयोगप्रतिवेदने संस्कृतशिक्षायाः निरूपणं वर्तते । तत्र तथ्यद्वयं समीक्षितं वर्तते । प्रथमं यत् सामान्यशिक्षायाः अङ्गभूतायाः माध्यमिकशिक्षायाः पाठ्यचर्यायां संस्कृतस्य स्थानं कथं संरक्षितुं शक्यते इति । अत्र कथमेतयोरेकीकरणं भविष्यतीत्येतस्य मार्गाः निर्दिष्टाः वर्तन्ते ।

**व्यावसायिकशिक्षा**

विश्वविद्यालयशिक्षाऽऽयोगेन प्रतिवेदनस्य सप्तमे अध्याये व्यावसायिकशिक्षायाः प्रचुरं महत्वं प्रतिपादयता तस्यार्थोऽपि निरूपितः । तन्मते "व्यवसायिकशिक्षा नाम सा प्रक्रिया वर्तते । यस्यां स्त्रीपुरुषौ व्यवसायिकाभिर्भावनाभिस्सह परिश्रमपूर्णाभ्य उत्तरदायित्वयुताभ्यश्च सेवाभ्य आत्मानौ योग्यौ कुरुतः ।

**वाणिज्यशिक्षा**

वाणिज्यशिक्षा सर्वथा अव्यवहारिक इति भारतीयाः। वाणिज्यशिक्षायाः अध्येतृणां विद्यार्थिनामध्ययनकाले वर्षत्रयपर्यन्तं वर्षचतुष्टयपर्यन्तं वा विविधेषु कार्यक्षेत्रेषु व्यावहारिकरूपेण ज्ञानार्जनस्यावसरोऽपि तेभ्यो देयः । स्नातकोत्तरस्तरे तेषामेव प्रवेशो विधेयः ये हि क्षेत्रेऽस्मिन् विशिष्टां योग्यतां धरन्तीति ।

**कृषिशिक्षा**

केन्द्रियशासनेन राज्यशासनेन च प्रयोगात्मकक्षेत्राणि समुद्घाटनीयानि । नूतनाः कृषिमहाविद्यालयाः यथासंभवं नवीनैः ग्रामीणविश्वविद्यालयैः सह सम्बद्धाः करणीयाः । ग्रामस्य समीपे एव विश्वविद्यालयेषु कृषिरनुसन्धानशालाः स्थापनीयाः तत्रैव कृषिप्रयोगाः करणीयाः ।

## समाजे शिक्षायाः महत्वम्

✍ बासुदेव दलवेहेरा

अनुक्रमाङ्कः – 47

शिक्षाशब्दो हि शिक्ष् धातोः व्युत्पद्यते। शिक्षणं, ज्ञानप्राप्तिः, विद्याप्राप्तिः चेति शिक्ष् धातोः संस्कृतभाषायां प्रतिपादितो वर्तते। इत्थं तर्हि शिक्षायाः शाब्दिकाऽर्थो वर्तते यत् ज्ञानं, विद्याप्राप्तिः, ज्ञानार्जनम् वा ।

**शिक्षायाः स्वरूपम्**

शिक्षा नाम जीवने पुण्यापुण्यविवेचिनी हिताहितनिदर्शनी कृत्याकृत्यनिर्देशनी समुन्नतिसाधिका अवनतिनाशिनी सद्भावभावयित्री दुर्भावतिरोधात्री, आत्मसंस्कृतिहेतुर्मनसः प्रसादयित्री, धियः परिष्कर्त्री, संयमस्य साधयित्री, दमस्य धात्री, धैर्यस्य दात्री, शीलस्य शिलयित्री, सदाचारस्य संचारयित्री, पुण्यप्रवृत्तः प्रेरयित्री, दुष्प्रवृत्तेर्दमयित्री, समग्रसुखनिधिः, शान्तेः सरणिः, पौरषस्य पावनी, काचिदपूर्वा शक्तिरिह निखिलेऽपि भुवने।

**शिक्षायाः यथार्थवादस्वरूपम्**

शिक्षा हि नाम विद्योपादानस्य मूलकारणम् । शिक्षायां चारित्रिकशिक्षणस्यैव प्राधान्यमासीत्। सामाजिकदृष्ट्या शिक्षा मनुष्याणां प्रारम्भिको विकासः, तस्याः इहलोकपरलोकयोः कृते अतिशायिन्यपेक्षा आसीदिति । एवञ्च कस्यापि देशस्य जनस्य च प्राणदायिनी शिक्षैव भवति।
डेवेनपोर्टमहोदयस्याभिमतं यत् शिक्षा नैतिकशिक्षादानेन सममेव अर्थकरी जीवनोपयोगी च स्यात् । यथार्थवादसमर्थकेषु मल्काष्टरमहोदयः शिक्षायाः उद्देश्यं बालकस्य सर्वाङ्गीणविकासः मन्यते । शिक्षा च मातृभाषामाध्यमेन स्यात्। शिक्षाशास्त्री फ्रांसिस् बेकनमहोदयः केवलं पुस्तकीयशिक्षायाः निकृष्टत्वं प्रदर्श्य शिक्षायाः पूर्णव्यावहारिकीकरणं समर्थ्यते । शिक्षायाः लक्ष्यं यत् मानवः शिक्षामवाप्य प्रकृतौ स्वाधिकारं संस्थापयेत् मानवं च समाजहितकरं निर्मातुं साहाय्यम् आचरेत् ।

शिक्षाशास्त्रिणः स्पेन्सरमहोदयस्याप्यभिमतं यत् शिक्षा बाह्याभ्यन्तरावस्थायाः साम्यं सामञ्जस्यं च संस्थापयेत् । थार्नडाइकमहोदयः मनुते यत् शिक्षा तत् साधनं विद्यते येन वर्गस्य समाजस्य वा अनुभवजातं शिक्षार्थिनं प्रति प्राप्यते । येन विधिना ते समाजानुभवम् आश्रित्य आत्मोत्कर्षे क्षमाः भवेयुः।

**शिक्षायाः उद्देश्यम्**

समस्तरूपेण शिक्षायाः उद्देश्यं विविच्यते चेत् वक्तुं पार्यते यत् तादृशी शिक्षा श्रेयस्करी या मानवानां जीविकोपार्जने साहाय्यम् आचरेत्, तेषां बौद्धिकविकासम् आपादयेत्, मानवं सुसंस्कृतं सभ्यं च विधाय तत्र सांस्कृतिकम् उत्कर्षं सम्पादयेत्, जीवनस्य च सर्वाङ्गीणं विकासम् आपाद्य पूर्णत्वं संसाधयेत् । चरित्रनिर्माणेन नैतिकतायाः विकासनम्, स्वार्थपरता, उच्शृङ्खलतादिप्रवृत्तीनां निरोधेन जीवनं सामाजिकं कुर्यात्, व्यक्तेः समाजस्य च सामञ्जस्यपूर्णः समन्वयः स्यात्, स्वावलम्बनभावना विकसेत्, उत्तरदायित्वभावना प्रचरेत्, सर्वासु विषमासु परिस्थितिषु कार्यसंम्पादनक्षमता संजायेत् । बालकानां तथाविधं सर्वाङ्गीणम् उन्नयनं स्यात् । यथा स्वस्थे शरीरे स्वस्थं मनः, कर्मठदेहे व्यावहारिकी बुद्धिः मोक्षावाप्तिसाधकं ज्ञानं च विलसेत् । शिक्षाशब्दस्यार्थ एवमस्ति प्राणिनामाभ्यन्तरस्थितज्ञानस्य बहिर्विकसनम् । आभ्यन्तरस्य वस्तुनो बाह्यप्रकटनम् ।

संपूर्णरूपेण शिक्षायाः उद्देश्यं विद्यते यत् मानवस्य शारीरिकी, मानसिकी, बौद्धिकी, नैतिकी च सम्मुन्नतिः संपादनीया ।

❋ ❋ ❋

## संस्कृतभाषायाः महत्त्वम्

✍ रञ्जिता साहु

अनुक्रमाङ्कः – 48

भाष्यते व्यवहारादिषु प्रयुज्यते इति भाषा । भाष् व्यक्तायां वाचि इति धातोः निष्पन्नः अयं शब्दः। भाषा नाम अभिप्रायप्रकटनसाधनम् । भाषयति या सा भाषा अस्मिन् संसारे बह्व्यः भाषाः वर्तन्ते। संस्कृतम् इति आदिकाव्ये रामायणे वाल्मिकिमुनिना भाषारूपेण व्यवहृतम् । यथा –

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।
रावणं मन्यमाना मां सीता भीता भविष्यति ।।

अनेन ज्ञायते यत् रावणस्य काले संस्कृतभाषा भाषारूपेण व्यवहृता आसीत् इति।

**संस्कृतभाषायाः प्रकृतिः**

'सम्' उपसर्गपूर्वकं कृञ् धातोः क्त प्रत्यये कृते सति सुडागमे संस्कृतम् इति शब्दः निष्पन्नो भवति। संस्कृतं परिष्कृता परिशुद्धा व्याकरणसम्बन्धिदोषादिरहिता भाषा संस्कृतभाषेति निगद्यते। सर्वविधदोषशून्यत्वादियं भाषा देवभाषा, गीर्वाणगीः इत्यादिभिः शब्दैः संबोध्यते। संस्कृतं देवभाषा प्रभावोत्पादकभाषा च भवति।

**संस्कृतभाषायाः वैज्ञानिकमहत्वम्**

वैज्ञानिकाश्च कपिलाः कणादः सुश्रुतस्तथा
चरको भास्कराचार्यो वराहमिहिरः सुधी।
नागार्जुनो भरद्वाज आर्यभट्टो वसुर्बुधः
ध्येयो वेङ्कटरामश्च विज्ञा रामानुजादयः ।।

विश्वभाषापरिवारेषु भारतीयभाषा संस्कृतभाषा च अन्यतमे । भाषा इत्युक्ते भाषणं, लेखनं च। भाषाविज्ञानम् अर्थात् संस्कृतभाषाविज्ञानम् । भाषायाः विज्ञानं, भाषा इत्युक्ते देवभाषा, आद्यभाषा संस्कृतभाषा । संस्कृतभाषा द्विविधा – वैदिकी, लौकिकी। यथा–

| वैदिकी | लौकिकी |
|---|---|
| जीवसे | जीवितुम् |
| दैवेभिः | देवैः |

**संस्कृतभाषायाः ऐतिहासिकमहत्वम्**

संस्कृतभाषायाः साहित्ये प्राचीनेतिहासः सन्निहितो वर्तते । वेदेभ्यः प्राचीनार्यजातीनां सभ्यता, संस्कृतिः, धर्मः, राजनीतिः, इतिहासश्च ज्ञायते। पुराणेषु, उपनिषत्सु, रामायणे, महाभारते, महाकाव्येषु, बौद्धानां त्रिपिटिकसाहित्ये, जैनानामार्षसाहित्ये च भारतस्य प्राचीनेतिहासः विद्यते। कौटिल्यस्य अर्थशास्त्रे मनुस्मृतौ याज्ञवल्क्यस्मृतौ च तत्कालीनसमाजस्य इतिहासः उपलभ्यते।

तथाचोक्तम् –

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
विभेत्यल्पश्रुताद्वेदागामयं प्रहरिष्यते ।।

कल्हणस्य राजतरङ्गिणी, बाणस्य हर्षचरितम्, बिल्हणस्य विक्रमाङ्कदेवचरितम् इत्यादिभ्यः इतिहासग्रन्थेभ्यः प्राचीनभारतस्य सामाजिकं, राजनैतिकञ्च जीवनं जायते।

धर्मार्थकाममोक्षाणाम् उपदेशसमन्वितम् ।
पूर्ववृत्तं कथायुक्तम् इतिहासं प्रचक्षते ।।

**सांस्कृतिकमहत्वम्**

भारतीयसंस्कृतेः स्रोतः संस्कृतभाषा भवति। अस्माकं सभ्यता संस्कृतिश्च वेदेभ्यः, स्मृतिभ्यश्च निसृता भवति। संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतिः अनूचाना प्रवर्तते। नामकरणम्, उपनयनम्, पाणिग्रहणमित्यादिसंस्काराः संस्कृतभाषायामेव क्रियन्ते। उच्चदार्शनिकविचाराः आद्यात्मिकज्ञानं च संस्कृते समाविष्टाः सन्ति।

संस्कृतायोगस्य प्रतिवेदने लिखितं यत् "भारतीयसभ्यता वैदिककाले जनिं लब्ध्वा प्रायः चतुस्सहस्रवर्षाणि यावत् संस्कृतद्वारैव स्वाभिव्यक्तिं करोति"। मूलं विना वृक्षस्य पत्राणि सरसानि न भवन्ति।

**भाषाविषयकं महत्वम्**

संस्कृतायोगस्य प्रतिवेदने लिखितं यत् "आधुनिकभाषा संस्कृतादुत्पन्नाः, द्राविडभाषास्तावत् आदिकालादेव साहित्यिकप्रयोगे संस्कृतेन पोषिताः सन्ति।

भाषाशास्त्रस्य उत्पत्तिरपि पाश्चात्यविदुषां संस्कृताध्ययनात् परमेव जाता। संस्कृतव्याकरणनियमाः तत्र सहायकाः अभवन् । अतः भाषाशास्त्रस्य अध्ययनायापि संस्कृतस्य महत्वं परिगणनीयं वर्तते।

**राष्ट्रियमहत्वम्**

भारतस्य एकता, अखण्डता च संस्कृते निहिता वर्तते । भारते सत्स्वपि अनेकेषु बाह्यभेदेषु जनानां संस्कृतिः समाना वर्तते । संस्कृतम् आर्यभाषाणां जननी द्राविडभाषाणां पोषिणी च वर्तते। भारतवर्षस्य भौगोलिकचित्रं संस्कृतसाहित्ये अस्ति। यथा वायुपुराणे उक्तम् –

उत्तरं यत्समुद्रस्य हिमाद्रश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ।।

**अन्ताराष्ट्रियं महत्वम्**

"उदारचरितानान्तु वसुधैवकुटुम्बकम्" इत्यतेमादर्शं भारतीयाः प्राचीनकालादेव प्रादर्शयन् । यथा –

समानमस्तु वो मनो यथावः सुहासितिः ।
देवस्य पस्य कार्य न ममार न जीर्यति ।
केवलाघो भवति केवलादि
एकं सद्विप्रा बहुधा वदन्ति
सत्यमेव जयते नानृतम्

इत्येतादृशाः उदात्ताः विचाराः सन्देशाश्च संस्कृतभाषायामुपलभ्यमानाः अस्मान् अन्ताराष्ट्रियजीवनाय प्रेरयन्ति।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।।

एषा प्रार्थना सौहार्दं, भातृभावं, सहनशीलतां च शिक्षयति । अन्ताराष्ट्रियक्षेत्रे उदात्ताः प्राचीनादर्शाः कार्यान्विताः भवेयुः। एते उत्कृष्टविचाराः अस्मान् अन्ताराष्ट्रियसहयोगाय उत्साहितं कुर्वन्ति।

संस्कृतभाषा सर्वासु भाषासु प्रधानतमा भवति । अतः अस्याः भाषायाः माध्यमेन विदेशीयैः साकं सम्बन्धः सुगमः भवति । एवं संस्कृतस्य अन्ताराष्ट्रियं महत्वं व्यक्तं भवति।

**साहित्यिकं महत्वम्**

संस्कृतसाहित्यम् अतीवविस्तृतं भवति । वैदिकसंस्कृते काव्यरचनैव प्रधाना आसीत्, किन्तु लौकिकसंस्कृते गद्यं, पद्यं, नाटकम् इत्यादिविभिन्नप्रकाराः ध्वन्यलङ्कारगुणरीत्यादिविषयैः दर्शनगणितज्योतिषेतिहासराजनीत्यादिविषये रचिताः अभवन्। उदा –

सङ्गीतसाहित्यकलाविहीनः साक्षात्पशुपुच्छविषाणहीनः।
तृणन्नखादन्नपि जीवमानः तद्भागधेयं परमं पशूनाम् ।।

संस्कृतसाहित्यस्य उत्कृष्टरचनाः विश्वविख्याताः सन्ति ताः कुमारसम्भवम्, मेघदूतम्, उत्तररामचरितम्, किरातार्जुनीयम् इत्यादि। संस्कृतसाहित्यम् आधुनिकसाहित्यस्य प्रेरणस्रोतः भवति।

**कलात्मकं महत्वम्**

प्राचीनभारते विज्ञानेन साकं कलानामपि उन्नतिः आसीत् । मूर्तिकलायां, चित्रकलायाञ्च भारतं विश्वविख्यातम् आसीत् । चतुःषष्ठिकलाः संस्कृतग्रन्थेषु वर्णिताः उपलभ्यन्ते। अतः कलादृष्ट्या संस्कृतस्य महत्वम् अङ्गीकर्तव्यं भवति।

एतेन विवेचनेन स्पष्टं भवति यत् भारतीयसंस्कृतिः संस्कृतसाहित्ये सुरक्षिता अस्ति इति। संस्कृतभाषाद्वारा भारतस्य वास्तविकं स्वरूपं ज्ञातुं शक्यते । संस्कृतस्य प्राचीनवैभवस्य स्मरणमात्रेण प्रयोजनं नास्ति । वर्तमाने तस्यै उचितं स्थानं दातव्यम् । प्राचीनकाले इव पुनरपि भारतं लोके सर्वेषु क्षेत्रेषु, सर्वेषु राष्ट्रेषु उन्नतस्थानं प्राप्नुयात्। तदेव पुनः संस्कृतस्य उद्धरणाय आवश्यकः प्रयत्नः कर्तव्यः।

❀ ❀ ❀

# सूक्ष्मशिक्षणम्

✍ प्राची परमिता थाटोई

अनुक्रमाङ्कः – 49

शिक्षकप्रशिक्षणसंस्थानानां प्रमुखं कार्यं वर्तते प्रभावशालिनां शिक्षकाणां सज्जीकरणम् । स्वातन्त्र्योत्तरे भारते पर्याप्तसङ्ख्यका इमाः संस्थाः संस्थापिता अभूवन् । साम्प्रतं तु आसां सङ्ख्या अतिद्रुतगत्या वर्धमाना दरीदृश्यते । शिक्षकप्रशिक्षणकार्यक्रमे उपयुज्यमानेषु शिक्षणकौशलेषु अत्यन्तं विशिष्टं नूतनं च वर्तते सूक्ष्मशिक्षणम् ।

**सूक्ष्मशिक्षणस्य कौशलानि**

1. सूक्ष्मशिक्षणं काचित् नियन्त्रिता अभ्यासपद्धतिः या विशिष्टशिक्षणकौशलेषु अवधातुं नियन्त्रितपरिस्थितिषु शिक्षणाभ्यासं कर्तुं च आनुकूल्यं कल्पयति ।

2. सूक्ष्मशिक्षणं तादृशी काचित् सूक्ष्मपदीयशिक्षणपरिस्थितिः यस्याः नियोजनं पुरातनकौशलानां समीकरणार्थं नूतनकौशलानां विकासार्थं च भवति ।

3. सूक्ष्मशिक्षणम् अल्पसमयात्मकः च अल्पछात्रात्मकः अल्पक्रियाकलात्मकः च कश्चन समुचितप्रशिक्षणप्रविधिः अस्ति ।

**सूक्ष्मशिक्षणस्य विकासः**

1961 खीष्टाब्दे स्टेनफ़ोर्डविश्वविद्यालये डा. ड्वाइट डब्ल्यू एलन्, डा. राबर्ट एन्. बुश प्रभृतिविदुषां यत्नेन सूक्ष्मशिक्षणम् अस्तित्वम् अवाप । प्रायः दशकपरिमिते समये अमेरिकादेशस्य पञ्चाशत्प्रतिशतं महाविद्यालयेषु सूक्ष्मशिक्षणं स्वीयां प्रभां वितताान । भारते अस्यां दिशि एन्. सी. ई. आर. टी इत्याख्या संस्था प्रायतत् । 1981 खीष्टाब्दे इन्दौरविश्वविद्यालये सूक्ष्मशिक्षणोपरि "राष्ट्रिय प्रायोजना" निर्मिता अभूत् । इत्थं सूक्ष्मशिक्षणं शिक्षणप्रशिक्षणमहाविद्यालयेषु महत्वम् आप्नुवदस्ति ।

**सूक्ष्मशिक्षणस्य विभिन्नसोपानानि**

1. कौशलस्य निश्चयः ।
2. लघुपाठ्यांशस्य निश्चयः ।
3. सूक्ष्मपाठयोजनानां निर्माणम् ।
4. कौशलप्रस्तुतिः ।
5. प्रतिपुष्टिप्राप्तिः ।
6. पुनर्योजनानिर्माणम् ।

**सूक्ष्मशिक्षणचक्रम्**

1. योजना
2. शिक्षणम्
3. प्रतिपुष्टिः
4. पुनर्योजना
5. पुनः शिक्षणम्
6. पुनः प्रतिपुष्टिः

**सूक्ष्मशिक्षणस्य उपयोगाः**

1. प्रशिक्षणार्थे भवति सूक्ष्मशिक्षणम् ।
2. पक्वताप्राप्तिः ।
3. आत्ममूल्याङ्कनम् ।
4. आदर्शपाठयोजनार्थम् साहाय्यम् ।
5. कौशलानां विकासार्थं साहाय्यम् ।

# संस्कृतस्य महत्त्वम्

✍ ईप्सिता दीक्षित

अनुक्रमाङ्कः – 50

संस्कृतशब्दस्यार्थः अस्ति सम्यक् प्रकारेणपरिष्कृतम् । अर्थात् व्याकरणेन यत् परिष्कृतं तदेव संस्कृतम् इति कथ्यते । इयं हि भाषा शुद्धा परिष्कृता सर्वदोषशून्या अस्ति, अतः देववाणी, गीर्वाणभारती, अमरभाषा इत्यादिभिः शब्दैः व्यवह्रियते । इयम् एका रम्या, दिव्या, मधुरा, सरला च भाषास्ति । संस्कृतं संसारस्य प्राचीनतमा भाषा अस्ति । प्राचीनकाले न काऽपि अन्या भाषा एतावत् समृद्धा आसीत्, एषा संसारस्य सर्वासामेव भाषाणां उद्गमा जननी च इति स्वीकुर्वन्ति सर्वे प्राचीनग्रन्थाः । चत्वारो वेदाश्च संस्कृतभाषायामेव निबद्धाः सन्ति । विश्वस्य प्राचीनतमः ग्रन्थः ऋग्वेदः इति सर्वे भाषाविदाः स्वीकुर्वन्ति । चत्वारः वेदाः ब्राह्मणग्रन्थाः उपनिषदः स्मृतिग्रन्थाश्च वैदिकसाहित्यमेव वर्तते । वैदिकसाहित्यमेव भारतीयसंस्कृतेः इतिहासस्य कलायाः च उद्गमः अस्ति । विश्वविश्रुतम् आदिकाव्यं, रामायणम्, महाभारतम्, अष्टादशपुराणानि, गद्यसाहित्यं, काव्यसाहित्यं, कथासाहित्यं, नाटकानि च संस्कृतभाषायां विद्यन्ते । भारतीयदर्शनशास्त्रं कथा इतिहासपुराणं, ज्योतिषं, वैद्यकग्रन्थाः, सङ्गीतशास्त्राणि ललितसाहित्यञ्च संस्कृतभाषायामेव सन्ति। अतः अस्याः ज्ञानं विना न कोऽपि भारतीयसंस्कृतेः साहित्यस्य कलाकौशलस्य च ज्ञाता भवितुमर्हति।

## संस्कृतस्य ऐतिहासिकं महत्वम्

संस्कृतभाषायाः साहित्ये प्राचीनेतिहासः सन्निहितो वर्तते । वेदेभ्यः प्राचीनार्यजातीनां सभ्यता, संस्कृतिः, धर्मः, राजनीतिः, इतिहासश्च अस्माभिः ज्ञायते । पुराणेषु, उपनिषत्सु , रामायणे, महाभारते, महाकाव्येषु, वेदानां त्रिपिटकसहित्ये जैनसाहित्ये च भारतस्य प्राचीनेतिहासः विद्यते । कौटिल्यस्यार्थशास्त्रे मनुस्मृतौ याज्ञवल्क्यस्मृतौ च तत्कालीनसमाजस्येतिहासः उपलभ्यते । संस्कृतस्य निम्नमहत्त्वानि च परिदृश्यन्ते । यथा –

1. सांस्कृतिकं महत्वम्
2. भाषावैज्ञानिकं महत्त्वम्
3. राष्ट्रियं महत्त्वम्
4. अन्ताराष्ट्रियं महत्त्वम्
5. साहित्यिकं महत्त्वम्
6. कलात्मकं महत्त्वम्
7. वैज्ञानिकं महत्त्वम्

## सांस्कृतिकं महत्वम्

भारतीयसंस्कृतेः स्रोतः संस्कृतभाषा भवति ।अस्माकं सभ्यता संस्कृतिश्च वेदेभ्यः स्मृतिभ्यः पुराणेभ्यः निःसृता भवति । संस्कृतभाषायाः माध्यमेन भारतीयसंस्कृतिः अनूचाना प्रवर्तते । अस्माकं संस्कृतिः सभ्यताश्च संस्कृतग्रन्थेषु विद्यते अतः संस्कृतेः दृष्टया संस्कृतस्य महत्त्वम् अनिर्वचनीयं भवति ।

**भाषावैज्ञानिकं महत्त्वम्**

संस्कृतं भारतीयभाषापरिवारस्य प्रधानभाषा वर्तते । यूनानी, इरानी, देशीयभाषाणां संस्कृतेन साकं सम्बन्धो वर्तते । भारतीय आर्यभाषाः न केवलं संस्कृतात् उत्पन्नाः, किन्तु संस्कृतशब्दैः साहित्येन च समृद्धाः सन्ति । दक्षिणभारतस्य द्रविडभाषाः संस्कृतेन प्रभाविताः सन्ति ।

**राष्ट्रियं महत्त्वम्**

भारतस्य एकता अखण्डता च संस्कृते निहिता वर्तते । भारते सत्स्वपि अनेकेषु क्षेत्रेषु जनानां संस्कृतिः समाना वर्तते । कदाचित् जनाः साम्प्रदायिकता, प्रान्तीयभाषा इत्यादिविषयेषु कलहं कुर्वन्ति । संस्कृतस्य माध्यमेन विभिन्नभाषाभाषिणः एकशृङ्खलायां बद्धाः ।

**अन्ताराष्ट्रियं महत्त्वम्**

"उदारचरितानान्तु वसुधैव कुटुम्बकम्" इत्येतमादर्शं भारतीयाः प्राचीनकालादेव प्रादर्शयन्। "सामानमस्तु वो मनो यथा वः सुसहासति" इत्येतादृशाः उदाराः विचाराः सन्देशश्च संस्कृतभाषायामेव उपलभ्यमानाः अस्मान् अन्ताराष्ट्रियजीवनाय प्रेरयन्ति ।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्ति मा कश्चित् दुःखभाग् भवेत् ।।

**साहित्यिकं महत्त्वम्**

संस्कृतसाहित्यम् अतीवविस्तृतं वर्तते । वैदिकसंस्कृते गद्यं पद्यं, नाटकम्, इत्यादिविभिन्न प्रकारकाः ध्वनिः, अलङ्कारः, गुणरित्यादिविषयैः सहिताः दर्शनगणितज्योतिषेतिहासराजनित्यादिविषयाः रचिताः अभवन् । भारतीयभाषासु साहित्ये च न केवलं संस्कृतभाषायाः शब्दजालम्, अपितु संस्कृतसाहित्यस्य विचारधाराः ।

**कलात्मकं महत्त्वम्**

प्राचीनभारते विज्ञानेन साकं कलानामपि उन्नतिः आसीत् । मूर्तिकलायां चित्रकलायां च भारतं विश्वविख्यातमासीत् । एतद् अतिरिक्तं नाट्यकला अभिनयसामग्रीवेशभूषा संगीतं नृत्यमित्याद्याः चतुःषष्ठिकलाः संस्कृतग्रन्थेषु वर्णिताः उपलभ्यन्ते । अतः कलादृष्ट्या संस्कृतस्य महत्त्वम् अङ्गीकर्तव्यमेव भवति ।

## छात्राणां नामानि 2015 – 2016

| R.No. | Name of the students |
|---|---|
| 01 | Rajesh Bhat |
| 02 | Dhruva Bhat |
| 03 | Sujata Naik |
| 04 | Ranjan Rashmi Sethi |
| 05 | Kanhaiya Kumar Yadav |
| 06 | Suraj Kumar Patel |
| 07 | Charan Raj.T.S |
| 08 | Ashwin Ganapati Bhat |
| 09 | Prithiraj Sarkar |
| 10 | Abhishek Pargaje |
| 11 | Sasmita Parida |
| 12 | Susheel Lobani |
| 13 | Puspalata Behera |
| 14 | Rajat Suyal |
| 15 | Prabin Debsarma |
| 16 | Sanjay Datt Bhatt |
| 17 | Brahmananda Pradhan |
| 18 | Kartika Sahoo |
| 19 | Kamalinee Padhan |
| 20 | Shubhasmita Sahu |
| 21 | Ramachandra Bhat |
| 22 | Shubhashree Bhuyan |
| 23 | Tapaswini Sahu |
| 24 | Swagatika Sahu |
| 25 | Barun Kumar Mohanty |
| 26 | Vinay M. Bhat |
| 27 | H. Shubham Babaso |
| 28 | Om Prakash Panda |
| 29 | Ganesh Subray Bhat |
| 30 | Amulya Bhoi |
| 31 | Dipak Sarkar |
| 32 | Parshwanatha |
| 33 | Shivam Kumar Shukla |
| 34 | Bhuvnesh Naudiyal |
| 35 | Swarnalata Muduli |
| 36 | Rashmita Behera |
| 37 | Mohit Joshi |

38 Biplab Roy
39 Sumanta Padhan
40 Chirasmita Sathi
41 Deepak Raturi
42 T. Bhima Sankara Sairam
43 Poorna D.S.
44 Sanjita Gandhi
45 Sajib Chandra Roy
46 Shuvashree Mohanty
47 Vasudev Dalbehera
48 Ranjita Sahu
49 Prachi Paramita Thothoi
50 Ipsita Dikshit

3-6-15 N.R. 12 — S.O. A.P.S. द्वारा कुलपति से
सूचनार्थ देखें। अनुलिपित कार्यवाही करना।

राष्ट्रीय अध्यापक शिक्षा परिषद
(भारत सरकार का एक विधिक संस्थान)
दक्षिण क्षेत्रीय समिति

गुरुर्गुरूतमो धाम
NCTE

National Council for Teacher Education
(A Statutory Body of the Government of India)
Southern Regional Committee

3/6/15
CRC

Rashtriya Sanskrit Sansthan Deemed University, Rajiv Gandhi Campus, SRINGERI
D No. 151
Dt. 3/6/2015

F.SRO/NCTE/APS09564/B.Ed-AI/KA/2014-15/ 65889 Date: 29/05/2015

TO BE PUBLISHED IN GAZETTE OF INDIA PART III SECTION 4

## ORDER

**WHEREAS,** in exercise of the powers conferred by sub-section(2) of Section 32 of the National Council for Teacher Education Act, 1993(73 of 1993), and in supersession of the National Council for Teacher Education [Recognition Norms and Procedure] Regulations, 2009, the National Council for Teacher Education has notified the Regulations, 2014 on 1.12.2014.

**2. AND WHEREAS,** the institution **Rashtriya Sanskrit Sansthan, Rajiv Gandhi Campus, Menase, Bharathi Nagara, Sringeri, Chikkmagaluru District – 577139, Karnataka** has by affidavit consented to come under New Regulations and sought for one unit in **B.Ed-AI** which require additional facilities.

**3. AND WHEREAS,** on scrutiny it is found that the institution has not maintained/revalidated the Fixed Deposited Receipts towards Endowment and Reserve Funds.

**4. AND WHEREAS,** it has been decided to permit the institution an intake of one unit of 50 students subject to the institution fulfilling following conditions namely,

- **The institution shall submit revalidated FDRs of the enhanced values, in joint account with the SRC before 30 June, 2015 failing which the recognition will be withdrawn.**

- **The institution Shall Create additional funds as per Regulations, 2014 and inform Regional Committees with required documents by October 31, 2015.**

**5. NOW THEREFORE,** in the light of the above and in terms of Section 14(3) of NCTE Act and in accordance with the Regulations, 2014, the Southern Regional Committee, NCTE hereby grants recognition to **Rashtriya Sanskrit Sansthan, Rajiv Gandhi Campus, Menase, Bharathi Nagara, Sringeri, Chikkmagaluru District – 577139, Karnataka** for conducting **B.Ed-AI** programme of **two** years duration with an annual intake of **50** students (one unit) from the academic session **2015-16 subject to submission of revalidated FDRs of the enhanced value in joint account with the SRC before 30 June, 2015.**

**6.** Further, the recognition is subject to fulfilment of other requirements as may be prescribed by other regulatory bodies like UGC, affiliating University/Body, the State Government etc, as applicable.

**7.** The institution shall submit to the Regional Committee a Self- Appraisal Report at the end of each academic year along with the statement of annual accounts duly audited by a chartered Accountant.

**8.** The institutions shall maintain & update its web-site as per provisions of NCTE Regulations and always display following as mandatory disclosure:-

a) Sanctioned programmes along with annual intake in the institution:
b) Name of faculty and staff in full as mentioned in school certificate along with their qualifications, scale of pay and photograph.
c) Name of faculty members who left or joined during the last, quarter:

**Cont...2**

ज्ञान भारती केम्पस रोड, नागरभावी,
सामने नेशनल लॉ स्कूल, बेंगलौर – ५६० ०७२
Phone : 080-23185669/70/72 Fax : 080-23185673

Jnana Bharathi Campus Road, Opp. National Law School,
Nagarabhavi, Bangalore - 560 072.
E-mail : srcr@ncte-india.org / srcncte2012@gmail.com
Website : http://www.srcncte.in

-2-

d) Names of Students admitted during the current session along with qualification, Percentage of marks in the qualifying examination and in the entrance test, if any, date of admission, etc.;
e) Fee charged from students;
f) Available infrastructural facilities;
g) Facilities added during the last quarter;
h) Number of books in the library, journals subscribed to and additions, if any, in the last quarter;
i) The affidavit with enclosure submitted along with application.
j) The institution shall be free to post additional relevant information, if it so desires.
k) Any false or incomplete information on website shall render the institution liable for withdrawal of recognition.

If the institution Contravenes any of the above conditions or the provision of the NCTE Act, Rules, Regulations and Orders made of issued there under , the institution will render itself vulnerable to adverse action including withdrawal of recognition by the regional committee under the provisions of Section 17(1) of the NCTE Act.

By Order,

P Revathi Reddy

**(P.Revathi Reddy)**
**Regional Director**

The Manager,
Government of India Press
Department of Publications (Gazette Section)
Civil Lines, New Delhi – 110054.

To:

**The Principal,**
**Rashtriya Sanskrit Sansthan,**
**Rajiv Gandhi Campus, Menase,**
**Bharathi Nagara, Sringeri,**
**Chikkmagaluru District – 577139,**
**Karnataka**

<u>**Copy to:**</u>

1. The Secretary, Dept. of Elementary Education and Literacy, Ministry of Human Resource Development, Govt. of India, ShastriBhavan, New Delhi – 110 001.
2. The Principal Secretary (Higher Education) Government of Karnataka, M.S. Building, Dr. Ambedkar Veedhi, Bangalore 560001, Karnataka.
3. The Registrar, **Rashtriya Sanskrit Sansthan, Rajiv Gandhi Campus, Menase, Bharathi Nagara, Sringeri, Chikkmagaluru District – 577139, Karnataka**.
4. The Director, DSERT, Ring Road, BSK 2nd Stage, Bangalore.
5. The Correspondent, **Rashtriya Sanskrit Sansthan, Rajiv Gandhi Campus, Menase, Bharathi Nagara, Sringeri, Chikkmagaluru District – 577139, Karnataka.**
6. The Under Secretary (CS), National Council for Teacher Education, Hans Bhawan Wing-II, Bahadursbhah Zafar Marg, New Delhi – 110 002.
7. Office Order file/Institution file.

Copy Received
AB
3/6/15


THE CENTRE FOR internet & society
इत्यस्याः संस्थायाः सहयोगेन शिक्षाशास्त्रिच्छात्राणां कृते
संस्कृत-विकिपीडिया कार्यशाला
10 तः 12 डिसेंबर् 2015 पर्यन्तम्
राष्ट्रियसंस्कृतसंस्थानम्
व्यावसायिकक्षमतोन्नयनकार्यक्रमान्तर्गता
शोभायात्रा
शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम्
राजीवगान्धीपरिसरः